उग्रा चोग्र प्रभादीप्ता त्रिकोणाग्रे व्यवस्थिताः ।
नीला घना वलाका च तयोरन्तरगोचराः ।।

पूजनीयाः प्रयत्नेन द्वितीयावरणे प्रिये ।
सर्व्वान्तःस्थे त्रिकोणे तु त्रिस्त्रिरेकत्र पूजयेत् ।।
ब्राह्मी नारायणी चैव सव्ये माहेश्वरी तथा ।
चामुण्डा चापि कौमारी तथा चैवापराजिता ।।
दक्षिणे पूजयेत्तिस्रस्तिस्रः पश्चिमगा अपि ।
वाराही नारसिंही च तथेन्द्राणी प्रकीर्त्तिता ।।
सर्व्वाः श्यामा असिकरा मुंडमालाविभूषिताः ।
कपालं तर्ज्जनं चैव धारयन्त्यः सुसम्मदाः ।।
सर्व्वासामपि वै देयो वलिः पूजा तथैव च ।
अनुलेपनकं चापि विभवेनोपकल्पितं ।।
त्रिस्त्रिः पूजा प्रकर्त्तव्या सर्व्वासामपि सर्व्वदा ।
दलेषु पूजयेदष्टौभैरवा ये प्रकीर्त्तिताः ।।
असिताङ्गो रुरुश्चैव चण्ड उन्मत्तसंज्ञकः ।
क्रोधस्तथैव कापाली तथा भीषणनामकः ।।
संमोहनस्तथा सर्व्वे कर्त्तृखर्प्परधारिणः ।
कालाञ्जनचयप्रख्या द्विभुजारौद्ररूपिणः ।।
एतान्संपूज्य विधिवत् क्षेत्रपालान्प्रपूजयेत् ।
एकपादो विरूपाक्षो भीमः संकर्षणस्तथा ।।
चण्डघण्टो मेघनादो वेगमाली प्रकम्पनः ।
एते चाष्टौ क्षेत्रपाला दलयोरन्तरे स्थिताः ।।
विकृतास्या भीमरूपा गदापरिघपाणयः ।
दलयोरन्तरे पूज्याः पञ्चमावरणे प्रिये ।।
षष्ठे चावरणे देव्या योगिनीरष्ट पूजयेत् ।
उल्कामुखी [७ क] कोटराक्षी विद्युज्जिह्वा करालिनी ।।

वज्रोदरी तापिनी च ज्वालाजालंधरी तथा ।
व्यात्ताननाा घोररावा जिह्वाललनभीषणाः ॥
वसासृङ्मांससंपूर्णकपालासिकराः स्मृताः ।
एता दलाग्रे संपूज्याः षष्ठावरणके क्रमात् ॥
लोकपालाश्च सम्पूज्या वहिर्द्दशसु दिक्ष्वपि ।
स्वस्वायुधासक्तकराः स्वस्ववाहनसंयुताः ॥
सप्तावरणमेतत्ते कथितं भक्तितत्परे ।
देव्याः कामकलाकाल्याः समन्त्रा ध्यानपूर्व्वकम् ॥
एवं पूर्व्वोक्तरूपान्तां संपूज्य परमेश्वरीं ।
योगिनीचक्रसहितां भैरवेण समन्वितां ॥
ततश्च यत्नतः कान्ते वलिं सम्प्रतिपादयेत् ।
वलिमुत्सार्य्य नैवेद्य नैऋत्यां दिशि चोत्सृजेत् ॥
हृदये चैव देवीन्तां संस्थाप्य विधिवत्पुनः ।
निर्म्माल्यं च शुचौ देशे धारणीयं शिरस्यपि ॥
अतः परम्प्रवक्ष्यामि पौरश्चरणिकं विधिं ।
एकस्मिन्यत्र विहिते सिद्धिस्तात्कालिकी भवेत् ॥
भूमिशुद्धिर्द्रव्यशुद्धिः पुरैव कथिता मया ।
यमाश्च नियमा ये स्युः पुरश्चरणकर्म्मणि ॥
सर्व्वानेव प्रयुञ्जीत सततं भक्तितत्परः ।
कृतनित्यक्रियः प्रातः कृतपूजाविधिः शुचिः ॥
नारास्थिनिखनेद्भूमावमुं मंत्रमुदीरयन् ।
तारक्रोधार्णह्रीपाशस्मरभूतान्समुद्धरन् ॥
सिद्धिमुच्चार्य्य देहीति युग्मं वह्निचङ्गनां वदेत् ।
तदुपर्य्येव चास्तीर्य्य स्वासनं सुष्टु कल्पितं ॥

नृमुण्डमग्रतः कृत्वा नरास्थिजपमालया ।
लक्षमे [७ ख] कं जपेन्मंत्री हविष्याशी दिवा शुचिः ॥
अशुचिश्च तथा रात्रौ लक्षमेकं तथैव च ।
दशांशं होमयेन्मत्री तर्प्पयेदभिषेचयेत् ॥
होमसन्तर्प्पणे चैव पूजावत्कथितो विधिः ।
पूजायां वा प्रयोगे वा होमे वा तर्प्पणे थवा ॥
गुह्यकालीविधानेन सर्व्वं कार्य्यं शुचिस्मिते ।
अत्रानुक्तम्विधानं यत्तत्रत्यं तत्प्रकल्पयेत् ॥
तत्राप्यनुक्तं यत्किञ्चित्तत्रोक्तो दक्षिणा विधिः ।
एतत्ते सर्व्वमाख्यातं समासेन वरानने ॥
देव्याः कामकलाकाल्याः पूजाविधिरनुत्तमः ।
अतः परं प्रयोगांस्तान्वक्ष्यामि प्रयता शृणु ॥
स्नातः शुक्लांवरधरः कृतनित्यक्रियो दिवा ।
रात्रौ नग्नः शयानश्च मैथुने च व्यवस्थितः ॥
अथवा मुक्तकेशश्च प्रजपेदयुतं नरः ।
भवन्ति तत्क्षणाद्देवि तेन सर्व्वार्थसिद्धयः ॥
स्तंभनं मोहनं वापि वशीकारो विशेषतः ।
यद्यदिच्छति तत्सर्व्वं साधयेदविचारयन् ॥
नग्नां परस्त्रियम्वीक्ष्य प्रजपेदयुतं सुधीः ।
स भवेत्सर्व्वविद्यानां पारगः सर्व्वदैव हि ॥
तस्य दर्शनमात्रेण वादिनो निः प्रभा मताः ।
गद्यपद्यमयी वाणी सभायान्तस्य जायते ॥
अथवा मुक्तकेशोसौ हविह्यं भक्षयन्नरः ।
अष्टोत्तरशतञ्जप्त्वा भगमामंत्र्य यत्नतः ॥

मैथुनं यः प्रकुर्व्वीत धनधान्यसमन्वितः ।
सर्व्वविद्यावतां श्रेष्ठः स भवेन्नात्र संशयः ॥
ऋतुमत्या भगं पश्यन्प्रजपेदयुतन्नरः ।
अनर्थितापि तद्वाणी गद्यपद्यमयी भवेत् ॥
छन्दोवद्धा परन्तस्य वाणी वक्त्रात्प्रजायते ।
सुरतेषु च जप्तव्यम्महापातकमुक्तये ॥
धानागमाय च तथा परयोषासमागमे ।
यदि नो योषितः सङ्गस्तदारेतः प्रयत्नतः ॥
समुत्सार्य्य जपं कुर्य्यात्सर्व्वकामार्थसिद्धये ।
तत्रैव रति [८ क] मारभ्य यो जपेन्मन्त्रवित्तमः ॥
अयुतं मैथुनी भूत्वा मंत्रजप्यपरायणः ।
स याति परमां सिद्धिं देवेनापि सुदुर्ल्लभां ॥
आकर्षणवशीकारौ मारणोच्चाटने तथा ।
स्तंभनं मोहनञ्चैव वुद्धेः सन्त्रासनन्तथा ॥
करोति तत्क्षणादेव नात्र कार्य्या विचारणा ।
वाग्मित्वञ्च धनित्वञ्च वहुपुत्रत्वमेव च ॥
न जरा न च रोगो वा न च मृत्युर्न्न वा भयं ।
न च त्रासो मनुष्येभ्यो न च वाक्कायपातनम् ॥
अथवा स भवेन्नित्यं चतुर्व्विंशतिसिद्धिभाक् ।
स्वदेहरुधिराक्तैश्च विल्वपत्रैः सहस्रशः ॥
श्मशानेभ्यर्च्चयेद्देवीं वागीश समतां व्रजेत् ।
रेतो युक्त जवापुष्पैः करवीरस्य वा प्रिये ॥
श्मशानेभ्यर्च्चयेद्देवीं सर्व्वसिद्धिं स विन्दति ।
धनवान्वलवान्वाग्मी सर्व्वयोषित्प्रियो भवेत् ॥

सुखी स्यान्नात्र सन्देहो महाकालवचो यथा ।
श्मशाने योषितं वीजैर्म्मध्येभ्यर्च्च्य सहस्रशः ॥
रक्तचन्दनदिग्धांगीं रक्तपुष्पैरलंकृताम् ।
पूजयित्वा भगं वीक्ष्य ततो ध्यायेत कालिकां ॥
सद्यो हि लभते राज्यं यदि सा न भयायते ।
मेषमाहिषमांसेन वाग्मित्वं तस्य जायते ॥
श्मशाने शयने चैव शवासनगतः पुमान् ।
असकृच्च जपेन्मन्त्रं सर्व्वसिद्धिफलप्रदं ॥
तर्प्पयेत्तां श्मशाने तु रक्तमांसादिभिस्त्रिधा ।
त्रिस्त्रिर्म्मनुमुदीर्य्यैवं सर्व्वसिद्धिर्भवेद्ध्रुवं ॥
रेतोभिश्च तथा तद्वत्स्वकीयेन वरानने ।
मैथुनायितयोषाया भगप्रक्षालनोदकैः ॥
मेषमाहिषरक्तेन नररक्तेन [= ख] चैव हि ।
उन्दुरोलूकरक्तेन वाग्मिता तस्य जायते ॥
धनित्वं जाय॰ तस्य सर्व्वसिद्धिः प्रजायते ।
वचसा स भवेज्जीवो धनेन च धनाधिपः ॥
आज्ञया देवराजोसौ रूपेण च मनोभवः ।
वलेन पवनो ह्येष सर्व्वतश्चार्थसाधकः ॥
पक्वापक्वे हि यन्मांसं सास्थि दद्यात्सदा वलिं ।
मूषमार्ज्जाराजमांसं मेषमाहिषसंभवं ॥
सर्व्वं सास्थि प्रदातव्यं तदा लोमसमन्वितं ।
स्ववीर्य्यं स्वनखं छिन्नं केशं संमार्ज्जनागतं ॥
निवेदयेत् श्मशाने तत्सर्व्वसिद्धिं स विन्दति ।
नारीरजोन्वितं कृत्वा पर्णानां शतमुत्तमम् ॥

प्रत्येकं प्रजपेन्मंत्रं ततस्तद्धोमयेद्बुधः ।
युगानामयुतन्तेन मान्मथी पूजिता भवेत् ॥
सर्व्वसिद्धिर्भवेत्तस्य वाग्मी धीरश्च जायेत ।
न तस्य दुर्ल्लभं किंचित्पृथिव्यां जातु विद्यते ॥
योनिनिरूपं हि कुण्डं वै कृत्वा वैतस्तिमानतः ।
हस्तविस्तारतः कृत्वा हस्तं चापि तथा अधः ॥
तत्र कार्य्या हि मंत्रेण वहिःस्थापनिकाः क्रियाः ।
संहारभैरवायादौ दद्यात्प्रथममाहुतिं ॥
रुरुमांसेन साज्येन भक्तेन रुधिरेण च ।
कृष्णपुष्पेण साज्येन सरक्तेन विशेषतः ॥
आमिषादिभिरप्येवं श्मशाने जुहुयात्सुधीः ।
स्नातः शुक्लांवरधरः शुचिः प्रयतमानसः ॥
दिवा चैवं प्रकर्त्तव्यं सर्व्वकामार्थसिद्धये ।
रात्रौ नग्नो मुक्तकेशो मैथुने च व्यवस्थितः ॥
प्रकर्त्तव्यं प्रयत्नेन सर्व्वकामार्थसिद्धये ।
किं वहूक्तेन देवेशि सर्व्वं प्राप्नोत्यसंशयं ॥
द्विजादीनान्तु सर्व्वेषां [६ क] दिवा विधिरिहोच्यते ।
शूद्राणां तु तथा प्रोक्तं रात्रिदृष्टं महामतं ॥
यद्यत्कामयते चित्ते तत्तदाप्नोति नित्यशः ।
भैरवन्तं यजेदादौ पश्चाद्देवीं प्रयत्नतः ॥
द्विधा विभज्य वस्तूनि यत्नात्साधकसत्तमः ।
मांसं रक्तन्तिलकेशं नखं भक्तञ्च पायसम् ॥
आज्यं चेति प्रयत्नेन होतव्यं सर्व्वसिद्धये ।
एवं कृत्वा विधानं हि लभते सिद्धिमुत्तमाम् ॥

यद्यत्प्रार्थयते चित्ते तत्तदाप्नोति सर्व्वथा ।
देवत्वं दानवत्वञ्च सिद्धचारणतान्तथा ॥
दत्वा सम्पूज्य चाप्नोति सर्व्वमेवमतन्द्रितः ।
किं वहूक्तेन देवेशि सत्यं कृत्वा त्वयि ब्रुवे ॥
ब्रह्माण्डगोलके सिद्धिर्य्या काचिज्जगतीतले ।
करामलकवत् सिद्धिस्तस्य स्यान्नात्र संशयः ॥
एते सामान्यतः प्रोक्ताः प्रयोगा मन्त्रसिद्धये ।
विशेषतस्तु तान्येव कथयिष्याम्यतः परं ॥
एवन्देवीं कलुषदहनीम्पूजयित्वा यथावद् ।
हुत्वा दत्वा वलिमपि तथा तर्प्पयित्वाभिषिच्य च ॥
यं यं कामं वचयति मनस्याहितं संहितं वा ।
तन्तं प्राप्य श्रयति पदवीं योगिभिः प्रार्थनीयाम् ॥

इत्यादिनाथविरचितायां महाकालसंहितायां सप्तावरणसामान्यप्रयोगो नाम द्विशताधिकत्रिचत्वारिंशः पटलः ॥३॥

अथातः संप्रवक्ष्यामि प्रयोगानतिगोपितान् ।
सकृद्विधानतो येषां सर्व्वसिद्धिः करे स्थिता ॥
कामराजादयो भेदास्त्रिपुराया यथा प्रिये ।
तथा कामकलाकाल्या भेदाश्चाष्टौ पुरोदिताः ॥
एषैव प्रकृतिर्ज्ञेया [६ ख] सर्व्वाः प्रकृतयो पराः ।
मन्त्रे ध्याने विशेषोस्ति न प्रयोगे कदाचन ॥
या गुह्यकाली कथिता समंत्रध्यानपूजना ।
वक्ष्यमाणप्रयोगेन सैव कामकला भवेत् ॥
पुरश्चरणमेकं हि कृत्वा देवि वरानने ।
तत एतै प्रकर्त्तव्याः प्रयोगा मंत्रसिद्धये ॥

शिवाप्रयोगं वक्ष्यामि तत्राप्यादौ वरानने ।
सदा कृष्णचतुर्द्दश्यां कृतनित्यक्रियोदिवा ॥
चतुर्व्विधान्नसामग्रीं रात्रौ निष्पादयेत्सुधीः ।
पायसापूपसंयावशष्कुनीमोदकान्वितां ॥
नानाविधौदनयुतां नानाव्यंञ्जनपूरितां ।
नानाविधमहामत्स्यमांससंभारसंभृतां ॥
अन्यैश्च विविधैर्भक्ष्यैः षड्रसैः परिपूरितां ।
हैमे वा राजते ताम्रे मृण्मये भाजनेथवा ॥
पलाशपुटके वापि मधूकस्य दलेथवा ।
एकीकुर्य्यात्ततः सर्व्वं पृथक्पृथगुदारधीः ॥
अथान्यभाजने तद्वद्भिन्नभिन्नतया प्रिये ।
स्थापयेद्वक्ष्यमाणानि शुचिमांसानि भागशः ॥
पुटके पुटके कुर्य्यादेकीभावन्न कारयेत् ।
एकीभावान्महान्दोषः फलसिद्धिश्च नो भवेत् ॥
आमान्यजाद्यनानीह तथा पर्य्युषितानि च ।
अनुत्तप्तानि मेध्यानि पार्ष्ठान्द्ररहितानि च ॥
अपूतिगन्धीनि तथा क्रव्याद्भिरहितानि च ।
रक्तवन्ति च रक्तानि रसवन्ति तथैव च ।
वाराहमार्क्षं कापेयं खाङ्गं माहिषमेव च ।
गौधं शाल्यं तथा मार्गं कार्ष्णसारं च राङ्कवं ॥
गावयं च तथा शाशं माजमौरणमेव च ।
नाक्रं च कामथं ग्राहं वाभ्रवं सर्व्वकामदं ॥
अष्टादशापि मांसा [१० क] नि कुर्य्यादेकत्र साधकः ।
स्थलजान्यपि वार्जानि ग्रामजारण्यजान्यपि ॥

अथापराणि खागानि षट्त्रिंशत्पललान्यपि ।
कुर्य्यादेकत्र विधिवत्साहसी साधकोत्तमः ॥
वार्ध्रीनसं च कापोतं पारावतमथापि च ॥
औलूकञ्च तथा श्यैनं खाञ्जनं चासमेव च ।
काकं च कौरवं पैकं कौक्कुटं चाटकं तथा ॥
कालिंगं कारटञ्चापि दात्यूहं चातकन्तथा ।
गार्द्धं चैल्लं च कैरं च क्रौञ्चं वाकं तथैव च ॥
मायूरन्तैत्तिरं चापि हांसं चाक्रं च सारसम् ।
चाकोरण्टेट्टिभं चापि लावं हारीतमेव च ॥
कारण्डवं च वार्त्ताकं शात्रपत्रं च मार्ग्गवं ।
कौयष्टिकं भरद्वाजं सर्व्वं षट्त्रिंशदीरितं ॥
कर्त्तव्यानि तथैतानि पूर्व्वोक्तगुणवन्ति च ।
एतानि मांसान्यादाय सर्व्वाण्येव शुचिस्मिते ॥
पुटके पुटके कुर्य्यात्पृथक्पृथगमायया ।
तदन्नं तानि मांसानि गृहीत्वा कुसुमादि च ॥
ततोर्द्धरात्रचोत्थाय श्मशानाभिमुखो व्रजेत् ।
अथवा विपिनं घोरं निर्ज्जनं भूतसंकुलं ॥
उत्तराभिमुखो भूत्वा साधको वीतभीः शुचिः ।
प्रेतचेलासनं कृत्वा कृत्वा चांवुजमासनं ॥
उपविश्यार्च्चयेद्देवीङ्कालीङ्कामकलाभिधां ।
गंधैः पुष्पैश्च धूपैश्च दीपैर्न्नैवेद्यसंचयैः ॥
जप्त्वा स्तुत्वा नमस्कृत्य ततोनुज्ञां हि याचयेत् ।
अनेनैव तु मन्त्रेण वक्ष्यमाणेन पार्व्वति ॥
कृताञ्जलिपुटो भूत्वा धरातलमिलच्छिराः ।

देवि कामकलाकालि सृष्टिस्थित्यन्तकारिणि ॥
अनुज्ञां देहि मे देवि करिष्येहं शिवाबलिं ।
इत्य [१० ख] नुज्ञां समादाय निर्भीः प्रयतमानसः ॥
उल्कामुखीर्घोररुपा शिवा आवाहये च्छनैः ।
वक्ष्यमाणेन मंत्रेण त्रिरुच्चार्य्य विशेषतः ॥
वद्धाञ्जलिर्म्मुक्तकेशो मालावान्नग्न उत्थितः ।
तारवाग्भवह्लीरोष प्रासादानंगभौतिकं ॥
मुखवामेक्षणौष्ठाधो रदाधो युद्धच कारकः ।
योगश्च वलयोर्द्विर्द्विः कामलञ्च ततः प्रिये ॥
वीजमुद्धृत्य षड्वर्णं नाम सम्वोधयेत्ततः ।
घोररावे इति पदं ततोनन्तर मुच्चरेत् ॥
महाकापालि च तथा विकटदंष्ट्रे तथैव च ।
संमोहिनी शोषिणी च सम्वोधनतया वदेत् ॥
करालवदने चेति तत उच्चारयेत्सुधीः ।
मदनोन्मादिनि पदं ज्वालामालिनि चेति च ॥
शिवारूपिणि चोद्धृत्य ततो भगवतीति च ।
आगछ द्वन्द्वमुल्लिख्य मम सिद्धिमितीति च ॥
देहि युग्मं मामिति च रक्ष रक्षेति चोद्धरेत् ।
ह्रां ह्रीं ह्रूं ह्रौं ततः प्रोक्त्वा क्षां क्षीं क्षूं क्षौं विनिर्द्दिशेत् ॥
क्रोधयुग्मं चास्त्रयुगं वह्निजायान्तगो मनुः ।
त्रिरुच्चार्य्य शनैरित्थं प्रतीक्षेत शिवापथं ॥
कालीरूपधराः सर्व्वा यद्यागछन्ति तत्क्षणात् ।
तदा सिद्धिं विजानीयाद्विपरीते तु सान्यथा ॥
शनैरुच्चारयन्मन्त्रं पूर्व्वोक्तं भक्तितत्परः ।

अर्द्धप्रहरपर्य्यन्तं पश्येत्तन्मार्ग्गमादरात् ॥
आगताभ्यो नमस्कुर्य्याद्दूरेणैव तु साधकः ।
पूजयेद्दूरतः स्थित्वा भक्तिभावेन भाविनि ॥
पाद्यार्घ्याचमनीयैश्च स्नानीयैर्ग्गन्धपुष्पकैः ।
धूपैर्द्दीपैश्च नैवेद्यैरन्यद्यद्यच्च संभवेत् ॥
सर्व्वोपचारैः संपूज्य भक्तिनम्रः प्रसन्नधीः ।
[११ क]तदन्नमग्रतः कृत्वा ततो दद्याच्छिवाबलिं ॥
वैहंगमानि मांसानि पंक्तिशः स्थापयेदपि ।
सर्व्वमेकत्र संस्थाप्य गृहीत्वा पाणिना जलं ।
उत्सृजेन्मनुनानेन गदतो मे निशामय ॥
प्रणवं च त्रपाक्रोधौ ङेन्तन्नाम समुच्चरेत् ।
ङेन्तं महाघोररावा भगमालिनि चेति च ॥
तद्वच्छिवारूपिणी च ज्वालामालिनि ङेन्तवत् ।
इमं बलिमिति स्थाप्य प्रयच्छामि सकृद्वदेत् ॥
गृह्ण द्वंद्वं खाद युगं मम सिद्धिमितीति च ।
कुरु युग्मं समुद्धृत्य मम शत्रूनथोच्चरेत् ॥
नाशयेति युगं प्रोच्य मारयेति तथैव च ।
स्तंभयोच्चाटय हन विध्वंसय तथापि च ॥
विद्रावय पच छिंधि शोषय त्रासय त्रुट ।
मोहयोन्मूलय तथा भस्मीकुरु तथैव च ॥
जंृभय स्फोटय तथा मथ विद्रावयेति च ।
हर विक्षोभय तुरु दम मर्द्दय पातय ॥
चतुर्व्विंशतिकस्यास्य युगं युगमुदीरयेत् ।
तत उच्चारयेदेतत्सर्व्वभूतभयंकरि ।

ततः सर्व्वजनेत्युक्त्वा मनोहारिणि चोद्धरेत् ।
सर्व्वशत्रुक्षयं प्रोच्य करिशब्दं विनिर्द्दिशेत् ॥
ज्वलयुग्मं प्रज्वलयुगं शिवारूपधरेति च ।
काली कपाली संवोध्या महाकापालि चेति च ॥
ह्रीं युग्मं ह्रं च युगलं प्रासादयुगलं तथा ।
राज्यं मे समनूद्धृत्य देहि युग्ममथो वदेत् ॥
किलियुग्माच्च चामुण्डे यमघण्टह्लिर्य्युगात् ।
मम सर्व्वाभीष्टपदं ततो वै साधयद्वयम् ॥
संहारिणिपदं दत्वा संमोहिनिपदं ततः ।
कुरुकुल्लेति [११ ख] संवोध्य ततः किरियुगं पठेत् ॥
क्रोधयुग्मास्त्रयुग्मं च शिरोन्तो मनुरीरितः ।
त्रिरुच्चार्य्योत्सृजेदन्नं पललं शाकुनं च यत् ॥
कालीरूपा स्तुता ध्यायेदेवमेव न संशयः ।
ततोऽपसृत्य तत्स्थानात्किञ्चिद्दूरे व्रजेत वै ॥
यथागच्छन्ति ताः सर्व्वा न विभ्यति तथा चरेत् ।
दूरे स्थित्वा निरीक्षेत किमादौ भक्षयन्ति ताः ॥
सर्व्वा आगत्य चेत्सर्व्वमश्नन्ति दयिते तदा ।
सर्व्वसिद्धिं विजानीयाद्राज्यलाभं तथैव च ॥
यद्यच्च भक्षयन्त्येतास्तत्तत्फलमवाप्नुयात् ।
यद्यच्च नैव खादन्ति तत्तन्नैव फलं भवेत् ॥
विशेषञ्च प्रवक्ष्यामि श्रुत्वा तदवधारय ।
अन्नेन धनलाभः स्यात्पायसैर्व्वाग्मिता भवेत् ॥
घृतेनायुरवाप्नोति पूपैः पुण्यमवाप्नुयात् ।
शष्कुलीमोदकैः कीर्त्तिं वाहनं कृशरैरपि ॥

तेमनैः पुत्रलाभः स्यान्मत्स्यैराप्नोति कामिनीम् ।
आममांसाच्च या सिद्धिस्तदपि व्याहरामि ते ॥
वाराहेणार्थलाभः स्याद् भाल्लूकेन गृहस्य च ।
प्लावंगमेन विद्या स्यात्खाङ्गकैर्विजयं रणे ॥
माहिषेणैव मांसेन राज्यप्राप्तिर्भवेद् ध्रुवम् ।
गौधेनापत्यमाप्नोति शाल्यैः सौन्दर्य्यमुत्तमम् ॥
आरोग्यं हारिणेनाशु कार्ष्णसारैर्बलोन्नतिम् ।
ज्ञातिश्रैष्ठ्यं राङ्कवैश्च गावयै राजमान्यताम् ॥
शाशैर्म्मेधावितां गच्छेदाजैरजरतां व्रजेत् ।
आवेयेन तु मांसेन सर्व्वकल्याणमाप्नुयात् ॥
वह्निनञ्चापि नाक्रेण भूमिप्राप्तिस्तु कामठैः ।
ग्राहेणाभेद्यतनुतां नाकुलैर्म्महतीं श्रियम् ॥
अष्टादशानां मांसानां फलं ते कथितं मया ।
[१२ क] अतः परं प्रवक्ष्यामि पक्षिमांसफलं महत् ॥
वार्ध्रीनसे राज्यफलं कापोते मोक्षमव्ययम् ।
पारावते राजकन्यामौलूके रिपुसंक्षयम् ॥
शत्रुवाक्स्तम्भनं श्यैने खाञ्जनेऽदृश्यरूपताम् ।
चाषेऽणिमपदप्राप्तिः काङ्के खेचरतां व्रजेत् ॥
कौररे वशकारित्वं पैके चाकर्षणं भवेत् ।
कौक्कुटे द्रावणं सिद्ध्येच् चाटके मोहनं तथा ॥
कालिङ्गे स्तम्भनं विन्देदुच्चाटं काकमांसके ।
दात्यूहे मारणं गच्छेच्चातके द्वेषणं तथा ॥
शोषणं जायते गार्द्धे चैल्ले मूर्च्छनमेव च ।
शौके च क्षोभणं दिश्येत्क्रौञ्चे चोन्मादमेव च ॥

काङ्के चाञ्जनलाभः स्यात्खड्गसिद्धिश्च बार्हिणे ।
भूताः प्रेताः पिशाचाश्च वेताला गुह्यकास्तथा ॥
विनायकाः क्षेत्रपाला यक्षा राक्षसजातयः ।
गन्धर्व्वाश्च तथा नागा डाकिन्यो घोणका अपि ॥
विद्याधराश्च सर्पाश्च तथैवाप्सरसां गणाः ।
सर्व्वे भवन्ति वशगास्तैत्तिरे पलले प्रिये ॥
हांसे तु पादुकासिद्धिर्य्यक्षिण्यश्चाक्रवाकके ।
सारसे धातुवादः स्याच्चाकोरे गुटिका प्रिये ॥
टैट्टिभे चिरजीवित्वं लावेऽन्तर्द्धानमाप्नुयात् ।
हारीते कामरूपित्वं सत्यं प्राप्नोति भामिनि ॥
कारण्डवे जलस्तम्भं वह्निस्तम्भं च वर्त्तके ।
शातपत्रे स्वर्गगतिं प्राप्नुयान्नात्र संशयः ॥
शापानुग्रहसामर्थ्य माद्गवेनैव विन्दति ।
भारद्वाजेन मांसेन चक्रवर्त्तित्वमाप्नुयात् ॥
नारं मांसं न दातव्यं ब्राह्मणेन कदाचन ।
शूद्रेणैव प्रदातव्यं सप्तत्रिंशत्तमं हि तत् ॥
तस्य [१२ ख] प्रदानाद्देवेशि साधकः पष्टिसिद्धिभाक् ।
तवैतत्कथितं कान्ते मांसदानफलं महत् ॥
शिवास्तु नावमन्तव्या देवीरूपा हि ता यतः ।
फेरुरूपं हि धृत्वा सा स्वयमायाति कालिका ॥
कालीभावेन ता ध्येयाः सत्यं सत्यं हि भामिनि ।
यदि नायान्ति ताः सर्व्वास्तदा विघ्नः प्रजायते ॥
भक्षयन्ति न चेत्तास्तु तदैव मरणं भवेत् ।
तस्मात्सर्व्वप्रयत्नेन पूर्व्वमेव परीक्षयेत् ॥

आयान्ति वाथ नायान्ति श्मशाने वाथ निर्जने ।
शिवासु भक्षयन्तीषु भूतेभ्यो बलिमाहरेत् ॥
संहारभैरवायापि क्षेत्रपालेभ्य एव च ।
डाकिनीभ्यश्च सर्वाभ्यो बलिं दद्याच्च साधकः ॥
महदैश्वर्य्यमाप्नोति निःशेषं भक्षयन्ति चेत् ।
अर्द्धे तु स्वल्पसिद्धिः स्यादभोज्ये तु विपद् भवेत् ॥
अनागमे तु मरणं तस्माद्यत्नेन साधयेत् ।
प्रत्यष्टम्यां चतुर्द्दश्यामेवं कुर्व्वीत साधकः ॥
सार्द्धाब्दमध्ये सिद्धचेत वारे षट्त्रिंशके प्रिये ।
शिवाबलिरयं प्रोक्तो महाफलमहोदयः ॥
एतस्य फलबाहुल्यं कथितुं नैव शक्यते ।
विद्यावान्बलवान्वाग्मी चिरजीवी निरामयः ॥
धार्म्मिको विजयी दक्षो यशस्वी भूपवल्लभः ।
ज्ञातिश्रेष्ठः पुत्रवांश्च सर्व्वयोषितिप्रियः सुखी ॥
रूपवान्बलवान्धीरो विक्रान्तो विश्वपूजितः ।
स धन्यः सर्वविच्चैव भवत्यत्र न संशयः ॥
सौन्दर्य्ये मन्मथः साक्षाद् बलेऽपि स्यात्समीरणः ।
रामार्ज्जुनसमो युद्धे विद्यायां गीष्पतिर्य्यथा ॥
धने कुवेरसदृशो चिरायुर्व्यासरामवत् ।
क्ष[१३ क]मायां पृथिवीतुल्यो गाम्भीर्य्ये सागरो यथा ॥
मेरुकैलासवद्धैर्य्ये प्रभुत्वे वासवोपमः ।
लावण्ये चन्द्रतुल्योऽसौ प्रतापे भास्करोपमः ॥
तडिद्वद्दुर्न्निरीक्ष्योऽसौ भवेद्देव्याः प्रसादतः ।
यावत्यः सिद्धयः सन्ति समस्तजगतीतले ॥

करामलकवत्सर्व्वा भवन्त्येव न संशयः ।
अन्या अपि प्रसिद्ध्यन्ति सिद्धयः साधकस्य तु ॥
अणिमा खेचरत्वञ्च कामरूपित्वमिच्छया ।
शापानुग्रहसामर्थ्यं त्रैलोक्यवशता तथा ॥
कृपाणाञ्जनसिद्धिश्च वेतालगुटिकादि च ।
यक्षिणीधातुवादश्च स्तम्भोऽनलखगाम्बुनाम् ॥
अव्याहतगतित्वञ्च सर्वाकर्षणमोहनम् ।
मेरुमन्दरकैलासस्वर्गादिगमनं तथा ॥
सर्व्वं साधयति क्षिप्रं शिवाबलिविधानतः ।
आरोग्यं मनसः सौख्यं विजयोऽबाधता तथा ॥
अविघ्नता दुःखनाशः पुत्रलाभः सुखोन्नतिः ।
सर्वकल्याणवाञ्छाप्तिर्भयनाशो महोदयः ॥
नानारोगादिनाशश्च बलिदानात्प्रजायते ।
बलिदानस्य माहात्म्यं कथयिष्ये कियत्तव ॥
स्वल्पमेव मया प्रोक्तं बहु वक्तुं न शक्यते ।
इतोऽपि फलबाहुल्यं सत्यं सत्यं हि पार्व्वति ॥
दण्डवत्प्रणमेत्तास्तु ततो वै देवनाधिया ।
स्तुतिं कुर्य्यात्स्तवैरेतैः कवचैश्च विशेषतः ॥
शिवारूपधरे देवि कामकालि नमोऽस्तु ते ।
उल्कामुखि ललज्जिह्वे घोररावे शृगालिनि ॥
श्मशानवासिनि प्रेते शवमांसप्रियेऽनघे ।
अरण्यचारिणि शिवे फेरो जंबुकरू[१३ ख]पिणि ॥
नमोऽस्तु ते महामाये जगत्तारिणि कालिके ।
मातङ्गि कुक्कुटे रौद्रि कालकालि नमोऽस्तु ते ॥

सर्वसिद्धिप्रदे देवि भयंकरि भयावहे ।
प्रसन्ना भव देवेशि मम भक्तस्य कालिके ।।
संसारतारिणि जये जय सर्वशुभंकरि ।
विस्रस्तचिकुरे चण्डे चामुण्डे मुण्डमालिनि ।।
संहारकारिणि क्रुद्धे सर्व्वसिद्धिं प्रयच्छ मे ।
दुर्गे किराति शवरि प्रेतासनगतेऽभये ।।
अनुग्रहं कुरु सदा कृपया मां विलोकय ।
राज्यं प्रयच्छ विकटे वित्तमायुः सुतान् स्त्रियम् ।।
शिवाबलिविधानेन प्रसन्ना भव फेरवे।
नमस्तेऽस्तु नमस्तेऽस्तु नमस्तेऽस्तु नमोनमः ।।
इत्येतैरष्टभिः श्लोकैः शिवास्तोत्रमुदीरयेत् ।
ततस्तच्छेषमन्नं यद्भाजनं वान्यदेव वा ।।
सर्वं हि निखनेद् भूमौ प्रयत्नेनैव पार्व्वति ।
यदि काका मृगाः श्वानो ये चान्येऽरण्यवासिनः ।।
भक्षयन्ति तदुच्छिष्टं तदा विघ्नः प्रजायते ।
स्वयं तदवशिष्टं यत्प्रसादमुपयोजयेत् ।।
गन्धं माल्यं च नैवेद्यं यद्यद्देव्यै प्रकल्पितम् ।
रात्रावेव समागच्छेत् प्रयतः प्रेतमन्दिरात् ।।
एष मुख्यः प्रयोगस्तु गुह्यकाल्या वरानने ।
एतत्प्रयोगादेषैव काली कामकला भवेत् ।।
न भेदस्त्वनयोः सत्यं प्रयोगे मन्त्रसिद्धये ।
अन्येऽपि भेदाः सन्त्यस्याः कथयिष्यामि तानहम् ।।
एष कामकलाकाल्या मन्त्रः प्रकृतिरुच्यते ।
विकृतिर्गुह्यकाल्यास्तु मन्त्रो यः षोडशाक्षरः ।।

स्थितायां प्रकृतौ देवि वि[१४ क]कृतिर्न बलीयसी ।
सप्तानामेव मन्त्राणामयमेवाग्रणीः प्रिये ॥
त्रैलोक्याकर्षणो मन्त्रो यदि भाग्येन लभ्यते ।
तदा शिवाविधाने तु स एव परिनिष्ठितः ॥
अभावे तस्य मन्त्रस्य गुह्यकाल्या मनुर्मतः ।
विनोपदेशं यः कुर्य्यात् प्रयोगं कामकालिकम् ॥
सद्यः स मृत्युमाप्नोति भक्षितो योगिनीगणैः ।
ग्राह्यस्तस्मात्प्रयत्नेन मनुरष्टादशाक्षरः ॥
राज्यदानैः प्राणदानैरुपदेशो गुरोः प्रिये ।
आत्मनः क्षेममन्विच्छेद्यदि साधकसत्तम. ॥
न तु वा गुह्यकाल्यास्तु मनुनैवाखिलं भवेत् ।
गुरूपदिष्टमार्गेण प्रयोगेण वरानने ॥
इत्येष कथितो यत्नाच्छिवाबलिविधिस्तव ।
कथयस्व महागौरि किमन्यच्छ्रोतुमिच्छसि ॥

इत्यादिनाथविरचितायां महाकालसंहितायां शिवाबलिप्रयोगो नाम
द्विशताधिकचतुश्चत्वारिंशः पटलः ॥४॥

देव्युवाच ॥

विश्वोपकारक विभो शंभो संसारतारक ।
त्वत्तः श्रुतमिदं सर्वं श्रुत्वा चैवावधारितम् ॥
केन कामकलानाम प्राप्तवत्यम्बिका परम् ।
तदहं श्रोतुमिच्छामि त्वत्तो योगिजनप्रिय ॥
प्रयोगेणार्च्चया वापि ध्यानेनाथ स्तवेन वा ।
प्रोच्यते सापरा शक्तिः काली कामकलाह्वया ॥

शृण्वन्ती ते मुखाम्भोजान्न तृप्तिमधियाम्यहम् ।
कथयस्व महादेव प्रयोगं कामकालिकम् ॥

श्री महाकाल उवाच ॥

अतिगुह्यतमं देवि प्रयोगं पृष्टवत्यसि ।
नाख्यातो योऽद्यपर्य्यन्तं कस्मा अपि व[१४ ख]रानने ॥
तमहं कथयिष्यामि यतो भक्तासि पार्वति ।
संगोपनीयो यत्नेन न वाच्यो यस्य कस्यचित् ॥
चिकीर्षयापि यस्यास्य सिद्धिं विन्दति साधकः ।
किं पुनः करणेनेह भविष्यति शुचिस्मिते ॥
प्राणात्ययेनापि पुनर्न्न वाच्यं यत्र कुत्रचित् ।
स्मरणादस्य योगस्य प्रसन्ना कालिका भवेत् ॥
किं बहूक्तेन देवेशि धन्यावावां जगत्त्रये ।
यतः पृच्छसि वक्तास्मि प्रयोगं कामकालिकं ॥
नैवास्ति त्वय्यकथ्यं मे गुह्याद् गुह्यतरं हि यत् ।
शृणुष्व तं योगवरं भक्तियुक्तेन चेतसा ॥
अवहेला न कर्तव्या न जुगुप्सा कदाचन ।
न निन्दा न परीवादो न द्वेषो नैव धिक्कृतिः ॥
कृते तु सर्वनाशः स्यान्मरणं रोगपूर्णता ।
दारिद्रयं पुत्रनाशश्च वन्धनं निगडादिभिः ॥
तस्मान्निन्दा न कर्तव्या यदीच्छेदात्मनः शुभम् ।
स्वभाव एव देव्यास्तु प्रीतिरेतत्प्रयोगतः ॥
राजाज्ञेवाप्रणोद्येयं सैव ब्रूते सनातनी ।
प्रयोगस्त्रिविधोऽयं च शक्याशक्यनिबन्धनः ॥

राजपूर्व्वो मध्यपूर्व्वो लघुपूर्व्वस्तथैव च ।
योगः कामकलाख्योऽयं तत्रादिं व्याहरामि ते ॥
रामाः षोडशवर्षीया रूपयौवनगर्विताः ।
विशाललोचनाः श्यामाः शारदेन्दुनिभाननाः ॥
घनकुन्तलभारिण्यः पीनोत्तुंगकुचोन्नताः ।
विशालजघनाभोगा अतिक्षीणकटिस्थलाः ॥
वृहन्नितम्बदृषदो जातरूपतनुश्रियः ।
पीनोरवः कान्तिमत्यः सर्व्वाभरणभूषिताः ॥
भिन्नजातीयकाः सर्व्वा नारीराकारयेत्सुधीः ।
[१५क] ब्राह्मणी क्षत्रिया वैश्या शूद्रा दासी नटी तथा ॥
मालाकारिणिका चापि कुम्भकारिणिका तथा ।
सौचिकी च कुविन्दी च तन्तुवाय्यसिमार्जिजका ॥
रजकी चर्म्मकारस्त्री तथायःकारिका प्रिये ।
शौण्डिकी नापिती त्वाष्ट्री कलादी काम्बरी तथा ॥
कैवर्ती सौल्विकी तैलकारिणी मागधी तथा ।
वेश्या कुमारी च तथा तथाभीरा च पुंश्चली ॥
सौरिंध्री दूतिका रण्डा प्रतिवेशनिकापि च ।
स्वजाया जीवनी चैव चतुस्त्रिंशच्च वारुडी ॥
चाण्डाली राजकन्या च षट्त्रिंशदिति ताः स्मृताः ।
पुष्पवासिततैलेन समभ्यक्ता वराननाः ॥
प्रसाधिताः स्नापयेत्तास्तोयैः कर्पूरवासितैः ।
उच्चरन्मन्त्रमेतं हि सकृत्सकृदुदारधीः ॥
प्रणवं च त्रपाकामौ ततो भगवति स्मरेत् ।
महामाये पदं प्रोच्य ततोऽनङ्गपदं वदेत् ॥

वेगसाहसिनि स्मृत्वा मनो सर्व्वजनात् परम् ।
तारिणीति समुद्धृत्य ततः सर्व्ववशंकरि ॥
मोहयेति पदद्वन्द्वं प्रमोदय ततस्तथा ।
एह्यागच्छेति नामापि संबोध्य प्रवदेत् सुधीः ॥
सान्निध्यं च कुरु द्वन्द्वं युगं च कवचास्त्रयोः ।
स्वाहान्तोऽयं महामन्त्रः प्रशस्तः स्नापने प्रिये ॥
ततः प्रदद्याद्वसनं सर्व्वाभ्यश्च पृथक् पृथक् ।
भिन्नो भिन्नो मनुः प्रोक्तः सर्व्वस्मिन्नपि कर्म्मणि ॥
वस्त्रदानस्य मन्त्रञ्च गदतो मे निशामय ।
लज्जाकामवधूनां च युगं युगमनुस्मरेत् ॥
त्रैलोक्याकर्षणीत्युक्त्वा [१५ ख] वस्त्रं गृह्ण युगं वदेत् ।
फडन्ते वह्निजाया च प्रोक्तो वस्त्रार्पणे मनुः ॥
साटी क्षौमदुकूलादि पट्टवस्त्रं विशेषतः ।
अन्यद्यद्यच्च भवति महामूल्यवदंशुकम् ॥
ततोऽर्पयेत्कज्जलञ्च वक्ष्यमाणमनुं वदन् ।
तारं क्रोधं समुद्धृत्य महाघोरतरे वदेत् ॥
फेत्काररराविणीत्युक्त्वा महामांसप्रियेति च ।
प्रणवास्यवधूकाममायारुट्कमलार्णकान् ॥
पिशाचराक्षसानुक्त्वा गुप्तयुग्मं समुच्चरेत् ।
मम जाड्यमिति प्रोच्य छेदय त्रितयं तथा ॥
वेदसंख्यं ततो भौतं प्रासादमिथुनं ततः ।
शत्रून्पूर्व्वं समुद्धृत्य ममशब्दं दहद्वयम् ॥
उच्छादय स्तम्भयापि विध्वंसय युगं युगम् ।
सर्व्वग्रहेभ्य इत्युक्त्वा शान्तिं कुरु ततो वदेत् ॥

रक्षां कुरु तथा चोक्त्वा वाग्भवं त्रितयं स्मरेत् ।
फडन्ते ठद्वयं चापि सिन्दूरार्पणको मनुः ॥
अलक्तकार्प्पणं मन्त्रं प्रयत्नेनाशु मे शृणु ।
मारयुग्मं पुरः प्रोच्य नवकोटिपदं वदेत् ॥
योगिनीति ततः पश्चाद् ङेन्तं परिवृता तथा ।
रोपद्वयान्नाम ङेन्तं ततोऽनङ्गपदं प्रिये ॥
वेगमालाकुला ङेन्ता मायायुग्मं ततः परम् ।
ङेन्तं ततो वदेत्कान्ते स्वयंभूः कुसुमप्रिया ॥
इमं पूर्व्वमलक्तं च त्रपाप्रासादयोर्युगम् ।
सुवासिनीति ङेन्तवन्निवेदयामि चेत्यपि ।
नमः शिरोन्तमुच्चकैरयं मनुः प्रकीर्तितः ॥
समर्हणैकमन्दिरे विरच्य तत्र मण्डलम् ।
सितं हि पूर्व्वदिग्गतं तथारुणं च वह्निगम् ॥
[क ६१] परेतगं च मेचकं सुवीतिवच्च नैर्ऋतम् ।
प्रचेतसं च पाटलं समीरगं च हारितम् ॥
कुवेरगं च पिङ्गलं गिरीशगं हि धूमलम् ।
विधाय हीदृशं प्रिये दिगष्टशोभि मण्डलम् ॥
युगाख्यनिर्गमान्वितं तदीयपालसंयुतम् ।
विभिन्नरूपमण्डले निवेशयेत्तु ताः क्रमात् ॥
ऋषित्रिसंख्यमण्डलक्रमेण दीर्घपक्तिगम् ।
ततोऽष्टसोमसंख्यकैर्निवेश्य मण्डले स्त्रियः ॥
नवेन्दुसंख्यके प्रिये विरच्य मूलमण्डलम् ।
पुरोक्तयन्त्रमुत्तमं निवेश्य पूजनञ्चरेत् ॥
ततोऽनु तत्र कामिनीस्तदोपवेशयेत् क्रमात् ।

सरोषह्लीरमास्मरैः सवाग्भवैश्च मण्डले ॥
उपानुगं विशोच्चरेत् पुनस्तथैव चोद्धरेत् ।
सुसन्निधिं कुरु त्विदं भवेच्च वारयुग्मकम् ॥
ततोऽनलाङ्गनायुतो मनुः सदोपवेशने ।
गजेन्द्रतः परा प्रिये स्मृतं हि काममण्डलम् ॥
तदेव कामकालिकं सदैव मुख्यमुच्यते ।
तत्र कामकलानाम्नि मण्डले जगदम्बिकाम् ॥
आवाहयेज्जगद्धात्रीं वक्ष्यमाणमनुं वदन् ।
प्रणवं नारसिंहस्य पञ्चकं समनुच्चरेत् ॥
एह्येहीति पदं न्यस्य परमातत्त्वमुच्चरेत् ।
रूपिणीत्यपि चोद्धृत्य ततो भगवति स्मरेत् ॥
सम्बोधनतया नाम ततो भूतार्णपञ्चकम् ।
सन्निधिं च कुरु द्वन्द्वं क्रोधद्वन्द्वं ततोऽप्यनु ॥
अस्त्रद्वयादनु स्वाहा प्रोक्तो ह्यावाहने मनुः ।
इत्यावाह्य महापीठे सांनिध्यं परिकल्प्य च ॥
ततोऽनुज्ञां प्रार्थयीत सर्व्वासामपि पूजने ।
कलातीते नादबिन्दुशक्तिरूपिणि चिन्मये ॥ [१६ ख]
पराकुण्डलिनीरूपे शिवशक्तिस्वरूपिणि ।
देवि कामकलाकालि जगदुत्पत्तिकारिणि ॥
स्थितिकारिणि कल्पान्ते पुनः संहारकारिणि ।
परामृतरसास्वादपरमानन्दलोलुपे ॥
सदाशिवमहत्तत्त्वसामरस्यस्वरूपिणि ।
देवि कामकलाकालि सर्व्वसिद्धिप्रदेऽनघे ॥
अनुज्ञां देहि मे देवि प्रयोगे कामकालिके ।

इत्यनुज्ञां ततो लब्ध्वा क्रमात्पूर्व्वादितः सुधीः ॥
पूजयेन्मण्डलस्थास्ता उपचारैर्य्यथोदितैः ।
जातिहीना इति ज्ञात्वा नावमान्याः कथञ्चन ॥
देवीधिया प्रपश्येत्ता इत्यागमविदो विदुः ।
पाद्यार्घाचमनीयाद्यैरन्यद्यच्चोपकल्पितम् ॥
पूर्व्वोक्तेन विधानेन मन्त्रैरपि च तैः प्रिये ।
कर्तव्या विधिवत्पूजा यथा तास्तोषमाप्नुयुः ॥
ऊर्नविंशे मण्डले तु यजेद्देवीं प्रसन्नधीः ।
नित्यपूजोक्तविधिना सर्व्वसम्भारसञ्चयैः ॥
षडङ्गानि प्रविन्यस्य पीठन्यासं समाचरेत् ।
महामण्डूककालाग्निरुद्रञ्च कच्छपं तथा ॥
आधारे लिंगनाभौ च क्रमेणोपन्यसेत्सुधीः ।
एवं विचिन्त्य विधिवद्धर्म्मादीन् विन्यसेत्ततः ॥
अंसोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन देशिकः ।
धर्म्मज्ञानं सवैराग्यमैश्वर्य्यं विन्यसेत् क्रमात् ॥
मुखपार्श्वनाभिपार्श्वेष्वधर्म्मादीन्प्रकल्पयेत् ।
अनन्तं हृदये पद्ममस्मिन्सूर्य्येन्दुपावकान् ॥
एषु स्वस्वकला न्यस्येन्नामाद्यक्षरपूर्व्विकाः ।
सत्त्वादींस्त्रीन् गुणान् न्यस्येत्तथैवात्र गुरूत्तमः ॥
आत्मानमन्तरात्मानं परमात्मानमेव च ।
ज्ञानात्मानं प्रविन्यस्य न्यसेत्पीठमनु ततः ॥
एवं देहमये पीठे चिन्तयेदिष्टदेवताम् ।
पूर्व्वोक्तेन विधानेन मनसा परिपूजयेत् ॥
मुद्रां प्रदर्श्य विधिना शङ्खस्थापनमाचरेत् ।

शङ्खमन्त्रेण संप्रोक्ष्य वामतो वह्निमण्डले ॥
साधारं स्थापयेद्विद्वान् व्युत्क्रमार्णैर्ज्जलं क्षिपेत् ।
पूजयेद्वह्निसूर्य्येन्दून् बीजैस्तत्तत्कलान्वितैः ॥
तत्तत्कला तु संख्याता दशद्वादशषोडशैः ।
तीर्थावाहनमन्त्रैश्च तीर्थान्यावाह्य पूजयेत् ॥
गन्धपुष्पाक्षतैर्द्धूपदीपाद्यैरभिपूजिते ।
शङ्खे पाणितलं दत्त्वा चाष्टधा प्रजपेन्मनुम् ॥
चिन्मयञ्चिन्तयेत्तीर्थमानीयाङ्कुशमुद्रया ।
अस्त्रमन्त्रेण रक्षित्वा कवचेनावगुण्ठ्य च ॥
धेनुमुद्रां समासाद्य बोधयेत्तत्त्वमुद्रया ।
दक्षिणे प्रोक्षणीपात्रमाधायाद्भिः प्रपूजयेत् ॥
किञ्चिदर्घ्याम्बु संगृह्य प्रोक्षण्यंभसि योजयेत् ।
अर्घस्योत्तरतः कार्य्यं पाद्यमाचमनीयकम् ॥
परमीकृत्य तं शङ्खं पावनं परिचिन्तयेत् ।
देवस्य मूर्द्धनि तत्किञ्चित्पूजाद्रव्येषु चात्मनः ॥
अवेक्षणं प्रोक्षणं च वीक्षणं ताडनं तथा ।
अर्च्चनञ्चैव सर्व्वेषां पावनं सम्प्रकल्पयेत् ॥
अर्घपात्रे प्रदातव्या गन्धपुष्पयवाक्षताः ।
कुशाग्रतिलदूर्व्वाश्च सर्षपाश्चार्थसिद्धये ॥
पाद्यपात्रे प्रदातव्यं श्यामाकं कूर्च्चमेव च ।
अब्जञ्च विष्णुक्रान्ताञ्च पाद्यसिद्ध्यै प्रकल्पयेत् ॥
तथाचमनपात्रे च दद्याज्जातीफलं पुनः ।
लवङ्ग [१७ ख] मपि कक्कोलं शस्तमाचमनीयकम् ॥
दध्ना च मधुसर्पिर्भ्यां मधुपर्को भविष्यति ।

बाह्यपूजां ततो कुर्य्यादैहिकाभ्युदयाय वै ॥
पूर्व्वमेवोदितं देवि मण्डलस्य प्रकल्पनम् ।
तथापि फलबाहुल्यात्प्रसङ्गाद्उच्यते पुनः ॥
गोमयैर्ल्लिप्तदेशे च मण्डलं तत्र कारयेत् ।
शालितण्डुलचूर्णैश्च नीलपीतसितासितैः ॥
लिखेदष्टदलं पद्मं चतुरस्रसमावृतम् ।
नवकोणं कर्णिकायां कोणाग्रं बीजभूषितम् ॥
कूर्म्मञ्च वृहदाकारं महामण्डूकमेव च ।
कालाग्निसंज्ञकं रुद्रं तस्मिन्पीठे प्रपूजयेत् ॥
तन्मध्ये साध्यमालिख्य कालीबीजानि संलिखेत् ।
सर्व्वतो मण्डलं चापि गायत्र्याः परिवेष्टयेत् ॥
गायत्रीञ्च प्रवक्ष्यामि यथावदवधारय ।
जपादस्याश्च दयिते राजसूयफलं लभेत् ॥
अनङ्गाकुलायै विद्महे मदनातुरायै धीमहि ।
तन्नः कामकलाकाली प्रचोदयात् ॥
गुरुपङ्क्ति नमेद्वामे गणेशादीन् परे तथा ।
मध्ये त्वाधारशक्तिञ्च पंकजद्वयधारिणीम् ॥
कूर्म्मञ्च वृहदाकारं महामण्डूकमेव च ।
कालाग्निसंज्ञकं रुद्रं तस्मिन्पीठे प्रपूजयेत् ॥
अभ्यर्च्चयेद्वसुमतीं स्फुरत्सागरमेखलाम् ।
तत्र रत्नमयं द्वीपं तस्मिंस्तु मणिमण्डपम् ॥
यजेत्कल्पतरुं तस्मिन्साधकोऽभीष्टसिद्धये ।
अधस्तात्पूजयेत्तस्य वेदिकां मण्डलोज्वलाम् ॥
पश्चादभ्यर्च्चयेत्तस्यां पीठे धर्म्मादिभिः पुनः ।

रक्तश्यामहरिच्छुक्लनीलाभां ना [८१ क] दरूपिणीम् ॥
वृषकेशरिभूतेन रूपान् धर्म्मादिकान् यजेत् ।
अग्न्यादिषु विदिक्ष्वेवं धर्म्मादीन्पूजयेत् सदा ॥
अधर्म्मादीन् यजेत्पश्चात्पूर्व्वादिदिक्चतुष्टये ।
आनन्दकन्दं प्रथमं संविन्नालमनन्तरम् ॥
मन्त्री प्रकृतिपत्राणि विकारमयकेशरान् ।
पञ्चाशद्वर्णबीजाढ्यां कर्णिकां पूजयेत्ततः ॥
कलाभिः पूजयेत्सार्द्धं तस्मिन्सूर्य्येन्दुपावकान् ।
प्रणवस्य त्रिभिर्वर्णैरथ सत्त्वादिकान् गुणान् ॥
आत्मानमन्तरात्मानं परमात्मानमेव च ।
ज्ञानात्मानञ्च त्रिविधं पीठशक्तिं यजेत्पुनः ॥
तत्र पीठमनुं प्रोक्त्वा तत्र सिंहासनं न्यसेत् ।
उच्चरन्मूलमन्त्रं हि देवीं हृदि विचिन्तयन् ॥
करकच्छपिकारूपमुद्रया पुष्पमुत्तमम् ।
गृहीत्वा चिन्तयेद्देवीं तत्तान्मन्त्रानुसारतः ॥
तन्मध्ये चिन्तयेद्देव्या वाहनं शवमेव च ।
श्मशानं चिन्तयेत्तत्र शिवागणविराजितम् ॥
मुण्डाट्टहाससंयुक्तं शिवाशतनिनादितम् ।
शिवाभिर्बहुमांसास्थिमोदमानाभिरन्विताम् ॥
सुरासुरमुनीन्द्रैश्च योगिवृन्दैर्न्निषेविताम् ।
ध्यायेत्तत्रस्थितां देवीं कालीङ्कामकलाभिधाम् ॥
ध्यात्वा पूर्व्वोक्तविधिना चित्ते चानीय सुन्दरि ।
अञ्जल्यावाहयेत्तत्र देवीं साधकसत्तमः ॥
स्वागतादि ततः प्रश्नं प्रत्युत्तरसमन्वितम् ।

ततश्च आसनन्दत्वा पाद्यमर्घ्यं प्रकल्पयेत् ॥
तत आचमनीयञ्च स्नानोद्वर्त्तनमेव च
स्नानीयञ्च जलं दद्या[१८ ख]त्स्वाहामन्त्रैः प्रयत्नतः ॥
दिव्यवस्त्रन्ततो दत्वा दद्यादाभरणानि च ।
नमः पाद्यं तथा चार्घ्यं स्वाहान्ते दीयते ततः ॥
आचमनं स्वधान्ते च स्वाहान्ते च तथा मधु ।
गन्धन्नानाविधं रम्यं रक्तचन्दनमेव च ।
सिन्दूरङ्कुङ्कुमञ्चैव पुष्पदाम तथा पुनः ।
परिवारन्ततो देव्याः पूजयेत्साधकोत्तमः ॥
ततोगुग्गुलजं धूपं दद्यान्मन्त्रं समुच्चरन् ।
तद्वद्दीपः प्रदातव्यो मन्त्रोच्चारण पूर्व्वकम् ॥
ततः पाद्यादिकन्दत्वा नैवेद्यादीन्प्रकल्पयेत् ।
अन्नपानञ्च नैवेद्यं वलिदानन्तथैव च ॥
रक्तं मांसं मनोरम्यं मामं पक्वंपृथक्पृथक् ।
क्रमेण संप्रवक्ष्यामि देव्याः प्रीतिकरम्परं ॥
पञ्चामृतं तथा खण्डं शाल्यन्नं पिष्टकं तथा ।
यवगोधूमजैर्म्मुद्गैः पक्वान्नं परिकल्पयेत् ॥
व्यञ्जनं षड्रसोपेतं घृताक्तं सुमनोहरं ।
फलन्नानाविधं रम्यं परमान्नं तथैव च ॥
द्रव्येण सात्विकेनैवं ब्राह्मणष्पूजयेच्छिवाम् ।
शाल्यन्नमामिषं चैव सुरां माक्षिकसंभवां ॥
तालीञ्च विविधां गौडीं खार्ज्जूरीम्पुष्पसंभवाम् ।
एवं दद्यात्क्षत्रियोपि पैष्टिकीन्न कदाचन ॥
नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु ।

राजन्य वैश्ययोर्द्दानं न द्विजस्य कदाचन ॥
एवं प्रदान मात्रेण हीनायुर्ब्राह्मणो भवेत् ।
शूद्रस्य पैष्टिकीदानं नापरस्य विधीयते ॥
कृष्णसारन्तथा छागं मृगान्नानाविधानपि ।
मेषञ्च महिषं घृष्टिं तथा पञ्चनखानपि ॥
कपो[१६ क]तं टिट्टिभं हंसं चक्रवाकं च लावकम् ।
शरालिं तित्तिरिं मत्स्याः कलविंकं चकोरकम् ॥
अनुक्तं नैव दातव्यं द्विजवर्य्यैः कदाचन ।
सिंहं व्याघ्रन्नरं तद्वत् क्षत्रियः परिकल्पयेत् ॥
विहाय कृष्णसारञ्च क्षत्रियादेर्भवेद्वलिः ।
सिंहं व्याघ्रन्नरं हत्वा ब्राह्मणो ब्रह्महा भवेत् ॥
मूषं मार्ज्जारकं चाषं शूद्रो दत्वा पतत्यधः ।
चन्द्रहासेन खड्गेन हन्यादेक प्रहारतः ॥
उत्थाय हननं कुर्य्यान्नोपविश्य कदाचन ।
स्वहस्तेन पशुं हत्वा पशुयोनिमवाप्नुयात् ॥
विच त्रिपक्षतो न्यूनं महिषादींस्त्रि वर्षतः ।
अन्यं त्रिमासतो न्यूनन्न दद्याच्च कदाचन ॥
वृद्धम्वा विकृताङ्गं वा न कुर्य्याद्वलिकर्म्मणि ।
स्वगात्ररुधिरं दातुं क्षत्रियादे र्भवेद्वलिः ॥
सात्विको जीवहत्यां हि कदाचिदपि नोचरेत् ।
इक्षुदण्डं च कूष्माडं तथा वन्यफलादिकं ॥
क्षीरपिण्डैः शालिचूर्णैः पशुं कृत्वाचरेद्वलिं ।
तत्तत्फल विशेषेण तत्तत्पशुमुपानयेत् ॥
कुष्माण्डं महिषत्वेन छागत्वेन च कर्क्कटीं ।

जातीकोषफलैलात्वप्लवङ्गमृगनाभियुक् ॥
कर्पूरशकलोन्मिश्रं ताम्बूलं कल्पयेत्ततः ।
पातालतलसंभूतं सर्व्वोपस्करसंयुतम् ॥
देवि कामकलाकालि त्वन्ताम्बूलं गृहाण मे ।
इति मन्त्रेण सततं ताम्बूलं विनिवेदयेत् ॥
ततस्तद्विधिना सम्यक् जपेन्मन्त्रमनन्यधीः ।
सन्तोष्य युवतीं रम्यां प्रजपेत्साधकोत्तमैः ॥
स्वयोषां प[१६ ख]रयोषां वा नैवाकृष्य द्विजोजपेत् ।
लोभाद्यदि चरेदेव मधोयाति द्विजस्तदा ॥
इहामुत्र फलं नास्ति हीनायुरपि जायते ।
देवत्यागान्मद्यपानाच्छूद्रभार्य्याप्रयोगतः ॥
तत्क्षणाज्जायते वामो ब्राह्मणो नात्र संशयः ।
स्वकीयाम्परकीयां वा सामान्य वनितान्तथा ॥
जपेयुस्तां समाकृष्य क्षप्रविद् छूद्रजातयः ।
ऋषिकन्यां न चाकर्षेन्मद्यपानां च कन्यकां ॥
अन्त्यजानां स्त्रियं वापि व्रतस्थानां स्त्रियन्तथा ।
गुर्व्वङ्गनां गुरोः पत्नीं सगोत्रां शरणागतां ॥
शिष्ययोषां न चाकर्षेत्पापिनां वनितान्तथा ।
नापुष्पितां गुर्व्विणीम्वा वालापत्यान्तथा पुनः ॥
साधुशीलां सुभव्यां च समाकृष्याच्चर्चनं चरेत् ।
पूजा काले च देवेशि विकारं वर्ज्जयेत्सदा ॥
विकारात्सिद्धिहानिः स्यात्साधकस्य न संशयः ।
जपं समर्प्पयेत्तस्यै मन्त्रोच्चारणपूर्व्वकम् ॥
पुष्पांजलित्रयन्दत्वा प्रदक्षिणमथो चरेत् ।

ततश्च स्तोत्रपाठादि कुर्य्यात्साधकसत्तमः ॥
सहस्रनामस्तोत्रं च कवचं चाऽन्वहं पठेत् ।
प्राणायामं षडङ्गञ्च विधाय तदनन्तरम् ।
आत्मानं देवतारूपं विचिन्त्यैनां विसर्ज्जयेत् ॥

इत्यादिनाथ विरचितायां महाकालसंहितायां कामकलाप्रयोगो नाम
द्विशताधिकपञ्चचत्वारिंशः पटलः ॥५॥

श्रीमहाकाल उवाच ।

अथ देवेशि सामान्य प्रयोगान्व्याहरामि ते ।
चिकीर्षयापि येषां हि राज्यं विद्या (२० क) च हस्तगा ।
चतुर्व्विंशतिभिश्चासां मध्यपूर्व्वो भवेद्विधिः ।
पूजामंत्रप्रकारस्तु स एव परिकीर्त्तितः ।
आसां द्वादशभिर्ज्ञेयो लघुपूर्व्वविधिः प्रिये ।
राज्ञामेतत्प्रशस्तं हि न द्विजस्य कदाचन ॥
यथोक्तविधिना चीर्णपौरश्चरणिकक्रमः ।
एतान्प्रयोगान्वीक्षेत नार्जयित्वा कदाचन ॥
पर्व्वते वा नदीकूले शून्यागारे शिवालये ।
पीठे चतुःपथे कुर्य्यात्पुरश्चरणमुत्तमम् ॥
नियमास्तत्र भूयांसः प्रकर्त्तव्याः प्रयत्नतः ।
अवैधकरणात्सिद्धिहानिः स्यान्नात्र संशयः ॥
त्रिकालमाचरेत्स्नानं हविष्यं भक्षयेन्निशि ।
स्वमन्त्रं चाक्षसूत्रञ्च गुरोरपि न दर्शयेत् ॥
त्यजेद्दुष्टप्रवादञ्च परीवादञ्च वर्ज्जयेत् ।

तथा दुर्ज्जनसंसर्गं स्त्रीशूद्रालापनन्तथा ॥
वस्त्रं कुशासनं व्याघ्रचर्म्म चापि नृमुण्डकम् ।
आसनेषु महादेवि प्रशस्तं चोत्तरोत्तरम् ॥
फलस्फटिकरुद्राक्षमुक्तान्रस्थिविनिर्म्मिताम् ।
जपमालां शुभां विद्धि प्रशस्तामुत्तरोत्तराम् ॥
अनेनोक्तविधानेन लक्षसंख्ये जपेन्मनुं ।
होमंदशांशतः कुर्य्यात्तर्प्पणं चाभिषेचनम् ।
ततः सिद्धमनुर्म्मंत्री प्रयोगानाचरेत्प्रिये ।
शताभिजप्तमंत्रेण रोचनातिलके कृते ॥
दासा इव महीपालाः स्वयमायान्तिसन्निधौ ।
प्रमदा अपि तं दृष्ट्वा भवेयुर्गलितांवराः ॥
काकोलूक नरास्थीनि गृहीत्वा भौमवासरे ।
रात्रौ कृष्णचतुर्द्दश्यां सम्वेष्ट्यारक्ततन्तुना ॥
शताभिमंत्रितं कृत्वा[२० ख]निक्षिपेच्छत्रुमन्दिरे ।
सप्ताहाभ्यन्तरे तेषां महदुच्चाटनं भवेत् ॥
उदयात्पूर्व्वमारभ्य जपेदस्तंगमावधि ।
एकविंशदिनं यावदर्द्धरात्रे वलिं क्षिपेत् ॥
नग्नो नग्नां स्त्रियं गच्छेन्मूलमन्त्रं जपन् शतम् ।
एवं कृते प्रिये सद्यः सर्व्वज्ञः साधको भवेत् ।
नरास्थिनिखनेद्भूमौ स्वमूत्रप्लावितन्निशि ॥
शतञ्च प्रजपेन्मन्त्रं रिपुर्ज्वरयुतो भवेत् ।
काकपक्षैः शिवाऽसृग्भिर्न्नरास्थिनिलिखेदिदम् ।
तारं क्रोधत्रयं साध्यं द्वितीयान्तं वलिं वदेत् ॥
गृह्णद्वन्द्वं भक्षयुगं मारयद्वितयन्ततः ।

वह्निजायान्तगं मंत्रं मूलमन्त्रस्य साधकः ॥
सहस्रं परिजप्याथ निशायां वैरिमन्दिरे ।
क्षिपेद्देवीं हृदि ध्यात्वा मृत्युस्तस्य त्रिमासतः ॥
पद्ममष्टदलं भूर्ज्जे योनियुग्मसमन्विते ।
लाक्षागोरोचनाचन्द्रकाश्मीरमृगनाभिभिः ॥
वक्ष्यमाणक्रमेणैव लिखेन्मन्त्रमनन्यधीः ।
योनिमध्ये लिखेन्मूल मन्त्रमष्टादशाक्षरं ॥
वक्ष्यमाणानि वीजानि लिखेदष्टदलेष्वपि ।
आमृतं प्रथमं वीजं गारुडं तदनन्तरं ॥
महाक्रोधं क्षेत्रपालं प्रेतवीजं च पञ्चमम् ।
प्रासादं चण्डवीजञ्च कालीवीजमथाष्टमं ॥
दलयोरन्तरे लेख्यं तारं वाग्भवमेव च ॥
मायावीजं वधूवीजं वीजं कामलकामयोः ॥
रतिवीजं मेद्यवीजं लिखित्वा तदनन्तरम् ।
पाशांकुशक्रोधभूतवीजानिद्वारिसंलिखेत् ॥
अकारादिक्षकारान्तैर्व्वर्णैर्व्विन्दुसमन्वितैः
वेष्टयेद्वसुवज्राढ्यं यन्त्रं सर्व्वोत्तमोत्तमं ॥
वेष्टितं रक्तवस्त्रेण जतुभिर्वेष्ट[२१ क]येत्ततः ।
वध्नीयात्पट्टवस्त्रेण वाहौ कंठे थवा नृणाम् ॥
स्त्रीणां वामकरे वद्धमन्येषां दक्षिणे करे ।
सर्व्वं संपादयेत्सद्यो नात्र कार्य्या विचारणा ॥
इयं रक्षा पुरावध्दा सिद्धयर्थे साधकोत्तमैः ।
शक्रेण नमुचेर्य्युद्धे विष्णुना तारकामये ॥
हरेणांधकसंग्रामे गरुडेनेन्द्रसंयुगे ॥

वायुना माहिषे युद्धे कुवेरेणामृताहृत्रे ।
स्कन्देन तारकानीके पाशिना सुरभीरणे ।।
यमेन रावणस्याज्यै चन्द्रेण त्रिदशाजिरे ।
तथा कृतयुगादौ च राजानो ये महावलाः ।।
तैश्चाऽपि विधृतं यन्त्रं सर्व्वापत्तिनिवारणं ।
मांधाता जामदग्न्यश्च नहुषः शिविरेव च ।।
रामः पृथुः कार्त्तवीर्य्यः पुरुकुत्सौ रघुर्न्नलः ।
भरतः शशविन्दुश्च ययातिर्व्वसुकोर्ज्जुनः ।।
पूरुः पुरूरवाभीमो जरासन्धो विदूरथः ।
एभिश्चान्यैश्च भूपालैरेतद्यन्त्रंधृतं पुरा ।
एतस्यान्यानि यन्त्राणि कलां नार्हन्ति षोडशीं ।
य एतं यन्त्रराजं हि धारयत्यप्रमादतः ।।
सश्रिया विष्णुसदृशः प्रभया सूर्य्यसन्निभः ।
कान्त्या चन्द्रमसा तुल्यो यक्षाधिपसमोधने ।।
वलेन वायुना तुल्यो विदयया गुरुणा समः
सौन्दर्य्ये मन्मथप्रायो वैभवेनेन्द्र सन्निभः ।।
तेजसा वह्निसदृशो रामार्ज्जुनसमोरणे ।
अथ किं बहुनोक्तेन शृणु पार्व्वति निश्चितं ।।
न कोपि भविता कश्चित्तत्तुल्यः पृथिवीतले ।
स सर्व्वसिद्धिमाप्नोति सुराणामपि दुर्ल्लभां ।।
रिपुसैन्यं महाघोरं स्तम्भयत्यचिरात्प्रिये ।
वन्ध्यापि ल[२१ ख]भते पुत्रं निर्द्धनो धनवान्भवेत् ।
विद्यार्थी लभते विद्यां कन्यार्थी कन्यकामपि ।।
यं यं कामं हृदि ध्यात्वा यन्त्रमेतत्प्रधारयेत् ।
तं तं काममवाप्नोति महाकालवचो यथा ।।

अपरञ्च प्रवक्ष्यामि प्रयोगं सिद्धिदायकम् ।
आनीय कामनीमेकां नवयौवनशालिनीम् ॥
असतीं सुन्दरीम्प्रीत्या परिक्षीनां महानिशि ।
वस्त्रालंकार कनकं दत्वा तस्यै यथा विधि ॥
नग्नो नग्नां मुक्तकेशो मुक्तकेशीं जपेन्मनुं ।
मैथुनेनोपगच्छेत् तस्याः सन्तोषपूर्व्वकम् ॥
योनिं स्वरेतसा लिप्त्वा तत्रेदं यंत्रमालिखेत् ।
जिह्वया तल्लिहेत्सर्व्वं सत्कृत्यैवमकुत्सयन् ॥
ततश्चराचरं सर्व्वं ज्ञात्वा सर्व्वज्ञतां लभेत् ।
मूकांश्च वादयेत्सत्सु कवित्वं चापि कारयेत् ॥
अतीतानागतं वेत्ति वर्त्तमानञ्च पश्यति ।
कुर्य्याच्च वादिनो मूकान्सभायां पण्डितानपि ॥
विवादे जयमाप्नोति पूजां सर्व्वत्र विन्दति ।
किमन्येन प्रकारेण नराणां मंत्रसिद्धये ॥
अनेन विधिना विद्यां लक्ष्मीमपि सदाप्नुयात् ।
द्वादशाब्दं चरन्नेवं सिद्धाष्टक मवाप्नुयात् ॥
विद्याधरत्वमाप्नोति खेचरत्वं तथैव च ।
पातालतलचारित्वं तथा वाक्सिद्धिमेव च ॥
तस्य दर्शनमात्रेण मार्त्तण्डसमतेजसः ।
पिशाचयक्षरक्षांसि पलायन्ते दिशोदश ॥
ताम्बूलपत्रे मधुना साध्यनामलिखेत्सुधीः ।
मूलमन्त्रेण सम्वेष्ट्य मुक्तवासा दिगम्बरः ॥
वक्ष्यमाणेन मन्त्रेण भक्षयेदविचारयन् ।
प्रणवञ्च त्रपावीजं कामवीजमनन्तरम् ।

साध्यनाम द्वितीयान्तं क्लेदयद्वितयं वदेत् ॥
आकर्षययुगं चापि मथद्वन्द्वं वदेत्ततः ।
युगं युगं वदेद्देवि पचद्रावयशब्दयोः ॥
आनयद्वितयं प्रोच्य मम सन्निधिमुच्चरेत् ।
क्रोधवाग्भवलक्ष्मीणां युगं युगमुदीरयेत् ॥
वह्निजायान्तगो मन्त्रः सर्व्वाकर्षणकारकः ।
अनेन विधिनाकर्षेद्यां यामिच्छति साधकः ॥
तथाप्यागच्छति क्षिप्रं यदि भूपस्य वल्लभा ।
सहस्रजनगुप्तापि यद्यन्तःपुरवासिनी ॥
यदि साक्षात्स्वयं देवी यदि वा स्यादरुन्धती ।
तथापि तस्याः सामर्थ्यं न स्यात् स्थातुं सुरेश्वरि ॥
स्वयमायान्ति निर्ल्लज्जा इतरासां तु का कथा ।
पत्युरङ्कं समुत्सृज्य सुतमङ्कान्निरस्य च ॥
पितरं चावमन्यापि बन्धून्धिक्कृत्य सर्व्वतः ।
गृहीता इव भूतेन स्वयमायान्ति योषितः ॥
तस्मान्निरीक्ष्य कर्त्तव्यः प्रयोगोऽयं शुचिस्मिते ।
प्रणवं रतिकामौ च मायाक्रोधांकुशश्रियः ॥
पाशवाग्भवमुच्चार्य्य कालीबीजमथोच्चरेत् ।
वदेत्कामकलाकालि सर्व्वाकर्षिणि चेत्यपि ॥
साध्यमाकर्षयेत्युक्त्वा वह्निजायामुदीरयेत् ।
मन्त्रेणानेनाभिमन्त्र्य तोयं वामेन पाणिना ॥

(१) ओं ह्रीं क्लीं अमुकीं क्लेदय क्लेदय आकर्षय २ मथ २ पच २ द्रावय २ आनय २ मम सन्निधिं हूं २ ऐं २ श्रीं २ स्वाहा ॥१

(२) ओं क्लीं ह्रीं हूं श्रीं आं ऐं क्रीं कामकलाकालि सर्व्वाकर्षिणि साध्यामाकर्षय स्वाहा ॥१९

पिबेत्प्रक्षालयेत्तेन मुखमात्मन एव च ।
या याः पश्यन्ति तं नार्य्यो यदि साध्व्योपि भामिनि ॥
तास्ता मुह्यन्ति निर्द्धूतधर्म्मभर्त्तृकुलत्रपाः ।
आविष्टा इव निर्ल्लज्जास्तिष्ठेयुः साधकाग्रतः ॥
दास्यो भवाम इत्येवं वादिन्यस्ताः कुला [२२ ख] ङ्गनाः ।
पलाशकाष्ठसंभूतपादुकायुग्ममाहरेत् ॥
श्मशानांगारमादाय तत्र मन्त्रं लिखेदमुम् ।
तारं वाग्वादिनीवीजं कालीयं कमलार्णकम् ॥
लज्जां क्रोधं समुद्धृत्य देव्याः संबोधनं लिखेत् ।
गन्तव्यभूमिमुल्लिख्य खण्डयच्छेदयद्वयम् ॥
त्रुटयग्मं छिन्धियुगं भूतपाशाङ्कुशार्णकम् ।
सिद्धिं देहीति संप्रोच्य दापयेति पदं ततः ॥
अस्त्रत्रितयमालिख्य वह्निजायायुतो मनुः ।
लेपयित्वा स्नुहीदुग्धं पादयोः साधकोत्तमः ॥
इच्छागामी भवेद्देवि नात्र कार्य्या विचारणा ।
पूर्व्वस्यां दिशि गच्छेत् स योजनानां शतद्वयम् ॥
याम्यायां त्रिशतं विद्धि वारुण्यां च चतुःशतम् ।
उत्तरस्यां पञ्चशतं विदिक्षु शतमेव च ॥
व्रजेदलक्षितो भूत्वा यथेच्छं साधकाग्रणीः ।
परावृत्य समायाति तावदेव वरानने ॥
अतश्च खेचरीसिद्धिं शृणु सावहिता मम ।
स्वर्णक्षीरीलतामूलं ग्राह्यं चन्द्रग्रहे सति ॥
रजःस्वलाभगे स्थाप्यं दिवसं त्रितयं प्रिये ।
ततो धूपैश्च दीपैश्च नैवेद्यैस्तत्प्रपूजयेत् ॥

तावद्यत्नेन संस्थाप्यं यावत्सूर्य्यग्रहो भवेत् ।
सूर्य्यग्रहे तु संप्राप्ते खञ्जरीटासृजा प्रिये ॥
संचूर्ण्य गुटिका कार्य्या यवत्रितयसंमिता ।
भाद्रकृष्णचतुर्द्दश्यां बलिं दत्वा च कुक्कुटम् ॥
धारयीत शिखामूले मनुमेनमुदीरयन् ।
निगमादिं वाग्भवञ्च मायां कामार्णमुच्चरेत् ॥
पाशांकुशक्रोधभूतलक्ष्मीबीजानि चोच्चरेत् ।
नाम देव्याश्च [२३क] संबोध्य रतिमोहिनि चोल्लिखेत् ॥
वसामांसपदं चोक्त्वा रक्तप्रिय इतीरयेत् ।
खेचरं मामिति प्रोच्य कुरुयुग्मं विनिर्द्दिशेत् ॥
रक्षोभूतपिशाचेति पदमुच्चारयेत्ततः ।
ततश्च विन्यसेद्देवि सिद्धविद्याधरोरगान् ॥
समुच्चरेत्कुरुद्वन्द्वमुक्त्वा मम वशं पदम् ।
ह्रां ह्रीं क्षां क्षूँ विनिर्द्दिश्य क्रां क्रीं क्लां क्लूँ समालिखेत् ॥
खेचरीसिद्धिशब्दाच्च दायिनीति पदं लिखेत् ।
त्वरयुग्मं समाहृत्य कहयुग्मं ततो वदेत् ॥
कालिकापालि सम्बोध्य क्रोधत्रितयमुल्लिखेत् ।
अस्त्रत्रितयमुच्चार्य्य स्वाहान्तो मनुरीरितः ।
ततः स खेचरो भूत्वा यादृच्छिकगतिर्भवेत् ।
सिद्धैस्साध्यैरप्सरोभिर्द्देवैश्च सह मोदते ॥
मेरुमन्दरकैलासहेमकूटहिमालयान् ।
अद्रीनारोहते सर्व्वान्प्रयोगस्यास्य शक्तितः ॥
इन्द्राग्नियमयक्षेशवरुणानिलरक्षसाम् ।
ईशस्यापि पुरं गच्छेदन्यत्रैव च का कथा ॥

न गतिस्तस्य हन्येत पातालेऽपि कदाचन ।
सर्व्वेषामप्यधृष्यः स्याद् भूपातालखचारिणाम् ॥
सिद्धैः साध्यैश्च देवैश्च यक्षै रक्षोभिरेव च ।
नागैश्च दानवैर्भूतैः सह संभाषणं चरेत् ॥
वज्रकायः स्वयं भूत्वा विचरत्यवनीतले ।
न तस्याभिभवः कर्त्तुं शक्यते त्रिदशैरपि ॥
अथापरं प्रयोगञ्च वदतो मेऽवधारय ।
काम्बोजदेशसंभूतं पलषोडशसंमितम् ॥
लौहमानीय देवेशि संक्रान्तौ मकरस्य च ।
तावत्संपूजयेद्यत्नाद् यावत्कर्क्कटसंक्रमः ॥
ततो व्योका [२३ ख] रमाहूय स्वगृहे कारयेदसिम् ।
शुचिर्दिगम्बरो मुक्तचिकुरो लोहकारकः ॥
कृष्णाष्टम्यामाश्विनस्य प्रारभेतासिमुत्तमम् ।
कुर्य्याच्छनैः शनैस्तावद् यावन्मकरसंक्रमः ॥
तत आनीय तं रात्रौ कृष्णपक्षे चतुर्द्दशीम् ।
पूजां विधाय विधिवत् स्थापयेत् कालिकाग्रतः ॥
आर्त्तवेन युवत्यास्तं लेपयेदविचारयन् ।
नैवेद्यधूपदीपाद्यैर्जवापुष्पैश्च पूजयेत् ॥
स्नुहीवटार्क्कदुग्धेन विलिम्पेन्मुष्टिमेव च ।
वक्ष्यमाणेन मन्त्रेण देव्यै खड्गं समर्प्पयेत् ॥
वेदादिवाग्भवक्रोधमेघविद्युद्रमार्णकान् ।
उच्चार्य घोरनादे च दंष्ट्राविकट इत्यपि ॥
मुखमण्डन उच्चार्य्य महाघोर इतीरयेत् ।
तथा घोरतरे चैव महाशब्दाद्भयंकरे ॥

श्मशानवासिनीत्युक्त्वा योगिनीडाकिनीपदम् ।
ततः परिवृते प्रोच्य कल्पान्तेति पदं लिखेत् ॥
कालानल निगद्यैव विकराल इतीरयेत् ।
दुर्न्निरीक्ष्य ततो रूपे दशानां युगकं वदेत् ॥
गर्ज्ज विध्वंसय च्छिन्धि दम मर्द्दय पातय ।
उच्छादय शोभय च मारय द्रावयेत्यपि ॥
ततो वदेदिमं खङ्गं देहि मेऽग्न्यङ्गनायुतः ।
ततः स्वगात्ररुधिरं देव्यै दद्यान्नृपो वलिम् ॥
ततो दद्यान्नरबलिमभावे महिषायुतम् ।
देवि कामकलाकालि सृष्टिस्थित्यन्तकारिणि ॥
देहि खङ्गं भगवति त्रिलोकीविजयाय मे ।
एवं गृहीत्वानुज्ञां वै हस्ते संलाप्य यत्नतः ॥
अङ्कोलीतैलमुच्चण्डं गृह्णीयान्मन्त्रमुच्चरन् ।
करवाल महाराज [२४ क] सर्व्वदेवधृत प्रभो ॥
कालनेमिवधे त्वं हि विष्णुना विधृतः पुरा ।
नन्दकेति ततः संज्ञां संप्राप्तस्त्वं जगत्प्रभो ॥
इन्द्रेण जम्भसंग्रामे धृतस्त्वं क्रथनो भव ।
दुर्गया दुर्गसंग्रामे यदा त्वं विधृतो ह्यभूः ।
विद्युत्पातेति संज्ञां त्वमवाप्तस्तत्क्षणे विभो ।
सर्व्वैर्द्देवगणैः सार्धं जायमाने महाहवे ॥
रावणेन धृतः पूर्व्वं चन्द्रहासस्त्वमप्यभूः ।
त्रैलोक्यविजयार्थं हि त्वमिदानीं मया धृतः ॥
वज्रघात इतीयं ते संज्ञा देव मया कृता ।
एवं मन्त्रं समुच्चार्य त्सरुं मुष्टौ निवेशयेत् ॥

स नग्न एव तिष्ठेद्धि यावदिच्छं महात्मनः ।
एवं खड्गमुपादाय यत्र युद्धे व्रजत्यसौ ॥
जयस्तत्र भवेदस्य नात्र कार्य्या विचारणा ।
साधकेन तु कर्त्तव्या केवलं चालनक्रिया ॥
स्वयमेव कृपाणोऽयं शातयत्याशु वैरिणः
यत्र यत्रैव पतति वज्रघातोऽसिपुंगव ॥
केवलं तत्र तत्रैव पतत्यशनिरेवहि ।
एकतो वज्रघातोऽयमेकतो वीरकोटयः ॥
द्रष्टुमेव न शक्तास्ते किं पुनर्योद्धुमाहवे ।
तत्कृपाणकरं ये ये पश्यन्ति रणमध्यगाः ॥
ते ते चक्षुर्मुद्रयित्वा तत्रैव निपतन्त्यधः ।
वज्रघातप्रभावोऽयं वर्णितुं नैव शक्यते ॥
तथापि किञ्चिच्चापल्यात्कथितं देवि तेऽग्रतः ।
निशुम्भशुम्भसंग्रामे देव्यै चायं धृतः पुरा ॥
ततो देवासुरे युद्धे बलिना वलिना धृतः ॥
रक्षोवानरसंग्रामे ततो रावणिना धृतः ॥
निवातकवचाख्यानाः कालकेयाभिधास्तथा ।
देवानामप्यवध्या ये हिरण्यपुरवासिनः ॥
[२४ ख] नवत्यर्व्वुदषट्खर्व्वनिखर्व्वशतसम्मिताः ।
वज्रघातप्रसादेन तेऽर्ज्जुनेन जिताः पुरा ॥
वीरभद्रं समाराध्य सौप्तिकानीकचारिणा ।
द्रौणिना निशि धृत्वैनमवशिष्टा निपातिताः ॥
यावच्छत्रुबलं सर्व्वं न निःशेषं भवेत्प्रिये ।
तावन्मुष्टिर्न्न च्यवति कराग्रादिति निश्चितम् ॥

खङ्गसिद्धिमिमां श्रुत्वा समरे विजयो भवेत् ।
अथाञ्जनप्रयोगं ते प्रवक्ष्यामि वरानने ॥
येनाञ्जितो निधिं पश्येदेनं कश्चन नेक्षते ।
भौमवाराप्तपञ्चत्वसूतिकाबालखर्प्परम् ॥
समानीय श्मशाने तु कज्जलं तत्र पातयेत् ।
नवनीतं भक्षयित्वा कृष्णमार्ज्जारकं सदा ॥
तद्वान्तं तत्समादाय राजीवार्क्कस्य तंतुना ।
खञ्जरीटस्य गरुता सार्द्धं वर्त्ति प्रकल्पयेत् ॥
ततस्तत्कज्जलं नीत्वा शनिवारे निमन्त्रयेत् ।
प्रातर्द्देव्यै समर्प्याथ मन्त्रेणानेन तां जपेत् ॥
वाग्भवं कामलं क्रोधं भूतबीजमथोच्चरेत् ।
निगद्य सर्व्वसिद्धीति दायिनीति पदं वदेत् ॥
मा मां पश्यन्तु चोद्धृत्य सर्व्वाद्भूतानि चोच्चरेत् ।
स्वाहान्तं मन्त्रमुल्लिख्याञ्जयेन्नेत्रेऽविचारयन् ॥
नैनं पश्यन्ति भूतानि नैनं पश्यन्ति मानुषाः ।
नैनं पश्यन्ति गीर्व्वाणा न नागा नासुराः खगाः ॥
अयं पश्यति भूतानि परमाणुसमान्यपि ।
निधिं भूमितलगतं सर्व्वं पश्यति साधकः ॥
व्यवधानगतञ्चापि दूरदेशगतं तथा ।
तिरश्चां विरुतं वेत्ति वेत्ति चैषां च चेष्टितम् ॥
आकाशचारिणः सर्व्वान्पश्यत्येव न संशयः ।
सुभगः सर्व्वनारी [२५ क] णां भवेत्काम इवापरः ॥
सर्व्वत्रैवाप्रतिहतो विचरेत महीतले ।
अथ ते गुटिकासिद्धिं प्रवदामि समासतः ॥

यत्सिद्धौ सर्व्वसिद्धिः स्यादेकसिद्धया न संशयः ।
रेखायुतं स्थूलपीतं शुचिदेशगतं प्रिये ॥
पुष्करिण्युदपानस्थं भेकमेकमुपाहरेत् ।
एकस्मिन्मार्त्तिके कुम्भे नूतने तं निधापयेत् ॥
पलमेकं शुद्धसूतं (?) तन्मध्ये निक्षिपेत् प्रिये ।
मुखमाच्छादयेत्तस्य सरावेण प्रयत्नतः ॥
बहुना जतुना तच्च मुद्रयेद् वारपञ्चकम् ।
यथाचेरत् प्रयत्नेन विशेन्नाम्भो यथाण्वपि ॥
ततो लिखेदमुं मन्त्रं कुम्भे साधकसत्तमः ।
तारवाग्भवकन्दर्प्पवधूलज्जारमारुषः ॥
पाशप्रसादफेत्कारीभूतप्रेतामृतान्यपि ।
महाक्रोधं क्षेत्रपालं चण्डकालीयगारुडान् ॥
कालविद्युन्मेघनागरतिबीजानि चालिखेत् ।
चतुर्व्विंशतिबीजानि खेचरीसहितानि च ॥
उक्त्वा कामकलाकालि रक्ष रक्षेति चोच्चरेत् ।
आकाशबीजत्रितयं महाबीजद्वयं ततः ॥
वारुणं बीजमेकं हि प्रोच्चरेत्तदनन्तरम् ।
अस्त्रत्रितयसंयुक्तः स्वाहान्तो मनुरीरितः ॥
चलत्तोयप्रवाहायाः कुल्याया हस्तमात्रतः ।
भूमेः खनित्वा तत्राधो घटं संस्थापयेदमुम् ॥
उपरिष्टात्प्रदेयानि शर्क्कराशकलानि च ।
यथोपरि प्रवाहस्तु गच्छेत्कुर्य्यात्तथा विधिम् ।
तत्र षण्मासपर्य्यन्तं स्थापयेद् यत्नतो घटम् ।
अन्वहं भक्षयेत् तत्स्थः सूतं भेकः क्षुधान्वितः ॥

बलिस्तत्र प्रयत्नेन देयः प्रति [२५ख] चतुर्दशि ।
भेकरूपेण सा देवी स्वयमेवास्ति तद्यतः ॥
तस्मात्तत्रार्च्चनं कार्य्यं देवीबुद्ध्या न संशय. :
सूतस्तदुदरे बद्धो भवतीति सुनिश्चितम ॥
षण्मासानन्तरं देवि तत उत्थापयेत्सुधीः ।
गृहकोणे ततः स्थाप्यमन्धकारे रहस्यपि ॥
एकं हि विवरं कार्य्यं कुम्भे तत्र शनैः शनैः ।
संपिष्टहिंगुलीतोयं पलमात्रं विनिःक्षिपेत् ॥
तेन छिद्रपथा देवि मासि मास्येवमाचरेत् ।
तत्तोयं षट्पलमितं षट्सु मासेषु दापयेत् ॥
ततः संवत्सरे पूर्णे बहिर्निष्कासयेच्छनैः ।
ततोऽन्तरीक्षे तत्स्थाप्यं प्रयत्नेन विचक्षणः ॥
तत्र विघ्नकराः सर्व्वे देवदानवराक्षसाः ।
सावधानो भवेत्तस्मात्प्रतिक्षणमनन्यधीः ॥
तत्र रक्षा प्रकर्त्तव्या मन्त्रेणानेन पार्व्वति ।
क्रोधबीजत्रयं प्रोच्य देव्याः सम्बोधनं वदेत् ॥
यक्षराक्षसभूतेति पिशाचप्रेत इत्यपि ।
कूष्माण्डजंभकेत्येव योगिनी डाकिनीति च ॥
स्कन्द वेताल उच्चार्य्य क्षेत्रपाल विनायक ।
ततो घोणक उल्लिख्य गुह्यकेति पदं वदेत् ॥
विनायकेभ्य इत्युक्त्वा इमं घटमुदीरयेत् ।
रक्ष रक्षेति चोद्धृत्य स्वाहान्तो मन्त्र उत्तमः ॥
मन्त्रेणानेनावगुण्ठ्य कुर्य्यादेवं ततः परम् ।
कृष्णधुत्तुरवृक्षस्य पलमात्रं द्रवं शुचिम् ॥

दद्याच्च प्रथमे मासि तेन छिद्रेण साधकः ।
द्वितीये मासि तुलसी तृतीये श्रेयसीरसम् ॥
चतुर्थे मार्क्करीन्दद्यात्पञ्चमे लक्ष्मणारसम् ॥
षष्ठे हैमवतीपत्रद्रवदानं विधीयते ॥
पूर्णे ह्यष्टादशे मासि प्रदद्यान्माहि-[२७ क] षं बलिम् ।
ततो निष्कासयेद्भेकं सिंदूरारुणसंनिभम् ॥
वस्त्रैः करं वेष्टयित्वा ततस्तमवनामयेत् ।
शनैः शनैर्द्धूनयेच्च यावद्वमति दर्दुरः ॥
ततः सा गुटिका देवि सिन्दूरारुणसन्निभा ।
इन्द्रगोपादपि तथा माणिक्यशकलादपि ॥
महाशोणा भवेद्देवि तां प्रगृह्य विचक्षणः ।
प्राणप्रतिष्ठामापाद्य पूजयित्वा यथाविधि ॥
देव्यनुज्ञां समासाद्य मन्त्रेणानेन धारयेत् ।
प्रणवं शाम्भवं बीजं मायाकामाङ्कुशामृतम् ॥
सर्व्वसिद्धिमथोच्चार्य्य देहि देहीति सङ्गणेत् ।
ततः स्वाहा पदं चोक्त्वा शिखायां वन्धयेत्ततः ॥
अव्याहतगतिर्भूत्वा यत्रेच्छा तत्र गच्छतु ।
अनेनैव शरीरेण देवत्वं प्राप्नुयान्नरः ॥
खेचरो जायते देवि तथैवादृश्यतां व्रजेत् ।
लीयते वायुभूतोऽयं वायुमध्ये न संशयः ॥
तेजो भूत्वा निविशते तेजस्येव स साधकः ।
जले प्रविष्टो भवति जलरूपो वरानने ॥
स आकाशतनुर्भूत्वाकाश एव विलीयते ।
सुमेरुशतसंकाशो गरिम्णा स भवत्यपि ॥

परमाणुसमो भूयादणिम्ना स क्षणान्तरम् ।
पिबत्यब्धिचतुष्कं स यदि देवि पिपासति ।।
चन्द्रसूर्य्यग्रहर्क्षाणि साधकश्चेद्दिधीर्षति ।
ध्रियते तत्क्षणादेव कराभ्यां स्थित एव सः ।
शापानुग्रहसामर्थ्यं भवति क्षिप्रमेव हि ।
लोकपालैः समं तस्य सम्वादो जायते मिथः ।।
तेषां पुराणि व्रजति सखा चैषां भवेदसौ ।
नागाङ्गना देवकन्या यक्षिण्योऽप्सरसस्तथा ।
तस्याग्रतः समायान्ति स्व[२६ ख] यं मदनविह्वलाः ।
जीवेत् स साधकश्रेष्ठो यावदाचन्द्रतारकम् ।।
न शक्यते समाख्यातुं महिमा मादृशा प्रिये ।
अथवा किं बहूक्तेन सत्यं सत्यं वचो मम ।।
स साक्षाद्रुद्र एवेति मन्तव्यो नात्र संशयः ।
रौप्यताम्राहिवङ्गायोराशीन् पर्व्वतसन्निभान् ।।
यद्येष स्पृशति क्षिप्रं सुवर्णन्निश्चितं भवेत् ।
यस्मात्कामकलाकालीरूपेयं गुटिका प्रिये ।।
तस्मान्नैव प्रयोक्तव्या ह्यन्यासु क्षुद्रसिद्धिषु ।
केवलं देवतात्वैककारिणीं गुटिकामिमाम् ।।
धारयेत् कालिकारूपामप्रमत्तेन चेतसा ।
अथापरं प्रयोगं च शृणु वक्ष्यामि कञ्चन ।।
कोऽपि वीरो महायुद्धे संमुखे पतितो हि यः ।
सशिरस्कं समादाय स्थापयेत् पितृकानने ।।
अथ स्वयं शुचिः स्नातः कृतनित्याह्निकक्रियः ।
रात्रौ कृष्णचतुर्द्दश्यामभीतः साधकः सुधीः ।।

वध्यमेकन्नरं चौरं समादाय व्रजेन्नृपः ।
आरुह्य तं शवं तत्र जपेन्मन्त्रमभीः शुचिः ।।
साहस्रे वा द्विसाहस्रे जपे पूर्णे कलापिनी ।
प्रविश्य तत्र कुणपं आवेशं विदधीत वै ।।
ततो नरबलिं दद्याद्देव्यै साधकसत्तमः ।
तारवाग्भवकन्दर्प्पप्रेतभूतामृतैः सह ।।
प्रासादाङ्कुशफेत्कारीगारुडक्षेत्रपालकैः ।
सम्बोध्य देव्या नामापि बलिं गृह्ण मुहुर्म्मुहुः ।।
सिद्धिं मे देहि संभाष्य दापयेति ततः परम् ।
स्वाहान्तं मन्त्रमुल्लिख्य दद्यादेतेन साधकः ।।
भवेतां तालवेतालौ नामानौ सेवकोत्तमौ ।
तावारुह्य व्रजेद्देवि भूर्भुवःस्वःपुरत्रयम् ।।
त [२७ क] लं रसातलं चैव पातालसुतलातलान् ।
मेरुशैलादिकांश्चैव व्रजेदेवं न संशयः ।।
अन्तः समुद्रं विशति जले तेजसि लीयते ।
आकाशपर्व्वतादींश्च भिनत्ति स्वेन तेजसा ।।
त्रैलोक्यान्तरगं स्थानं तादृशं नास्ति पार्व्वति ।
यत्रायं नैव गच्छेत् स इत्येवं निश्चयो मम ।।
अन्ये च बहवो देवि प्रयोगाः सन्ति भूरिशः ।
ते सर्व्वेऽन्वेषणीयाश्च ह्यन्यकालीविधिष्वपि ।।
इत्येते कथिता देवि प्रयोगाः सर्व्वसिद्धिदाः ।।

इत्यादिनाविरचितायां महाकालसंहितायां सामान्यविशेष प्रयोगो नाम द्विशताधिकषट्चत्वारिशः पटलः ।।६।।

देव्युवाच ।

कर्त्तव्यं केन रूपेण स्थापनं जातवेदसः ।
देवेश तन्मे कथय महाकाल जगत्पते ॥

श्रीमहाकाल उवाच ।

शृणु देवि प्रवक्ष्यामि वह्नेः स्थापनमुत्तमम् ।
जायते सर्व्वथा येन साधकस्येप्सितं वरम् ॥
पूर्व्वोत्तरप्लवं रम्यमादौ मण्डलमाचरेत् ।
ततस्त्रिकोणषट्कोणं नवकोणमथापि च ॥
तत्तत्कार्य्यानुसारेण विदधीत विचक्षणः ।
वाञ्छाभेदा द्रव्यभेदाः काष्ठभेदाः भवन्ति हि ॥
फलं फलानामन्यत् स्यादन्यदन्नस्य पार्व्वति ।
तथान्यदेव पुष्पाणामन्यदेवान्यवस्तुनः ॥
अन्यामन्यां होमकर्म्मकामनां मन्त्रविच्चरेत् ।
ध्यायन्देवीं चरेद्धोमं समिद्भिः सर्पिषा सह ॥
ततो जपं प्रकुर्व्वीत होमान्ते सर्व्वथा प्रिये ।
ततः सुजपहोमाद्धि जायन्ते सर्व्वसिद्धयः ॥
अथ होमविधिं वक्ष्ये ये शास्त्रे वि [२७ ख] हिताः सदा ।
यस्य सम्यग्विधानेन सर्व्वसिद्धिः प्रजायते ॥
पूर्व्ववन्मण्डलं कृत्वा कोणं चापि यथाविधि ।
तत्राचरेच्छुचिर्भूत्वा स्थापनं जातवेदसः ॥
न्यासं करांगयोः कृत्वा ध्यात्वा देवीं हृदि स्थिताम् ।
मण्डल कोण ऐशान्यां होमकर्मारभेत वै ॥

विधाय विधिवत्पूजां होमकर्म्मणि मण्डले ।
अग्न आयाहि मन्त्रेण वह्नेरावाहनं चरेत् ॥
अग्नये रोचमानायेतिमन्त्रैः स्थापनं ततः ।
होमं पश्चात्प्रकुर्व्वीत समिद्भिः कुसुमैरपि ॥
फलैः पत्रैर्व्रीहिभिश्च तथान्यैरपि वस्तुभिः ।
शतमष्टोत्तरञ्चापि सहस्रं चायुतं तथा ॥
लक्षं चापि प्रकर्त्तव्यं लक्षोपरि न विद्यते ।
कामनागौरवादेव होमे गौरवमिच्छति ॥
सर्व्वत्रैव तु होमान्ते जपं कुर्य्यादनन्यधीः ।
एकेन केवलेनैव द्रव्येणान्यत् फलं भवेत् ।
अन्यदेव विमिश्रेण फलं देवि विधीयते ॥
कुसुमानां फलं सर्व्वमादौ मत्तोऽवधारय ॥
समिद्घृतमधून्मिश्रा मालतीकुसुमाहुतिः ।
बृहस्पतेरप्यधिका वागीशत्वप्रदायिका ॥
वशगाः स्युर्म्महीपाला जातीपुष्पैकहोमतः ।
मेधावृद्धिर्य्यूथिकाभिर्न्नृपत्वं नागकेशरैः ॥
माधवीभिर्म्महीलाभो हेमलाभश्च चम्पकैः ।
अतिमुक्तैर्बुद्धिवृद्धिर्म्मल्लिकाभिर्द्धनागमः ॥
कुन्दैः कीर्त्तिमवाप्नोति बन्धूकैर्व्वान्धवप्रियः ।
जवापुष्पेण रिपवः संक्षयं यान्ति तत्क्षणात् ॥
पद्मैरायुरवाप्नोति कुमुदैः कविता भवेत् ॥
कदम्बैर्व्याधिनाशः स्यादम्लानैर्व्वृद्धिभाग्भवेत् ॥
जयप्राप्तिर्म्मरुवकैर्ग्गजलाभः कु [२८ क] कण्टकैः ।
झिण्टीभिर्हयलाभः स्यान्नौलाभो मुनिपुष्पकैः ॥

तथापराजितापुष्पैर्भवेत्सर्व्वाङ्गसुन्दरः ।
शेफालिकाप्रसूनेन सुतलाभः प्रदिश्यते ॥
शोकहानिरशोकेन वकुलैः कुलमान्यता ।
दूर्व्वया धनधान्यानि शाल्मल्या शात्रवक्षयः ॥
द्रोणपुष्पेणार्थलाभो वकपुष्पैर्द्धनागमः ।
राज्यलाभश्च पुन्नागैः कर्णिकारैर्व्वहून्नतिः ॥
दीर्घायुष्ट्वं पाटलेन तगरैः सर्व्वसाम्यता ।
पलाशकुसुमैर्होमो वहुगोऽजाविकारकः ॥
शिरीषपुष्पैः प्रमदा जयन्त्या च जयश्रियः ।
विद्वेषणं चार्क्कपुष्पैर्द्धूत्तूरै रिपुमारणम् ॥
कोविदारैर्व्वलावाप्तिः पारिजातैर्ज्जयोच्छ्रयः ।
अन्येषामपि पुष्पाणामन्यदन्यत्फलं भवेत् ॥
फलहोमस्यापि फलं कथयामि वरानने ।
श्रीफलैः श्रीफलावाप्तिः क्रमुकैर्भोगसञ्चयः ॥
नागरङ्गेण सौन्दर्य्यं पनसैः कान्तिमान् भवेत ।
वशित्वं नारिकेलेन जम्बीरैः शत्रुसंक्षयम् ॥
आम्रेण राज्यलाभः स्यात् स्तम्भनं जाम्ववैः फलैः ।
रम्भाफलेन देवेशि सर्व्वसिद्धिरवाप्यते ॥
रिपूच्चाटः कपित्थेन वदर्य्या वलवान् रणे ।
क्षीरीफलेन तनयो द्राक्षाभिर्म्मोक्षमाप्नुयात् ॥
उदुम्बरेण धर्म्माप्तिर्व्वटेनापत्यपूर्णता ।
जातीफलस्य होमेन वशीकुर्य्याज्जगत्त्रयम् ॥
कूष्माण्डैर्ग्रहशान्तिः स्याद्वृद्धिर्द्धात्रीफलैस्तथा ।
वीजपूरेणार्थपूरो मारणञ्च विभीतकैः ॥

मोक्षः स्यादेव रुद्राक्षैर्हरीतक्यामघक्षतिः ।
लकुचैर्य्युवतिप्राप्तिस्तालैरुन्मादये [२८ ख] द्रिपून् ।।
मधूकैर्म्महती लक्ष्मीः करमर्द्दैर्बलोन्नतिः ।
अन्येषां च फलानां हि भूयांसि हि फलानि च ।।
महदायुर्य्यवैर्होमे मुद्गैरन्नप्रपूर्णता ।
शालिभिस्तण्डुलैर्व्वापि सम्पत्तिर्भूयसी भवेत् ।।
सर्व्वसिद्धिस्तिलैर्होमे माषैर्म्मासे रिपुक्षयः ।
श्यामाकैस्तपसो लाभो नीवारैस्तेज उत्तमम् ।।
सर्व्वाकृष्टिः कोद्रवेण कुल्माषैरामयक्षयः ।
सिद्धार्थकैस्सर्षपैश्च सर्व्वसिद्धिः करे स्थिता ।।
दुग्धेन नृपवश्यत्वं दध्ना नृपसुतास्तथा ।
इक्षुभिश्च गुडैर्व्वापि वशीभूताः स्त्रियोऽखिलाः ।।
सर्व्वानिवाज्यहोमेन वशीकुर्य्यान्न संशयः ।
मधुना भोगभूयस्त्वं शर्क्कराभिर्म्महोदयः ।।
राज्यावाप्तिः पट्टवस्त्रैः कर्प्पूरैः कीर्त्तिरुत्तमा ।
विद्याधरत्वं देवत्वं सिद्धत्वं मृगनाभिना ।।
कुङ्कुमैरूपशालित्वं चन्दनैर्व्वाग्मिता भवेत् ।
सिद्धचष्टकं चागुरुणा जयो रोचनया भवेत् ।।
मुक्तया शिवसायुज्यं माणिक्येनार्क्कपूःस्थितिः ।
वैदूर्य्यान्नागलोकाप्तिर्व्वज्रैर्व्वत्रिपुरे स्थितिः ।।
इन्द्रनीलेन मणिना गन्धर्व्वत्वमवाप्यते ।
गोमेदैः किन्नरत्वञ्च पुष्परागेण यक्षता ।।
गारुत्मतैः प्रबालैश्च तथा मरकतेन च ।
सप्तद्वीपश्वरत्वं हि जायते नात्र संशयः ।।

कनकेन भवेत्कान्तिर्दुर्व्वर्णेन यशो भवेत् ।
ताम्रेण भूमिलाभः स्याद्रीत्या हि कलहे जयम् ॥
नागेन विषहानित्वं लोहैर्म्मारणमादिशेत् ।
लाक्षारसमयो होमः सर्व्वापत्तिनिवारणः ॥
कज्जलैरपधृष्यत्वं सिन्दूरैर्म्मोहनं भवेत् ।
बिल्वपत्रै [२६ क] र्न्नागवल्लीदलैर्ल्लक्ष्मीरवाप्यते ॥
यावत्यः सिद्धयः सन्ति तावत्यः पायसैर्भवेत् ।
अपूपैः शष्कुलीभिश्च लक्ष्मीविद्याप्तिरेव च ॥
कटुत्रयेण शत्रूणामुच्चाटनमुदीर्य्यते ।
लवणेन भवेद्द्वेषः केशैर्म्मरणमादिशेत् ॥
रजस्वलानां नारीणामार्त्तवेन धनागमः ।
रेतसा स्तम्भनं देवि मोहनं स्वमलैरपि ॥
स्वीयेनोद्वर्त्तनेनैव त्रैलोक्यं वशमानयेत् ।
उलूककाकयोः पक्षैर्म्महद्विद्वेषणं भवेत् ॥
कटुतैलस्य होमेन वशीकुर्य्याज्जगत्त्रयम् ।
धाना लाजाश्च पक्वान्नमोदनं सर्व्वकामदम् ॥
कृशरान्नैर्म्मोदकैश्च सर्वसिद्धिर्भवत्यसौ ।
कञ्चिद्विशेषं ते वक्ष्ये समिधा देवि तच्छृणु ॥
पालाश्याः समिधः शुद्धाः प्रशस्ताः सर्व्वकर्म्मणि ।
महद्धनाप्तिर्व्विल्वेन खादिरेण नृपो वशः ॥
वाटेन कामिनीप्राप्तिर्व्विद्याप्तिः पैप्पलैन च ।
औदुम्वर्य्या च समिधा खेचरत्वं प्रजायते ॥
सर्व्वज्ञत्वमपामार्गैरामलक्या महीपता ।
धूत्तूरेणारिनिधनं मुनिवृक्षैः स्थिरा मतिः ॥

शाखिभिर्य्यज्ञियैर्म्मध्यैर्भिन्नं भिन्नं फलं भवेत् ।
निशामयाथ देवेशि मांसहोमफलं महत् ॥
छागमांसेनार्थलाभो विद्या मेषेण लभ्यते ।
कृष्णसारस्य मांसेन भवेयुर्व्वशगा नृपाः ॥
रुरुमांसेन साज्येन कृत्वा होमं वरानने ।
सर्व्वसिद्धिमवाप्नोति देवानामपि दुर्लभाम् ॥
स्तम्भयत्यरिसैन्यानि माहिषं पललं प्रिये ।
अतीतानागतज्ञानं वाराहेण च लभ्यते ॥
शत्रुवाक्स्तम्भनं कुर्य्यादार्क्षमांसाहुतिं चर-[२९ ख] न् ।
कापेयपललेनैव रणेऽधृष्यः प्रजायते ॥
खाङ्गेनाभेद्यकवचो भूत्वा भ्रमति मेदिनीम् ।
गोधामांसस्य होमेन निधिं पश्यति भूतले ॥
सामान्यमृगमांसेन वायुतुल्यबलो भवेत् ।
राङ्कवामिषहोमेन वशे स्युर्नृपयोषितः ॥
शल्लकीपललाहुत्या कविः कविसमो भवेत् ।
गावयामिषहोमेन दीर्घमायुरवाप्यते ॥
गोमांसं मधुनालोड्य वामहस्तेन होमयेत् ।
अपि देवा वशं यान्ति किं पुनः क्षुद्रमानुषाः ॥
शशेनादृश्यतां गच्छेत् कच्छपेनाप्नुयाद्धनम् ।
नाक्रमांसस्य होमेन विषं न लगति क्वचित् ॥
नाकुलं पललं हुत्वा वाक्सिद्धिर्भवति क्षणात् ।
मार्ज्जारमांसहोमेन कुबेरसदृशो भवेत् ॥
सिंहमांसस्य होमेन साक्षाद्विद्याधरो भवेत् ।
राज्यावाप्तिर्व्याघ्रमांसहोमेन भवति ध्रुवम् ॥

तुरगामिषहोमेन सर्व्वपृथ्वीपतिर्भवेत् ।
दुःस्वप्नहानिरौष्ट्रेन हस्तिमांसैर्म्महीपतिः ॥
गोमायुमांसहोमेन धनदेन समो भवेत् ।
विवादे जयलाभः स्याद्राज्यलाभोऽपि जायते ।
स्तम्भयत्यरिसैन्यञ्च स्त्रीणां प्रियतमो भवेत् ।
अपि सर्व्वे महीपालास्तस्य दासा न संशयः ॥
महामांसस्य होमेन किं तद् यन्न फलं भवेत् ।
गुरुणा सदृशी विद्या कुवेरादधिकं धनम् ॥
ब्रह्मणोप्यधिकं दीर्घमायुरस्य तु निश्चितम् ।
ऐश्वर्य्ये शक्रसदृशः कान्त्या चन्द्र इवापरः ॥
तेजसा रवितुल्योऽयं दुःस्पृश्योऽप्यग्निना सह ।
क्रोधे यमेन सदृशः सर्व्वसिद्ध्याकरो भवेत् ॥
वच–[३० क] सा वहुना किं स्यादेतदेवावधारय ।
स देवीपुत्र एव स्यात्सिद्धादीनां तु का कथा ॥
किंतु न स्याद् द्विजातीनामेष धर्म्मो वरानने ।
नृपस्य वाथ शूद्रस्य भवेत्तत्रापि पाक्षिकः ॥
न तद्वधाद्भवेन्मांसं वधो वै घोरपापकृत् ।
घोरपापान्न सिद्धिः स्यादिति बुद्ध्या समाचरेत् ।
इदानीं पक्षिपललहोमजन्यं फलं शृणु ।
वाध्रीनसामिषाहुत्या जायते धर्म्मभाजनम् ॥
कपोतमांसहोमेन रम्यां कन्यां लभेत वै ।
भारद्वाजेन मांसेन मृतं सञ्जीवयेदसौ ॥
पारावतक्रव्यहोमात् कामिनीनां प्रियो भवेत् ।
कोयष्टिकस्य मांसेन खेचरीसिद्धिभाग्भवेत् ॥

महद्वैरं जनयति उलूकपललाहुतिः ।
साधको मद्गुहोमेन कामरूपः क्षणाद्भवेत् ॥
जंगमाजङ्गमं सर्व्वमाकर्षेच्छ्येनहोमतः ।
शातपत्रामिषैर्होमो राजानं वशमानयेत् ॥
अदृश्यः स्यात्खञ्जरीटैर्द्देवतासुररक्षसाम् ।
धनावाप्तिः सुतावाप्तिर्द्धार्त्तिकेन न संशयः ॥
चाषेन देवलोकादिगमनं विदधाति वै ।
कारण्डवस्य मांसेन भवेज्जातिस्मरो नरः ॥
उच्चाटनं मारणं च विद्वेषः काकमांसतः ।
हारीतमांसहोमेन पर्व्वतानुद्धरेदपि ॥
कुररक्रव्यहोमेन मूकानपि च वादयेत् ।
लावमांसस्य होमेन तेजस्वी चाग्निमान्भवेत् ॥
पिकक्रव्याहुतिः कुर्य्यात् साधकं किन्नरेश्वरम् ।
धत्ते सत्यं परपुरप्रवेशं टिट्टिभाहुतिः ॥
कुक्कुटक्रव्यहोमोऽयं सद्योल–[३० ब] क्ष्मीफलप्रदः ।
साधकस्याथ तनुते चकोरश्चिरजीविताम् ॥
कान्ताप्रियत्वं सौन्दर्य्यं क्रियते चटकाहुतिः ।
सारसो योगसिद्धिं च वितनोति वरानने ॥
कालिङ्गस्तनुते होम आरोग्यमपराजयम् ।
चक्रवाकेन बन्धूनां सर्व्वेषामीश्वरो भवेत् ॥
कारटेन तु होमेन धनायुःकवितां लभेत् ।
हांसेन मोक्षमाप्नोति दात्यूहैरतिबुद्धिताम् ॥
तित्तिरैश्चिरजीवित्वं चातकैर्म्मोहनं तथा ।
मायूरमांसहोमेन विमानाधिपतिर्भवेत् ॥

गौधेन खड्गसिद्धिः स्याद्बकैः सौभाग्यसौख्यभाक् ।
चैलेन धातुसिद्धिः स्यात्क्रौञ्चैस्तरति दुर्गतिम् ॥
यावत्यः सिद्धयः सन्ति त्रिलोक्यां वरवर्णिनि ।
तावतीर्लभते सद्यो होमं कीरामिषैश्चरन् ॥
आज्येन वापि मधुना दध्ना वा पयसाथवा ।
आमिक्षयेक्षुदण्डेन तिलैः शर्करयापि वा ॥
मिश्रितैराहुतिर्ग्राह्या केवला न कदाचन ।
प्रसृतिर्मुख्यपक्षः स्यान्मध्यमोऽर्द्धमितो भवेत् ॥
होमकर्म्मणि चैवात्र त्रिपर्व्वप्रमितोऽधमः ।
चतुरस्रं भवेत्कुण्डं शान्तिपुष्ट्यादिकर्म्मणि ।
मारणोच्चाटने द्वेषवशीकारे त्रिकोणकम् ।
स्तम्भने मोहने वापि वर्त्तुलं कुण्डमाचरेत् ॥
भुक्तिमुक्त्यैकसिद्धयर्थं दीर्घं कुण्डं समाचरेत् ।
यथा यत्समये प्रोक्तं तत्र कुर्य्यात्तथाविधिम् ॥
एष ते कथितो देवि होमक्रमविधिर्म्मया ।
अथ योगविधिं मत्तः शृणु सावहिता सती ॥
जपहोमार्च्चनध्यानप्रयोगाश्चैकतो मताः ।
एकतो [३१ क] वायुरोधेन देहषट्चक्रभेदनम् ॥
सदा शिवेन यः प्रोक्तः क्रमो योगविधेर्म्मम ।
तस्मिन्कृते किमेभिर्व्वा प्रयोगैः साधनैरपि ॥
यो योगेन तनूमेतां साधयेद्विधिवर्त्मना ।
परार्द्धशतजीवी स एवमाह सदाशिवः ॥
तत्रादौ देहसंस्थानमाकर्णय वरानने ।
द्वे सहस्रे तु नाडीनां वसतो देहपञ्जरे ॥

कीकसानि च तिष्ठन्ति द्वात्रिंशदिति निश्चयः ।
वायवो दश तिष्ठन्ति पञ्च तेषु महत्तराः ॥
सूर्य्याचन्द्रमसोः स्थानं देहमध्ये व्यवस्थितम् ।
आकाशभूमिसलिलवह्नीनां तत्र संस्थितिः ।
वायुस्तु सर्व्वदेहेषु चलत्येव प्रतिक्षणम् ।
यस्मात्प्रयात्यणुर्भूत्वा तस्मात्प्राण इतीर्य्यते ॥
अग्निस्थानं यदेतस्मिंस्तज्जांबूनदसन्निभम् ।
त्रिकोणाकारतो ज्ञेयमितरेषां तु मण्डलम् ॥
त्रिकोणमग्निस्थानं यद्देहमध्यं तदुच्यते ।
यद्यत्र तिष्ठति तनौ त्वं तदादौ निवोध मे ॥
अधो मेढ्राद् द्वयंगुलं तत्तावदेव गुदोपरि ।
एकांगुलप्रमाणं तद्देहमध्यं प्रकीर्त्तितम् ॥
देहमध्यादूर्ध्वमस्ति कन्दं देवि नवाङ्गुलम् ।
चतुरंगुलमुच्छ्रायमायामं तावदेव च ॥
आकारेणाण्डसदृशं त्वगस्थिपरिवेष्टितम् ।
तत्र संचरति प्राणः स्वे स्थाने परमोपरि ॥
तस्योपरिष्टाद्विज्ञेयं कुण्डलीस्थानमुत्तमम् ।
कृत्स्नो योगविधिस्तत्र सिद्धिश्चापि प्रतिष्ठिता ॥
कन्दमध्ये स्थितास्तत्र मुख्या नाड्यश्चतुर्द्दश ।
एकैकस्यां द्विचत्वारिंशच्छतं परिनिष्ठिताः ॥
तिस्रस्तास्वपि मुख्याः स्युः सुषुम्णेडाथ पिङ्गला ।
पयस्विनी सरस्वत्यो [३१ ख] वारणा च कुहुस्तथा ॥
गांधारी शंखिनी पूषा हस्तिजिह्वाप्यलंबुषा ।
विश्वोदरायशस्विन्यौ मुख्या ह्येताश्चतुर्द्दश ॥

मोक्षमार्गे सुषुम्णा सा ब्रह्मरन्ध्रे प्रतिष्ठिता ।
तस्या वामे इडा ज्ञेया चन्द्रसंचारसंचिता ॥
दक्षिणे पिङ्गला नाडी रविसंचारशोभिता ।
सरस्वती कुहूश्चैव सुषुम्णापार्श्वयोः स्थिते ।
गांधारी हस्तिजिह्वा च इडायाः पृष्ठपार्श्वयोः ।
पूषा पयस्विनी चैव पिङ्गलापृष्ठपार्श्वयोः ॥
कुहोश्च हस्तिजिह्वाया मध्ये विश्वोदरा स्थिता ।
पयस्विनी कुहोर्म्मध्ये वारणा च प्रकीर्त्तिता ॥
पूषायाश्च सरस्वत्याःस्थिता मध्ये यशस्विनी ।
गांधार्याश्च सरस्वत्याः शंखिनी मध्यसंस्थिता ॥
अलंबुषा च देवेशि कन्दमध्यादधः स्थिता ।
पूर्व्वभागे सुषुम्णाया मेढ्रान्तं च कुहूः स्थिता ॥
अधश्चोर्ध्वं च विज्ञेया वारणा सर्व्वगामिनी ।
पयस्विनी च याम्यस्य पादाङ्गुष्ठाङ्गमिष्यते ॥
पिङ्गला चोर्ध्वगा याम्ये नासान्तं विद्धि पर्व्वति ।
याम्ये पूषा च नेत्रान्तं पिङ्गलायास्तु पृष्ठतः ॥
यशस्विनी नाडिका च याम्यकर्णान्तमिष्यते ।
सरस्वती तथा चोर्ध्वमाजिह्वायां प्रतिष्ठिता ॥
आसव्यकर्णाद्देवेशि शंखिनी चोर्ध्वगा मता ।
गान्धारी सव्यनेत्रान्तमिडायाः पृष्ठतः स्थिता ॥
हस्तिजिह्वा तथा सव्यं पादाङ्गुष्ठाङ्गमिष्यते ।
विश्वोदरा च या नाडी सव्ये सव्ये गता स्मृता ॥
अलंबुषा महाभागा पादमूलादधोगता ।
प्राणोऽपानः समानश्च उदानो व्यान एव च ।

नागकूर्म्मः कृकरश्च देवदत्तो धनञ्ज [३२ क] यः ।
एते नाडीषु सर्व्वासु चरन्ति दश वायवः ॥
एतेषु वायवः पञ्च मुख्याः पूर्व्वोदिताः प्रिये ।
तेषु मुख्यतमः प्राणः कन्दस्याधः प्रतिष्ठितः ॥
मुखनासिकयोर्मध्ये हृदये नाभिमण्डले ।
कन्दमध्येऽपि च प्राणः स्वयमेवावतिष्ठते ॥
अपानो मेढ्रगायोश्च ऊरुवंक्षणजानुषु ।
जंघोदरे च कट्यां च नाभिमूले च तिष्ठति ॥
व्यानः श्रोत्राक्षिमध्ये च हृत्कट्यां गुल्फयोरपि ।
समानः सर्व्वदेहेषु सर्व्वव्यापि प्रतिष्ठितः ॥
भुक्तं सर्व्वरसं गात्रे व्यापयन्वह्निना सह ।
द्विसप्ततिसहस्रेषु नाडीमध्येषु सञ्चरन् ॥
समानो वायुरेवैकः स्थितो व्याप्य कलेवरम् ।
नागादिवायवः पञ्च त्वगस्थादिषु संस्थिता ॥
निःश्वासोच्छ्वासकादिश्च प्राणकर्म्म इतीष्यते ।
अपानवायोः कर्मैतद् विण्मूत्रादिविसर्ज्जने ॥
प्राणोपादानचेष्टादि व्यानकर्म्मेति कीर्त्तितम् ।
उदानकर्म्म तत्प्रोक्तं देहस्योन्नमनादिकम् ॥
शोषणादि समानस्य शरीरे कर्म्म कीर्त्त्यते ।
क्षेपणादिगुणो यश्च नागकर्म्मेति कीर्त्तितम् ॥
निमीलनादि कूर्म्मस्य क्षुत्तृष्णा कृकरस्य च ।
देवदत्तस्य देवेशि निद्रा तन्द्रेति कीर्त्तितम् ॥
धनञ्जयस्य शोषादि सर्व्वकर्म्म प्रकीर्त्तितम् ।
ज्ञात्वैवं नाडिकास्थानं वायुयानञ्च यत्नतः ॥

नाडीनां शोधनं कुर्य्याद्यथाविधि पुरः सरः ।
ततस्तपोवनं गत्वा फलमूलोदकान्वितम् ॥
तत्र रम्ये शुचौ देशे नद्यां देवालये पि वा ।
सुशोभनं स्थलं कृत्वा सर्व्वं रक्षा समन्वितं ॥
त्रिकालस्नान संयुक्तः शुचिर्भूत्वा समा [३२ ख] हितः ।
मन्त्रैर्न्न्यासैर्न्न्यस्ततनुः सितभस्मधरः सदा ॥
समस्थलो परिकुशान्समास्तीर्य्याथ राजिनं ।
विनायकं सुसंपूज्य कुशपुष्पोदकादिभिः ॥
गुरून्देवीन्नमस्कृत्य तत्र चावध्यचासनं ।
उदङ्मुखः प्राङ्मुखो वा पवित्रासन संगतः ॥
समग्रीव शिरः कायः संवृतास्यः सुनिश्चलः ।
सुषुम्णा वर्त्मना वायुं कुण्डलिन्यांधमेत्क्षणं ॥
गच्छत्यभिव्यक्तिमिदं नादब्रह्म सनातनम् ।
तन्नादो पिङ्गला मार्गे समानीय हृदब्जके ॥
इडया पूरयेत्ताव द्यावद्वर्णात्मकं भवेत् ।
भू मेरु परिधातारं रत्या विंदु समन्वितम् ॥
बिंबमध्यस्थमोंकार संपुटाकृतमुन्नतम् ।
एकीकृत्य तु तत्सर्व्वं माकर्षेद्धस्ति जिह्वया ॥
विश्वोदरालंबुषाभ्यां ब्रह्मरन्ध्रे निवेशयेत् ।
निवेश्यतां तत्र देवीं निराकारां विचिन्तयेत् ॥
एकां ज्योतिर्म्मयीं शुक्लां सर्व्वागां व्योमरूपिणीं ।
अत्यन्त निर्म्मलां शुद्धा मादि मध्यान्त वर्ज्जिताम् ॥
अतिसूक्ष्मानाकाशा मस्पृश्यातामःचाक्षुषीं ।
कुटस्थामप्य दृश्यां तां सच्चिदानन्द विग्रहां ॥

अगंधमरसां स्वच्छा मप्रेयामनूपमां ।
आनंदामजरान्नित्यां सदसत्सर्व्वकारिणीम् ॥
सर्व्वाधारां जगड्या ममृत्युं चाव्ययामजाम् ।
अनवस्थामप्रतर्क्यां वह्निस्थां सर्व्वतो मुखीं ॥
सर्व्वदृक् सर्व्वतः पादां सर्व्वस्पृकार्व्वतः शिरां ।
निरञ्जनीं निर्व्विकारां शुद्धचैतन्य रूपिणीं ॥
नादोपाहृतवीजेन ध्यायेस्तत्र यजेदिमां ।
कुलाकुल समुद्भूता ममृतानन्द संचयां ॥
सूर्य्यकोटि समां शुभ्रां नादवीज तया [३३ क] स्थितां ।
षट्चक्रभेदेन यजेद्योगे कुण्डलिनी हृदोः ॥
आधारपद्ममध्येन्तर्द्विपत्रे त्रिदलेपि च ।
स्वाधिस्थाने षोडशारे पीठे च मणिपूरके ॥
द्वादशे च विशुद्धे पि तत्राप्यष्टदले तथा ।
हृदये दशपत्रे तु द्वादशार्द्धे चतुर्द्दले ॥
कण्ठे भाले यजेद्देवीं जिह्वया नादमुच्चरन् ।
गच्छन्तीम्ब्रह्ममार्ग्गेण सूक्ष्मषट्चक्रभेदिनीं ॥
प्रद्योतदमृतं दिव्यं क्षीरधारोपमद्रवं ।
पीत्वा सदाशिवेनैव मामरस्यपदं गताम् ॥
यजेद्धयायेन्नमस्कुर्य्याद्यद्यदिछेदनन्यधीः ।
सामरस्यपदं प्राप्तां यः क्षणं चिन्तयेत्सुधीः ॥
राजसूयाश्वमेधानां तेनेष्टा यज्ञकोटयः ।
काष्ठांकलां क्षणं व्याप्य यः स्थितस्तत्र साधकः ॥
वाजपेयः पुण्डरीको विश्वजित्तेन वैकृतः ।
पुनस्तेनैव मार्ग्गेण नयेत्कुण्डलिनीमधः ॥

पश्यन्त्यापरया तत्र बैखर्य्या वर्त्मनापि च ।
संयोज्यनम्बिकामार्ग्गात्तालुमूलादधोनयेत् ॥
जिह्वयाकृष्यतां विद्यां हृदब्जे विनिवेशयेत् ।
आमूलाद्ब्रह्मरन्ध्रान्तमेकीभूतं विचिन्तयेत् ॥
हृदब्जादपि निः काश्य तथा नाडी च यादपि ।
प्रदीपकलिकाकारो कन्द एव निवेशयेत् ॥
एतदभ्यासयोगेन यत्फलं तच्छृणुष्वभो ।
न क्षुत्पिपासा न जरा न मृत्युर्न्नामयादि च ॥
पुरीषमूत्रेनैव स्यान्निद्रा तंद्रा भवेन्न च ।
यावान्दोषः शरीरस्य तेषु कोपि न जायते ॥
अतीतानागतं वेत्ति वाक्सिद्धिरपि जायते ।
सरस्वती तस्य मुखे स्वयमेत्य वसेत्सदा ॥
परार्द्धजीवी च भवेत्कामरूपी भवत्यपि ।
देवानाकर्षयेच्चापि खचरो [३३ ख] जायते तथा ॥
वर्णितुं शक्यते नास्य महिमा वर्षकोटिभिः ।
साक्षात्सरुद्रो भवति पाञ्चभौतिकदेहभृत् ॥
प्राप्नोति मोक्षमेवासौ षण्मासाभ्यन्तरे नरः ।
मोक्षैकसाधकस्यास्य विधेरन्यास्तु सिद्धयः ॥
केवलं विघ्नकारिण्य इत्येतद्विद्धि पार्व्वति ।
मूढास्तु केवलं सिद्धीरभिकांक्षन्ति नित्यशः ॥
मोक्षार्थमेव यतते धीरः संसारसागरे ।
नाड्यश्चतुर्द्दश प्रोक्ताः पूर्व्वं मुख्यतमाहि याः ॥
तासु वायुनिरोधेन भूयस्यः स्युर्हि सिद्धयः ।
तेषां प्रकारानाख्याता विस्तरत्वान्मया प्रिये ॥

केवलं सिद्धिहेतुत्वं तेषां नात्रोपयोगिता ।
विधिमेनं विधातुं यो न समर्थो विमूढधीः ॥
सचिन्तयेत्तु साकारां तां देवीं हृदयांबुजे ।
ध्यानं संप्रति वक्ष्यामि शृणु देवि समाहिता ॥
ध्यानमेव हि जन्तूनां कारणं सौख्यमोक्षयोः ।
हृत् पद्माष्टदलोपेते कन्दमूलसमुत्थिते ॥
द्वादशांगुल नालेस्मिश्चतुरंगुलमुच्छ्रिते ।
प्राणायामैर्व्विकसिते केशरान्वितकर्णिके ॥
हृत्सरोरुहमध्येस्मिन्प्रकृत्यात्मिक कर्णिके ।
अष्टैश्वर्य्यदलोपेते विद्याकेशरसंयुते ॥
ज्ञाननाले महाकन्दे प्राणायामप्रबोधिते ।
विश्वार्च्चिषं महावह्निं वमन्तीं सर्व्वतोमुखीं ॥
भयंकरी जगद्योनिं ललज्जिह्वाकरालिनीं ।
भासयन्तीं स्वकन्देहमापादतलमस्तकं ॥
प्रेतभूतपिशाचादिडाकिनीयोगिनी गणैः ।
भैरवाद्यैः परिवृतां श्मशानतलवासिनीम् ॥
ज्वलत्करालज्वलनचितामध्यकृतस्थितिं ।
शवोपरि समारूढां विमुक्तचिकु [३४ क] रोच्चयां ॥
निःक्रान्तरसनाकंपप्रकंपितजगत्रयां ।
दन्तमण्डलनिर्ग्गच्छच्चारुचंद्रिकया तया ॥
द्योतयन्तीं जगत्सर्व्वं चन्द्रमण्डलवत्सदा ।
तुंगपीवरवक्षोजभरनम्रकलेवरां ॥
प्रत्यालीढपदां देवीमट्टहासभयप्रदां ।
पार्श्वस्थिताभ्यां फेरुभ्यांमतीवविकरालिनीं ॥

नृमुण्डमालासन्दोहकृतमालाव गुण्ठिनी ।
सद्यः कृत्तनृमुण्डाभ्यां कुण्डलद्वयशोभिनीं ॥
कठोर पीवरानील दोः षोडशविराजितां ।
नरान्त्र विहितावद्य योगपट्टपरिच्छदां ॥
दिगंवरां खर्व्वतनुं हसन्तीं कामलालसां ।
संवर्त्तकालज्वलनदुर्न्निरीक्ष्यतनुप्रभां ॥
कल्पान्तघोषमार्त्तण्डकोटिस्तम्भनकारिणीं ।
निर्व्वातदीपवत्तस्मिन्दीपतां हव्यवाहने ॥
ततस्तस्य शिखामध्ये संस्थितां जगदंबिकां ।
ध्यात्वा कामकलाकालीं मोहमस्मीति भावयेत् ॥
तद्रूपतां समासाद्य मुक्तिं तेनैव गच्छति ।
अथवा सिद्धिलिप्सा चेद्भवत्येव न संशयः ॥
ध्यायन्वै पञ्चघटिकाः सर्व्वरोगैः प्रमुच्यते ।
घटिकादशकध्यानात्पृथिव्या जयमाप्नुयात् ॥
नाडी पंचदशध्यानाद्वह्निनासौ न दह्यते ।
घटिकाविंशतिध्यानाद्वायुवद्व्योमगो भवेत् ॥
मूत्रं पुरीषं जयति पंचविंशति नाडिभिः ।
संपूर्ण दिवसेनैव सर्व्वसिद्धिः प्रजायते ॥
अहोरात्रेण देवेशि जीवन्मुक्तो भवेन्नरः ।
इति योगविधिः सर्व्वः कथितस्ते मया क्रमात् ॥
उत्तमो मध्यमः पक्षस्तथैवाधम एव च ।
उत्तमो योगमार्ग्गेण मध्यमो ध्यानसंश्रयात् ॥
पूजाध्यानादिभिर्ज्ञेयो [३४ ख] प्यधमाराधनक्रमः ।
कृते युगे वा त्रेतायां योग एवोत्तमो विधिः ॥

ध्यानमेव द्वापरादौ कलौ न्यासार्च्चनं खलु ।
अल्पायुषोऽल्पमेधाश्च स्वल्पप्रज्ञा महालसाः ॥
दुराचारा नास्तिकाश्च कामलोभ परायणाः ।
सुदृशाश्च नराः सर्व्वे भविष्यन्ति कलौ युगे ॥
नायं योगो महेशानि भविष्यति गुरुं विना ।
केवलं न्यासपूजादि करिष्यन्ति फलार्थिनां ॥
तथाप्यास्थावतां देवि फलं किंचित्प्रयच्छति ।
एवं ज्ञात्वा तु यः कुर्य्याद्ध्यानन्यासार्च्चनानि हि ॥
अवश्यं फलभाग्भूयान्नात्र कार्य्या विचारणा ।
ध्यानेर्च्चने जपे न्यासे होमे च वलिकर्म्मणि ॥
भावना यादृशी यस्य सिद्धिः स्यादेवतादृशी ।
इति ते कथितो देवि प्रपञ्चः कामकालिकः ॥
वद सत्यं पुनर्म्मत्तः किमन्यच्छ्रोतुमिच्छसि ॥

इत्यादिनाथविरचितायां महाकालसंहितायां होमविधियोग प्रयोगो नाम द्विशताधिक सप्तचत्वारिंशः पटलः ॥

देव्युवाच ॥

महायोगिन्महाकाल कलानिधिविभूषित ।
सर्व्वज्ञ सर्व्वलोकेश धूर्ज्जटे भक्तवत्सल ॥
त्वत्प्रसादादिदं सर्व्वं प्रयोगं कामकालिकं ।
अश्रौषं सर्व्वमेवाह मप्रमत्तेन चेतसा ॥
अन्यद्रहस्यं यद्यत्स्यात्तच्चापि कथय प्रभो ।
आकर्णयन्त्याश्चेतो मे न तृप्तिमधिगच्छति ॥
देव्या रहस्यं यत्किंचिदेतद्व्यावर्त्तते विभो ।
तत्तत्सर्व्वमशेषेण कथय त्वं दयानिधे ॥

श्रीमहाकाल उवाच ॥

साधु देवि वरारोहे धन्यासि त्वं न संशयः ।
शृण्वन्त्या अपि ते यस्माच्छु [३५ क] श्रूषा नुक्षणं भवेत् ॥
चेतसा भक्तियुक्तेन शुश्रूषुर्य्योनसूयकः ।
तस्मै रहस्यं नाचष्टे यः सपापकृदग्रणीः ॥
तस्मात्तव प्रवक्ष्यामि रहस्यं यद्धि वेद्म्यहं ।
भक्तिश्रद्धापरायां ते नाकथ्यं विद्यते मम ॥
न चाख्ये यत्वयान्यस्य प्राणेषु विगलत्स्वपि ।
रहस्यमेतद्देवानां सर्व्वसिद्धिमभीप्सतां ॥
न कामकालिको योगो न विधानं शिवावलेः ।
नान्यप्रयोगो न जपो न होमो न च पूजनं ॥
वक्ष्यमाणरहस्यस्य सहस्रांशं न चार्हति ।
सिद्धिमीयुः पुरैतस्याः प्रासादात्पार्थिवर्षयः ॥
पौखो वृहदश्वश्च सोमदत्तो वृहद्रथः ।
अजमीढः कार्त्तवीर्य्यो भद्रश्रेण्यः पुरूरवाः ॥
पृथुर्ग्गयोरन्तिदेवो मांधाता नहुषो रघुः ।
विदूरथश्च भरतो दिवोदासः प्रतर्द्दनः ॥
कृशाश्वो यमदग्निश्च जैगीषव्यश्च देवलः ।
पैठीनसिर्व्वीतहव्यः कश्यपो भृगुरंगिराः ॥
सम्वर्त्तश्च वशिष्ठोत्रिर्व्यासः शातातपस्तथा ।
उद्दालको भरद्वाजो जाबालो जैमिनिस्तथा ॥
सप्तद्वीपेश्वरत्वं हि चक्रवर्त्तित्वमेव च ।
प्रापुः पूर्व्वे महीपालाश्चिरजीवित्वमप्यलं ॥

योगसिद्धिं तथाप्यन्ये तपस्यां सर्व्वसाधिकां ।
शापानुग्रहसामर्थ्यं प्राप्तवन्तो महर्षयः ॥
कथयामि तमेवाहं षोढान्यासं शुचिस्मिते ।
त्रैलोक्याधिपतित्वं हि यत्प्रसादात्करे स्थितं ॥
ताराक्षः कमलाक्षश्च विद्युन्माली तथैव च ।
एते ह्यासन्कृतयुगे दैतेया भ्रातरस्त्रयः ॥
तेऽतप्यंत तपो घोरं दिव्यं वर्षायुतं प्रिये ।
ततः प्रजापतिस्तेभ्यो वरं संप्रार्थितो द–[३५ ख] दौ ॥
वव्रुर्व्वरद्वयं दैत्यास्ते शौर्य्यमदगर्व्विताः ।
एकंत्वेषामवध्यत्वं सर्व्वभूतेभ्य उत्थितं ॥
द्वितीयं योजनानां त्रित्रिलक्षान्तरसंस्थितं ।
त्रयाणां त्रिपुरं भूयाद्दुर्ल्लंघ्यं त्रिदशैरपि ॥
वरं दत्वा वदद्धाता सर्व्वे शृणुत पुत्रकाः ।
सर्व्वप्रकारैः कस्याऽपि नावध्यत्वं जगत्त्रये ॥
एकेनापि प्रकारेणाघटमानेन सर्व्वथा ।
सर्व्वे स्वकीयं निधनमङ्गीकुरुत दानवाः ॥
ते विचार्य्याविदन्सर्व्वे शरेणैकेन यः क्षणात् ।
दहेत्त्रयाणां त्रिपुरं स नो मृत्युर्भविष्यति ॥
तथेत्युक्त्वा ययौ वेधा ब्रह्मलोकं सुरैर्व्वृतः ।
तेपि सर्व्वे तथा चक्रुर्य्यथा पूर्व्वं विचारितं ॥
ताराक्षस्य तु सौवर्णं पुरंसर्व्वोपरिस्थितं ।
योजनायुतविस्तीर्णं तावदेवायतं प्रिये ॥
राजतं कमलाक्षस्य योजनायुतविस्तृतं ।
दश तादृशविस्तीर्णं विद्युन्मालिन आयसं ॥

त्रि त्रिलक्षान्तरं तेषां पुरं गगनसीमनि ।
प्राकारपरिखोपेतं च याट्टालकशोभितं ॥
ध्वजगोपुरनिश्रेणी पताकायन्त्रशोभितं ।
खङ्गप्रासाङ्कुशाकिकगदाकार्म्मुकधारिभिः ॥
पाशशूलभुशुण्यर्ष्टिचक्रमुग्दरधारिभिः ।
त्रिशन्निखर्व्वषड्वृन्दनवत्यर्व्वुदकोटिभिः ॥
एकैकं पुरमाक्रान्तं दानवैर्य्युद्धदुर्म्मदैः ।
दृष्ट्वा तु तादृशीमृद्धिं देवाः सर्व्वे स वासवाः ॥
पलायां चक्रिरे केचित्केचिच्चापि तम्ययुः ।
केचिच्च युयुधुर्देवा स्तत्यजुस्त्रिदिवंपरे ॥
केचित्समुद्रं विविशुः केचिच्च गिरिगह्वरं ।
जहुः केचिद्भिया प्राणानगुः केचिच्चतुर्द्दिशं ॥
दृष्ट्वा सुराणामधिपो देवानामीदृशीं दशां ।
रुद्रं जगाम शर [३६ क] णं पुरोधाय प्रजापतिं ॥
दण्डवत्प्रणता भूत्वा ते देवाः सपितामहाः ।
ऊचुः प्रांजलयो भूत्वा पिनाकिनमुमापतिं ॥
तपस्यया वरं धातुः संप्राप्य त्रिपुरासुराः ।
वाधन्तेऽस्मान्महेशान् शैलगह्वरगानपि ॥
त्वत्तः शरण्यो नास्माकं विद्यते देव कञ्चन ।
अतो निवेदयामस्ते प्रमथाधिपते प्रभो ॥
देवांगनाः समाकृष्य नयन्ति स्वपुरं प्रति ।
निरध्वरं जगज्जातं निष्कल्पतरुनन्दनं ॥
निर्म्मनुष्या मही सर्व्वा निर्द्देवाप्यमरावती ।
निस्तोया निम्नगा जाता नीरत्नाः सागरा अपि ॥

पादपानां कोटरेषु कन्दरेषु महीभृतां ।
लीना भूत्वा वयं सर्व्वे तिष्ठामस्तद्भयार्द्दिताः ॥
तेषां हि शास्ता त्रैलोक्ये त्वदन्यो नास्ति कश्चन ।
तान्निहत्यासुरान्स्वर्ग्गे पुनरस्मान्निवेशय ॥
इत्युक्तः प्रणतैः सर्व्वैर्व्विहस्य वृषभध्वजः ।
प्रत्युवाच सुरान्सर्व्वान्रथो मे कल्प्यतामिति ॥
ततो ब्रह्मा ब्रवीत्तत्र स्मितं कुर्व्वन्महेश्वरं ।
निर्म्मातव्यो रथो देव कैस्त्वदारोहणक्षमः ॥
त्वद्वोढु रथनिर्म्माणे सामर्थ्यं कस्य विद्यते ।
स्वयोग्यं स्यन्दनं चास्त्रं स्वयमेवोपकल्पय ॥
इत्युक्तो ब्रह्मणा शंभु रवदद्धर्षयन्सुरान् ।
चत्वारो वाजिनो वेदाः संपूर्णमेदिनी रथः ॥
सूर्य्याचन्द्रमसौ चक्रे कूवरो गंधमादनः ।
विन्ध्यो गिरिर्न्नाभिरस्तु कैलासोक्षत्वमेव तु ॥
मेरुर्म्मे ध्वजदण्डः स्यात्सारथिर्भगवान्विधिः ।
प्रणवस्तु प्रतोदः स्यात्प्रकाशानि च रश्मयः ॥
धनुर्म्मे मन्दरो भूयात् शिञ्जिनी बासुकिर्भवेत् ।
विष्णुः शरो मे भवतु वाजे वायुर्व्वि [३६ ख] शत्वपि ॥
यमो मृत्युश्च कालश्च फली मध्ये विशन्तु च ।
वासवः शरपृष्ठे स्यात्कुवेरवरुणावुभौ ॥
भवतः पुंखसंस्थानौ लस्तके सर्व्वदेवताः ।
नासत्या वटनी संस्थौ यज्ञाः सर्व्वे पदातयः ॥
स्वेच्छयान्यच्च सकलं कल्पयामास शंकरः ।
स्वयोग्यं कवचं शंभुरलब्ध्वा चिन्तितोभवत् ॥

निमील्य त्रीणि नेत्राणि चिरं तस्थौ जगत्पतिः ।
अथ ध्यानगतो भूत्वा तुष्टाव जगदंबिकां ॥
श्रुत्वा संभेदयामासाभेद्यं कवचमात्मनः ।
ततः सोपदिदेशास्मै षोढ़ान्यासं महात्मने ॥
स्वीयं च कवचं देवी कवचत्वेन तं ददौ ।
तेनामुक्तो हरो भूत्वा जगाम त्रिपुरंप्रति ॥
अस्त्रं पाशुपतञ्चापि संधाय वृषभध्वजः ।
पुराणि त्रीणि दैत्यानां विभेदैकेन पत्रिणा ॥
क्षणेन भस्मसाद्भूता जग्मुर्दैत्या यमालयं ।
तमेव षोढ़ान्यासन्ते प्रवदामि वरानने ॥
यदेकवारं कृत्वैव भवेत्त्रिजगती पतिः ।
प्राणव्ययेपि नान्येषां कथनीयं कदाचन ॥
षोढान्यासस्याऽस्य ऋषिस्त्रिपुरारिमहेश्वरः ।
छन्दश्च जगती प्रोक्तं दे तेयं प्रकीर्त्तिता ॥
कान्दर्प्पर्णिन्तु वीजं स्यात्क्रोधः कीलकमुच्यते ।
माया वीजं च शक्तिः स्यात्कामना यद्यदिष्यते ॥
आदौ नृसिंहन्यासः स्याद्द्वितीयो भैरवस्य च ।
तृतीयोपि च विज्ञेयो न्यासः कामकलाभिधः ॥
चतुर्थे डाकिनीन्यासः शक्तिन्यासश्च पञ्चमे ।
षष्ठेपि देवीन्यासः स्यादथैतस्य विधिं शृणु ॥
वर्ग्गाः क च त टाः पंच षष्ठो यवलवस्तथा ।
सप्तमः श ष सा श्चापि हलक्षाश्चाष्टमः प्रिये ॥
ऋ[३७ क] षिर्नृसिंहन्यासस्य हयग्रीवः प्रकीर्त्तितः ।
गायत्रीछन्द इत्युक्तं नरसिंहोस्य देवता ॥

वीजानि वर्णा विज्ञेयाः स्वराः षोडशशक्तयः ।
विनियोगो नृसिंहस्य न्यास एवेति सम्मतः ॥
षड्भिर्द्दीर्घैः क्षवीजस्य करांगन्यास माचरेत् ।
पुनस्तद्वरारोहो तैरेव च षडंगकम् ॥
सविन्दु वर्ग्गमध्यस्थः कवर्ग्गोविंदु संयुतः ।
क्रमेणानेन देवेशि वर्ग्गा क च वर्गयोः ॥
अष्टा वृत्यो भवेन्न्यासस्ततश्चापि निवोधमे ।
सविन्दवो हलः सर्व्वे सृष्टिमार्ग्गेण चैककं ॥
त एव तादृशा ज्ञेयाः पुनः संहारवर्त्मना ।
सृष्टिस्थितिभ्यामन्तेपि न्यासः संपूर्ण उच्यते ॥
ज्वालामाली करालश्च भीमश्चैवापराजितः ।
क्षोभनश्च तथा सृष्टिः स्थितिः कल्पान्त इत्यपि ॥
अनन्तश्च विरूपञ्च वस्त्रायुध परापरो ।
प्रध्वंसनश्च विज्ञेयो विश्वमर्द्दन इत्यपि ॥
उग्रोभद्रश्च मृत्युग्रः सहस्रभुजइत्यपि ।
विद्युज्जिह्वा घोरदंष्ट्रा महाकालाग्निरेवच ॥
मेघनादश्च विकटस्तथापिंगलटोपि च ।
प्रदीपो विश्वरूपश्च विशुद्दशन एव च ॥
विदारो विक्रमश्चापि प्रचण्डः सर्व्वतो मुखः ।
वज्रो दिव्यश्च भोगश्च मोक्षा लक्ष्मीरपि क्रमात् ॥
विद्रावणः कालचक्रः कृतान्तस्तप्तहाटकः ।
भ्रामकश्च महारौद्रो विश्वान्तक भयङ्करौ ॥
प्रतप्तो विजयश्चापि सर्व्वतेजोमयस्तथा ।
ज्वाला जटालश्च खरनखरो नाद दारुणः ॥

निर्व्वाण नरसिंहश्चेत्येकपञ्चाशदीरिताः ।
अथ ध्यानं प्रबक्ष्यामि यत्कृत्वा न्यासमाचरेत् ॥
उद्य–[३७ ख] न्मार्त्तण्डकोट्यंशुसमारुणतनुप्रभाः ।
उत्रुकाकार पृथुलनेत्रत्रितय भूषिताः ॥
विदारिसृक्कनिर्गच्छद्दंष्ट्राचन्द्रकलान्विताः ।
विदीर्णविकरालास्यनिर्य्यज्जिह्वाविराजिताः ॥
विमुक्तचामराकारसटाकेशरमण्डिताः ।
आवद्धयोगपट्टान्ताजानुन्यस्तकरांबुजाः ॥
कोटिकल्पान्तार्क्कसमा भीमदंष्ट्राट्टहासिनः ।
कौस्तुभोद्भासि हृदयाः श्वेतपद्मोपरिस्थिताः ॥
किरीटहारकेयूरकिंकिण्यंगदशोभिताः ।
मुखैः कल्पान्तकालाग्नि वमन्तः सर्व्वतोमुखाः ॥
करालभृकुटी दृष्टि संत्रासितजगत्त्रयाः ।
नखनिर्भिन्नदैत्येन्द्ररुधिरोक्षितवाहवः ॥
विपाटितान्तानिर्ग्गच्छद्वसालिप्ताङ्ककुक्षयः ।
अस्त्रैर्व्विभूषितान्दीर्घान्भुजान्षोडश विभ्रतः ॥
शरं चक्रं गदा खड्गं पाशमंकुशमेव च ।
वज्रविदारणं चापि दक्षिणेन क्रमादपि ॥
धनुः शंखं च पद्मञ्च खेटकं मुशलं तथा ।
परशुं पट्टिशं चापि विदारणमतः परं ॥
वामेन धारयन्तस्ते रत्नाकल्पविराजिताः ।
वामजंघासन्निविष्टलक्ष्मीकाः सिद्धिदायिनः ॥
स्थिता देव्याश्चतुर्द्दिक्षु नरसिंहा वरानने ।
मातृकान्याससंस्थाने न्यसेत्साधकसत्तमः ॥

एषते कथितो देवि नृसिंहन्यास उत्तमः ।
अथातो भैरवन्यासं प्रवदामि निवोधमे ॥
अस्य भैरवन्यासस्य ऋषिस्तावत्प्रकीर्त्तितः ।
कालाग्नि रुद्रश्छन्दश्च जगती संप्रकीर्त्तिता ॥
भैरवो देवता प्रोक्ता क्रोधवीजं च वीजकम् ।
शक्तिरङ्कुशवीजञ्च देवि ते परि [३८ क] कीर्त्तितं ॥
विनियोगोस्य विज्ञेयो भैरवन्यास एव हि ।
करांगन्यासमेतस्य षडंगन्यासमेव च ॥
चण्डवीजेन कर्त्तव्यं दीर्घैः षड्भिः समन्वितं ।
आदौ तारं समुल्लिख्य द्वितीयं वाग्भवं वदेत् ॥
तृतीया तु तृतीयं स्याद्रमावीजं चतुर्थकं ।
पञ्चमं शृणिमुद्दिष्टं प्रासादं षष्ठमुच्यते ॥
सप्तमं क्रोधवीजं स्यान्महाक्रोधं तथाष्टमं ।
तत्तद्भैरवनामापि ङेन्तमुच्चारयेत्ततः ॥
पुनरप्यष्टवीजानि प्रतिलोमेन चोद्धरेत् ।
हार्द्देन मनुनायुक्तौ मनुः सर्व्वाऽर्थसाधकः ॥
पूर्व्ववन्मातृकास्थानं सर्व्वत्रैव वरानने ।
भैरवानामथो नाम गदतो मेवधारय ॥
क्रोधः श्मशानः कापाली कालः कालान्तकोरुरुः ।
महाघोरो घोरतरः संहारश्चण्ड इत्यपि ॥
हूंकारो नादिरुन्मत्तञ्चानन्दस्तदनन्तरं ।
भूताधिपः कृतान्तो सिताङ्गः कालाग्निरित्यपि ॥
उग्रायुधश्च वज्राङ्गः करालस्तदनन्तरं ।
विकरालो महाकालः कल्पान्तोपि ततः परं ॥

विश्वान्तकः प्रचण्डश्च भगमाल्युग्र एव च ।
भूतनाथश्च भद्रश्च तथा संपत्प्रदोपि च ॥
मृत्युर्य्यमान्तकश्चाऽपि ततोश्चोल्कामुखः स्मृतः ।
एकपादस्तथा प्रेतो मुण्डमाली ततः परं ॥
वटुकः क्षेत्रपालश्च ततोपि च दिगम्बरः ।
वज्रमुष्टिर्घोरनादश्चण्डोग्रोपि प्रकीर्त्तितः ॥
संढापनः क्षोभणश्च ज्वालासम्वर्त्त एव च ।
वीरभद्रस्त्रिकालाग्निः शोपणस्त्रिपुरान्तकः ॥
भैरवा एक पञ्चाश देते देवि प्रकीर्त्तिताः ।
ध्यानमेषाम्भैरवाणां कथ्यमानं मया [३८ ख] शृणु ॥
ज्वलद्धुत वहज्वाला श्मशानस्थलचारिणः ।
पादालंविजटाभारा मसीपुंजसमप्रभाः ॥
ज्वलच्छ्रेताकुण्डनिभलोचनत्रयभूपिताः ।
लंवोदराः पिंगजटाः स्थूलाः खर्व्वकलेवराः ॥
नृमुण्डमालाघटितहारग्रैवेयकोज्ज्वलाः ।
मज्जासृग्मांसमेदोस्थिवसासम्पूरिताननाः ॥
घोरदंष्ट्राललजिह्वाः करालमुखमण्डलाः ।
शवोपरिकृतावासा अट्टहास भयानकाः ॥
द्विशीर्षाश्च त्रिशीर्षाश्च तथा विंशतिमौलयः ।
शतशीर्षास्त्रिपादाश्च बहुपादा अपादकाः ॥
त्रिशूलचक्रपरिघगदामुसलतोरणान् ।
भुशुण्डीचापविशिखपाशपट्टिशमुग्दरान् ॥
परश्वङ्कुशखट्वांग्रभिदपालेष्ट्ययोगुडान् ।
कुन्तप्रासहुनायष्टिशक्ति छुरिककर्त्तृकान् ॥

मुष्टिनीचर्म्मकणय नागपाशाक्षछुछुकाः ।
घंटाखर्प्परपाषाणास्तथा तर्ज्जनमेव च ॥
धारयन्तः करैः सर्व्वे व्याघ्रचर्म्मावगुण्ठिताः ।
एवं ध्यात्वा न्यसेद्देवि मातृकान्यासवर्णवत् ॥
एष द्वितीयस्ते प्रोक्तो भैरवन्यास उत्तमः ।
अतः कामकलान्यासं समाकर्णय भाविनि ॥
चिकीर्षयापि यस्य स्याद्देवी प्रत्यक्षरूपिणी ।
अस्य कामकलाख्यस्य न्यासस्य जगदम्बिके ॥
ऋषिश्च दक्षिणामूर्त्तिर्म्महादेवः प्रकीर्त्तितः ।
छन्दश्चवृहती ख्यातं देवता सा प्रकीर्त्तिता ॥
येयं कामकलाकाली कामार्णं वीजमुच्यते ।
रतिवीजं हि शक्तिः स्याद्विनयोगं च मे शृणु ॥
देवि कामकलान्यासे एवमेव प्रकीर्त्तयेत् ।
[३६ क] कराङ्गन्यासमादध्यात्षडङ्गन्यासमेव च ॥
धरारूढेण विधिना षड्दीर्घेनाचरेदिमं ।
अथ मन्त्रं निवोधास्य न्यासस्य जगदम्बिके ॥
पाशाभूतं समुद्धृत्य फेत्कारीं प्रेतमुद्धरेत् ।
कालीञ्च गारुडं कालं विद्युन्मेघौ समाहरेत् ॥
अमृतं नागवीजञ्च खेचरीञ्च ततो वदेत् ।
रतित्रयं कामयुगं ङेन्ता कामाभिधा ततः ॥
ततश्च मूलमन्त्रः स्यात्त्रिरतिः कामयुक्ततः ।
हार्द्देन मनुना युक्तस्त्रैलोक्यैश्वर्य्यसाधकः ॥
आद्योनङ्गः समाख्यातस्ततः कन्दर्प्प उच्यते ।
रतिप्रियः पञ्चशरः सुरतातुर इत्यपि ॥

मनोभवस्ततो ज्ञेयः कुसुमायुध इत्यपि ।
चित्ततर्ज्जन इत्येवं मन्मथस्तदनन्तरं ॥
संमोहनो यौवनेशो मदनस्तदनन्तरं ।
हृत्क्षोभकश्चाकर्षकः कलिवल्लभ एव च ॥
चित्तविद्रावणश्चापि दर्प्पको भ्रामकस्तथा ।
त्रिलोकी वशकारी च मकरध्वज इत्यपि ॥
उन्मादकोऽधकारी च चण्डवेगस्ततो वदेत् ।
मारउच्चाटनश्चापि तथा व्यामोहदाय्यपि ॥
पुष्पधन्वा स्मरश्चापि ततः सन्तापनः स्मृतः ।
मनःप्रमाथी भगदो मीनकेतुरितः परं ॥
उपस्थगो योनिवासी तथा मनसिजोपि च ।
पुष्पचापो यौवतेशस्तथा विश्वोपताप्यपि ॥
वसन्तमित्रो मलयकेतुश्चेतः प्रमादनः ।
क्रथनश्चण्डतेजाश्च धर्म्माधर्म्मप्रवर्त्तकः ॥
कोमलायुध इत्येवं प्रमर्द्दन इतः परं ।
त्रिलोकी सुखदः पश्चात्पिकदुंदुभिरेव च ॥
अलिमाली जगज्जेता कामान्ते च प्रकीर्त्तितः ।
कामा इत्येकपञ्चा [३९ ख] शद्देव्याः पारिषदाः स्मृताः ॥
शृणु देवि ध्यानमेषां यद्ध्यात्वा न्यासमाचरेत् ।
रत्नसन्दोहसंशोभिकिरीटोज्ज्वलमौलयः ॥
माणिक्यशकलोद्भासं कुण्डलद्वयशोभिताः ।
शरत्पार्व्वणशीतांशुसमानमुखदीप्तयः ॥
माणिक्यखंडभ्रमकृद्दन्तमण्डलमण्डिताः ।
विशाललोचनयुगाः श्यामकुञ्चितमूर्द्धजाः ॥

कङ्कणाङ्गदकेयूरमुक्ताहारविराजिताः ।
वल्गत्कुण्डलसंशोभिकपोलद्वयराजिताः ॥
गौरा हसन्तश्चपलाः सर्व्वे सर्व्वाङ्गसुन्दराः ।
पौष्पं चापं करे वामे दक्षिणे पंचसायकान् ॥
दधतश्चित्रवसना मञ्जीररणितांघ्रयः ।
पिककोकिल ऊंकार वसन्तमलयानिलैः ॥
सेव्यमाना मुदास्वस्वशक्त्यालिङ्गितमूर्त्तयः ।
सर्व्वे देव्याश्च पुरतो नृत्यन्तः सस्मिताननाः ॥
तत्तत्कलाभिः सहिता ध्यातव्याः सिद्धिदायिनः ।
अथ प्रवक्ष्ये ते देवि डाकिनीन्यासमुत्तमं ॥
यदाचरन्नरो याति समग्रैश्वर्य्यपात्रतां ।
न्यासस्य डाकिनीनाम्नो विरूपाक्ष ऋषिर्म्मतः ॥
पंक्तिश्छन्दः समाख्यातं डाकिन्यो देवता अपि ।
वीजं तु डाकिनीवीजं खेचरी शक्तिरुच्यते ॥
डाकिनीन्यास एवास्य विनियोगः प्रकीर्त्तितः ।
षड्दीर्घैर्डाकिनीवीजैः षडङ्गन्यासमाचरेत् ॥
वाग्भवं च पराकूटं मायां लक्ष्मीं ततः परं ।
क्रोधवीजं वधूवीजं योगिनीवीजमेव च ॥
शाकिनी कामवीजे च धनदावीजमेव च ।
काली चण्डांकुशार्णञ्च वीजानीह त्रयोदश ॥
सनाम डा—[४० क] किनी ङेन्तं सर्व्वशेषेनमः पदं ।
मातृकान्यासवत्स्थानमासां देवि प्रकीर्त्तितं ॥
डाकिनीनां च नामापि गदतो मेवधारय ।
महारात्रिः कालरात्रिर्व्विरूपा च कपालिनी ॥

महोत्सवा गुह्यनिद्रा ततो दोर्द्दण्डखण्डिनी ।
वज्रिणी शूलिनी चापि विमला च महोदरी ॥
कुरुकुल्या कौमुदी च कौलिनी कालसुन्दरी ।
बलाकिनी फेरवी च ज्ञेयाडमरुका तथा ॥
घटोदरी भीमदंष्ट्रा ततश्च भगमालिनी ।
मेना तारावती भानुमती तदनुकीर्त्तिता ॥
एकानंगा केकराक्षीन्द्राक्षी संहारिणा तथा ।
प्रभञ्जना भ्रामरी च प्रचण्डाक्ष्यपराजिता ॥
विद्युत्केशी महामारी शोषिणी वज्रनख्यपि ।
सूची तुण्डी जृंभका च तीव्रा प्रस्वापनी ततः ॥
ज्वालिनी चण्डघण्टा च लम्बोदर्य्यग्निमर्द्दिनी ।
एकदन्तोल्कामुखी च सूपजिह्वा च घोणकी ॥
पूतना वेगमाला च ततो जालंधरी मता ।
एकपञ्चाशदित्येता डाकिन्यः परिकीर्त्तिताः ॥
नमस्कृताः स्तुता ध्याताः प्रयच्छन्त्युत्तमां श्रियं ।
विपरीतेन विधिना साधकं भक्षयन्ति तं ॥
ध्यानं ब्रवीम्यथैतासां यत्कृत्वा न्यासमाचरेत् ।
काश्चिद्वन्धूकसदृशाः काश्चिन्नीलघनप्रभाः ॥
काश्चिन्मार्त्तण्डबिंबाभ देहद्युतय ईरिताः ।
काश्चित्स्फटिकखण्डाभाः काश्चित्स्वर्णसमप्रभाः ॥
दीर्घकर्णचलद्घोरनृमुण्डाङ्कितकुण्डलाः ।
शुष्कस्तनकपोलोरोजंघाग्रीवामुखोदरीः ॥
नरास्थिकृतसर्व्वाङ्गभूषणा घोरदर्शनाः ।
ज्वलच्चित्ताग्निजिह्वाभजटामण्डलमण्डिताः ॥

अर्द्धचन्द्रसमुद्भासि ललाट [४० ख] तटपट्टिकाः ।
विदीर्णमुखनिर्ग्गच्छज्जिह्वादंष्ट्राविराजिताः ॥
पादालंविजटाभारा श्मशानस्था दिगंवराः ।
भूतप्रेतपिशाचाद्यैः सज्जन्त्यः कामलालसाः ॥
दोर्भ्यामादाय कुणपा निलन्त्यः पितृकानने ।
त्रासयन्त्यस्तर्ज्जन्त्यो जगदेतच्चराचरं ॥
दीर्घैर्भुजैर्द्धारयन्त्यः शस्त्रास्त्राणि च भूरिशः ।
वाणान्धनूंषि परिघान्क्षुपाणांस्तोरणान्गदाः ॥
खट्वाङ्गानि त्रिशूलानि कुठारान्मुद्गरानपि ।
भिन्दिपालान्भुसुण्डीश्च शक्तीश्चक्राणि पट्टिशान् ॥
हुनाः प्राशांश्च कणपान्मुशलानङ्कुशान् गुडान् ।
चर्म्माणि घंटाडमरून्भेरीजर्ज्जरमर्द्दलान् ॥
सवसासृक्पलास्थीनि खर्प्पराणि वहूनि च ।
नृत्यन्तश्चच्चरीशब्दैः प्रकम्पितजगत्त्रयाः ॥
कोटिविद्युद्दुर्न्निरीक्ष्यज्वलच्चपलतारकाः ।
दीर्घातिशुष्ककठिनगर्त्ता भुग्नकलेवराः ॥
देव्याः परिषदीभूता वद्धांजलिपुटद्वयाः ।
किंकर्य्य आज्ञाकारिण्यः सर्व्वादेव्याः पुरः स्थिताः ॥
एवंरूपाः प्रधातव्या डाकिनीन्यासकारिणा ।
अतः शृणु वरारोहे शक्तिन्यासमनुत्तमं ॥
यदाचरन्सिद्धिमिष्टामाप्नोति शतवासरैः ।
शक्तिन्यासस्य देवेशि ऋषिः कपिल उच्यते ॥
छन्दोनुष्टुप्समाख्यातं देवता शक्तयस्त्विमाः ।
लज्जावीजं तु वीजं स्याच्छक्तिश्च कमलार्णकं ॥

न्यासस्य विनियोगोस्य शक्तिन्यासे प्रकीर्त्तितः ।
अग्न्यारूढाकाशवीजैः षडंगन्यासमाचरेत् ॥
षड्भिर्द्दीर्घैः समेतैश्च करांगन्यासमेव च ।
तारमायारमाक्रोधकालीकामांकुशामृतैः ॥
शक्तिनाम चतुर्थ्यन्तं दत्वा तदनुकीर्त्त [४१ क] येत् ।
कवर्गाद्यार्णयुगल मवर्गेणान्वितं प्रिये ॥
ततः प्रासादमुद्धृत्य महाक्रोधं च गारुडं ।
अस्त्रत्रितयमुद्धृत्य स्वाहान्तो मनुराडसौ ॥
चवर्गेवर्गयोरेवं टवर्गोवर्गयोरपि ।
तवर्गर्व्वर्गयोरेवं पवर्ग ल्वर्गयोरपि ॥
यवर्गैवर्गयोः पश्चाछवर्गौ वर्गयोरपि ।
स्वरान्त्यवर्गसंयुक्तो हवर्गस्तदनन्तरं ॥
पुनः स्वरान्तमुच्चार्य्य वर्गान्तित्र्यक्षरं वदेत् ।
आवृत्तयश्चतस्रः स्युः सर्व्वशेषविवर्ज्जितं ॥
उक्ता मयैते शक्तीनां मन्त्राः सर्व्वार्थसाधकाः ।
नामानि तासामधुना समाकर्णय पार्व्वति ॥
सूक्ष्मा जया तथा माया प्रभा च विजया पुनः ।
सुप्रभा नन्दिनी पश्चाद्विशुद्धिः कान्तिरुन्नतिः ॥
कीर्त्तिर्व्विभूतिर्हृष्टिश्च व्युष्टिः सन्नतिरुन्नतिः ।
ऋद्धिरुत्कृष्टिरजिता तथा चैवापराजिता ॥
नित्या सरस्वती श्रीश्च स्मृतिर्ल्लक्ष्मीरुपा धृतिः ।
बुद्धिः श्रद्धा मतिर्म्मेधा विद्या प्रज्ञा प्रकीर्त्तिता ॥
इच्छा क्रिया तथा माया दीप्ता प्रीतिस्ततः परं ।
नीतिः सृष्टिः स्थितिर्ज्ञेया संहृतिश्चेतनापि च ॥

सत्या शान्ती रतिर्भद्रा रौद्री ज्येष्ठा च विद्युता ।
एकपञ्चाशत्तमा च ज्ञेया शक्तिः परापरा ॥
इत्येताः शक्तयः सर्व्वा देव्याः पारिषदाः मताः ।
देव्यास्तनौ च सम्विष्टा ध्यानमासां निशामय ॥
निरंकपूर्णिमापूर्णचन्द्रबिंबसमाननाः ।
विशालफुल्लराजीवदलशोणायतेक्षणाः ॥
विलसद्रत्नताटंकश्रवणाभरणोज्वलाः ।
मन्दारमालासंनद्धधम्मिल्लभरगर्व्विताः ॥
विशालजघनाभोगा अति [४१ क] क्षीणकटिस्थलाः ।
कठोरपीवरोत्तुङ्गवक्षोजयुगलान्विताः ॥
रत्नमञ्जीरकेयूरकङ्कणाङ्गदशोभिताः ।
किङ्किणीहारमुकुटमुद्रिकावलयान्विताः ॥
त्रैलोक्यसारसौन्दर्य्ययौवनोन्मादगर्व्विताः ।
सिंहासनसमारूढा विचित्रविविधाम्बराः ॥
स्वच्छशीतांशुशकलविराजितललाटिकाः ।
सुशुक्लमाल्यललिताः स्व स्व चेटीगणैर्व्वृताः ॥
गौरांगदेहसंशोभिचन्दनागुरुचित्रकाः ।
सुस्मितोद्भासिवदनचञ्चद्दशनपंक्तयः ॥
कराभ्यां धारयन्त्यस्ता वराभयमनुत्तमं ।
न्यसनीयस्थानगता देव्यास्तु तत्तनौ प्रिये ॥
एवं ध्यात्वा चरेन्न्यासं सर्व्वकामार्थसिद्धये ।
अथ षष्ठो वरारोहे देवीन्यासः प्रकीर्त्यते ।
षोढान्यासः समग्रोपि यत्र देवि प्रतिष्ठितः ॥

वक्तुं न शक्यो महिमा यस्य वर्षायुतैरपि ।
या जामले कृतोद्धारा डामरे याः प्रकीर्त्तिताः ॥
भीमातन्त्रे च याः प्रोक्ताः याः प्रोक्ताः कौलिकार्णवे ।
देव्यस्ता एकपंचाशत्समन्त्रध्यानपूर्व्विका ॥
न्यसनीयास्तनौ देवि ताभां मंत्रं समुच्चरेत् ।
देवीन्यासस्यास्य ऋषिः सदाशिव इतीरितः ॥
जगत्यनुष्टुव्वृहती गायत्रीपंक्तयोपि च ।
छन्दांसि कथितानीह देवता परिकीर्त्तिता ॥
देवी कामकलाकाली वीजकामस्य वर्ज्जिता ।
क्रोधवीजं तु शक्तिः स्याद्विनियोगः प्रकीर्त्तितः ॥
देवीन्यास कामवीजैः षडंगन्यासमाचरेत् ।
कराङ्गन्यासमेतैश्च षड्दीर्घैराचरेद्‌वुधः ॥
आदौ नाम वदाम्यासां मन्त्रध्याने ततः परं ।
कथ [४२ क] यिष्यामि विधिवत्सावधानं मनः कुरु ॥
आदौ ज्ञेया महालक्ष्मीस्ततो वागीश्वरी मता ।
अश्वारुढा च मातंगी नित्यक्लिन्ना ततः परम् ॥
भुवनेशी तथोच्छिष्ट चाण्डाली भैरवी ततः ।
शूलिनी वनदुर्ग्गा च त्रिपुटात्वरिता ततः ॥
अघोरा जयलक्ष्मीश्च वज्रप्रस्तारिणी ततः ।
पद्मावत्यन्नपूर्णा च कालसंकर्षणी ततः ॥
धनदा कुक्कुटी भोगवती च शवरेश्वरी ।
कुब्जिका सिद्धलक्ष्मीश्च वाला च त्रिपुरा ततः ॥
तारा दक्षिणकाली च छिन्नमस्ता त्रिकण्टकी ।
ततो नील पताका च चण्डघण्टा ततः परं ॥

चण्डेश्वरी भद्रकाली गुह्यकाली ततः परं ।
अनङ्गमाला चामुण्डा वाराही वगलापि च ।।
जयदुर्ग्गा नारसिंही ब्रह्माणी वैष्णवी ततः ।
माहेश्वरी तथेन्द्राणी हरसिद्धा ततोपि च ।।
फेत्कारी लवणेशी च नाकुली मृत्युहारिणी ।
ततः कामकलाकालीत्येकपञ्चाशदीरिताः ।।
एकैकस्या महादेव्या मूलमन्त्रेण साधकः ।
अकारादि क्षकारान्त स्थानेषु न्यसनं चरेत् ।।
अथासां मूलमन्त्रांस्तान्क्रमादुद्धारयाम्यहं ।
ध्यानञ्च मन्त्रानुगदं यदाम्नायेषु कीर्त्तितं ।।
वाग्भवं कामलं मायां कामवीजन्ततः परं ।
चतुरक्षर मंत्रोयं महालक्ष्म्याः प्रकीर्त्तितः ।।
पूर्णचन्द्राननां लक्ष्मीमरविन्दोपरिस्थितां ।
गौरांगी विविधाकल्प रत्नाभरण मण्डितां ।।
क्षौमावद्ध नितंवान्ताम्वराभयकरद्वयां ।
श्वेतैश्चतुर्भिर्द्विरदैः शुण्डदण्ड निवेशितैः ।।
हिरण्मयामृतघटैः सिच्यमानां विभा [४२ ख] वयेत् ।
अथ वागीश्वरी मन्त्र स्तारं माया च वाग्भवः ।।
पुनर्म्माया पुनस्तारो ङेन्तापि च सरस्वती ।
अन्ते हृन्मनुनाज्ञेयो मन्त्रोहद्येकादशाक्षरः ।।
ध्यायेद्वागीश्वरीं देवीं हंसारुढां हसन्मुखीं ।
पूर्णेन्दुवदनां कुन्द कर्प्पूर सित विग्रहां ।।
अर्द्धेन्दु विलसद्भालां दिव्याभरणभूषितां ।
विशाल लोचनां तुङ्गस्तनीं स्मित मनोहराम् ।।

पीयूषकुंभं विद्याञ्च वामे सम्विभ्रतीं शिवां ।
वीणा मक्षगुणान्दक्षे धारयन्तीं चतुर्भुजां ॥
त्वाध्या तु मूलमन्त्रेण साधको न्यास माचरेत् ।
अश्वारूढा तृतीयास्यादस्यामन्त्रं निवोध मे ॥
तारं लज्जां रमां क्रोधं कामं पाशन्ततः परं ।
अश्वारूढा चतुर्थ्यन्ता ततोस्त्रद्वितयं वदेत् ॥
वह्निजायान्तगो मन्त्रो ज्ञेयः पंच दशाक्षरः ।
ध्यानञ्चास्याःकथ्यमानं निवोध वरवर्णिनि ॥
पूर्णशारदशीतांशुसमानवदनां शिवां ।
सन्तप्तकाञ्चनानासं विशालाम्बुजलोचनां ॥
व्यालंवमानवेणीकां स्थितां जवनवाजिनि ।
करे च दक्षिणे वाणं वामे रश्मिं च वाजिनः ॥
चन्द्रखण्डलसद्भालां वेत्रं पद्मं च विभ्रतीम् ।
निशामयाथ मातङ्गीमन्त्रं सर्व्वार्थसाधकं ॥
वाग्भवं च त्रपा लक्ष्मीस्ततः प्रणव एव च ।
नमो भवगवतीत्युक्त्वा मातङ्गेश्वरि चोद्धरेत् ॥
ततः सर्व्वजनेत्येवं मनोहरि पदन्ततः ।
पुनः सर्व्वमुखेत्युक्त्वा रञ्जिनीति समुद्धरेत् ॥
तत उच्चारयेदेवं सर्व्वराजवशङ्करि ।
सर्व्वस्त्रीपुरुषेत्युक्त्वा वशंकरि ततो वदेत् ॥
सर्व्वदुष्टमृगानाष्य ततश्चापि वशङ्करि ।
[४३ क] ततोपि चोद्धरेदेवं सर्व्वसत्ववशंकरि ॥
सर्व्वलोकममुं मे च वशमानय चेत्यपि ।
शिरोन्तोमनुरुद्दिष्टो वश्यकर्म्मं फलप्रदः ॥

रत्नपीठोपरिगतां सान्द्रनीरदसच्छविं ।
शृण्वतीं कीरपोतस्य कलभापितमुत्तमं ॥
न्यस्तैकपादां कमले वालेन्दुकृतशेखरां ।
करपल्लवयुग्मेन वीणावादनतत्परां ॥
आपादपद्मलंविन्या रम्यां कल्हारमालया ।
तिलकोद्भासिवदनां वारुणीपानविह्वलां ॥
अथ धारय चेतस्त्वं नित्यक्लिन्ना मनौमनः ।
प्रणवं वाग्भवं वीजं मायिकन्तदनन्तरं ॥
नित्यक्लिन्ने समुद्धृत्य ततोपि च मदद्रवे ।
सवाग्भवत्रपस्वाहामनुः पञ्चदशाक्षरः ॥
रक्ताङ्गीयौवनोद्भिन्नपीनवक्षोरुहद्वयां ।
त्रिनेत्रां मदिरापानविह्वलाङ्गींशिवप्रियां ॥
रक्ताऽङ्गरागवसनाभरणां सस्मिताननां ।
वालेन्दुमौलिमरुणसरोरुहकृतस्थितिं ॥
कल्पवल्लीं कपालञ्च वामतो विभ्रतीं शिवां ।
पाशाङ्कुशादौ दक्षिणे च धारयन्तींविचिन्तयेत् ॥
शृणु षष्ठीं महादेवीमतस्त्वं भुवनेश्वरीम् ।
पाशलज्जाङ्कुशैरेव मन्त्रस्त्र्यक्षर एव च ॥
महिमा वर्णितुं देवि न शक्यस्त्रिदशैरपि ।
भुवनेशीमथध्यायेत्सिन्दूरारुणविग्रहां ॥
त्रिलोचनां स्मेरमुखीं चन्द्रार्द्धकृतशेखरां ।
पीनवक्षोरुहद्वन्द्वां सर्व्वाभरणशोभितां ॥
माणिक्य रत्नकुम्भस्थसव्यपादां करद्वये ।
विभ्रतीं रत्नचषकं रक्तोत्पल मथापि च ॥

अथ वक्ष्येहमुच्छि[४३ ख]ष्टचाण्डालीमन्त्रमादृतं ।
आदौ संवोधने देव्याः सुमुखी तद्वदेव च ॥
ततो देवि महाप्रोच्य वदेत्पश्चात्पिशाचिनी ।
माया वीजं विसर्ग्गेण सहितं च त्रयं ततः ॥
द्वात्रिंशत्यक्षरो मन्त्रः सर्व्वसिद्धिविधायकः ।
ध्यानमस्याः प्रवक्ष्यामि यथावज्जगदीश्वरी ॥
शवोपरि समासीनां रक्तांवर परिच्छदां ।
रक्तालंकार संयुक्तां नीलमेघसमप्रभां ॥
ईषद्धास्यसमायुक्तां गुञ्जाहारविराजितां ।
षोडशाब्दाञ्च युवतीं पीनोन्नत पयोधरां ॥
कपालकर्त्तृकाहस्तां सर्व्वाभरण भूषितां ।
अथ ब्रवीमि भैरव्या मंत्रमागम गोपितं ॥
यन्नकस्य चिदाख्यातं न कस्मा अपि केन च ।
न कीलितं न शप्तञ्च स्तम्भितं च कैरपि ॥
पञ्चकूटात्मिकाविद्या मुद्धरामि शृणुष्वतां ।
खं खपूर्व्वो विधिर्भूमि स्तार्त्तीयकविराजितः ॥
नभोवह्निविधिक्षोणीसवह्निधनदार्णकं ।
तृतीयं कुटं फेत्कारी चतुर्थी शांकरी भवेत् ॥
पञ्चमी व्योमकुटाख्या सर्व्वकामफलप्रदा ।
कथयामि ध्यानमस्या यद्विधायन्यसेत्तनुं ॥
उद्यत्सहस्रमार्त्तण्डकान्तिमिन्दुकलोज्वलां ।
त्रिनेत्रां पीनवक्षोजां पद्मासनपरिस्थितां ॥
सर्व्वाभरणसम्पूर्णां पूर्णयौवनशालिनीम् ।
चतुर्भुजां जपवटीं दक्षिणे विभ्रतीं वरं ॥

वामे विद्यामभीतिं च धारयन्तीं विचिन्तयेत् ।
अथाकर्णय शूलिन्या मन्त्र ध्यानञ्च पार्व्वति ॥
ज्वलयुग्मं समुद्धृत्य वदेत्तदनु शूलिनी ।
दुष्टग्रह समाभाष्य क्रोधवीजमथोद्धरेत् ॥
अस्त्रं शिरः [४४ क] स्तुतः पञ्चान्मनु पञ्चदशाक्षरः ।
ध्यायेन्मृगेन्द्रमारुढां सतोयजलदच्छविं ॥
त्रिनेत्रां विभ्रतीं भालं चन्द्रखण्डावतंसितं ।
ददतीं द्विषतां भीतिं युद्धोद्यतकलेवरां ॥
देवीमष्टभुजां घोरभृकुटीभीषणाकृतिं ।
पद्मं गदां धनुर्म्मुण्डं वामे संविभ्रतीं क्रमात् ॥
त्रिशूलं करवालं च विशिखं पाशमेव च ।
धारयन्तीं दक्षिणेन सर्व्वालंङ्कार मण्डितां ॥
कृपाणखेटकौ दोर्भ्यां विभ्रतीभिरहर्न्निशं ।
कन्यकाभिश्चतसृभिः सेव्यमानां विचिन्तयेत् ॥
अथातो वनदुर्गायाष्प्रवक्ष्ये मनुमुत्तमं ।
तारं वाग्भवमुद्धृत्य लक्ष्मीं लज्जां च योगिनीम् ॥
क्रोधमंकुशमुल्लिख्य शिरोन्तोय नवाक्षरः ।
कालाभ्र समदेहानां सिंहस्कन्धो परिस्थितां ॥
मौलिवद्धेन्दुशकलां कटाक्षैः शत्रुभीतिदां ।
त्रिनेत्रां पीवरोरोजां स्मेरवक्त्रां चतुर्भुजां ॥
शंखं चक्रं गदां खड्ग मुद्वहन्तीं हरप्रियां ।
पूजयन्तीं जगत्सर्व्वं स्वतेजोभिर्व्विचिन्तयेत् ॥
त्रिपुटाया मनुर्व्वीजै स्त्रिभिर्ल्लक्ष्मी त्रपास्मरैः ।
ध्यानं वदाम्यथैतस्याः सर्व्वसिद्धि विधायकं ॥

गौरांगीरत्नमञ्जीर काञ्चीग्रैवेयकोज्वलां ।
रत्नमौलिं त्रिनयना मर्द्धेन्दुकृतशेखरां ॥
चतुर्भुजां रक्तवस्त्रगन्धमाल्यानुलेपनां ।
रक्तोत्पलं चापपाशौ वामतो दधतीं शिवां ॥
दक्षिणेप्यङ्कुशं पुष्प वाणान् संविभ्रतीं तथा ।
प्रवदामि मनूद्धारं त्वरिताया अतः परं ॥
प्रणवं मायिकं वीजं क्रोधवीजमतः परं ।
पाशमंकुशवीजं च वधूवीजमतः परं ॥
पुनः क्रोधं ततोन्त्या [४४ ख] र्णे युञ्जीताधोदतंस्वरं ।
पुनर्म्मांया तदन्तेस्त्रं मन्त्रः प्रोक्तो दशाक्षरः ॥
कथ्यमानमथध्यानं समाकर्णय पार्व्वति ।
इन्द्रनीलशिलाखण्डतुल्यावयवरोचिषं ॥
पत्राछादितवक्षोजनितम्वजघनस्फिचं ।
गुञ्जाहारसमुल्लासिपीवरोरोजयुग्मकां ॥
अलंकारतयावद्धान्भुजगानष्ट विभ्रतीं ।
ताटंकांगदमञ्जीरहारकुण्डलतामितान् ॥
मयूरपिछसम्वद्धकपालकृतशेखरां ।
किरातवेषं दधतीं त्रिनेत्रां जगदम्विकां ॥
वराभयोद्यतकरां कृपास्मेरमुखांबुजां ।
अथ घोरामनुंवक्ष्ये येन सिद्धचन्ति साधकाः ॥
करामलकवद्विश्वं यस्य संस्मरणादपि ।
मायारमांकुशानङ्गवधूवाग्भवगारुडैः ॥
योगिनीशाकिनीकालीफेत्कारीक्रोधवीजकैः ।
संवोधनमघोरायाः सिद्धिं मे देहि चोद्धरेत् ॥

ततश्च दापयेत्युक्त्वा स्वाहान्तो मनुरिष्यते ।
पञ्चविंशत्यक्षरोयं मन्त्रो वाञ्छितसिद्धिकृत् ॥
अथ ध्यानं व्याहरामि येन मन्त्रः प्रसिद्धयति ।
सुस्निग्धकज्जलग्रावतुल्यावयवरोचिषं ॥
विशालवर्त्तुलारक्तनयनत्रितयान्वितां ।
श्वेतत्रस्थिकृताकल्पसमुज्वलतनुछविं ॥
दिगंवरां मुक्तकेशीं नृमुण्डकृतकुण्डलां ।
शवोपरि समारूढां दंष्ट्राविकटदर्शनां ॥
द्विभुजां मार्ज्जनीसूर्प्पहस्तां पितृवनस्थितां ।
जयलक्ष्मीमन्त्रमतो ब्रवीमि परमेश्वरि ॥
वाग्भवं भुवनेशी च लक्ष्मीः कामसदा शिवाः ।
जयलक्ष्मि ततो ब्रूयाद्युद्धे मे विजयं वदेत् ॥
देहि प्रासादपाशौ च श्रृणिवीजम [४५ क] तः परं ।
अस्त्रत्रितयसंयुक्तं शिरस्तदनुकीर्त्तयेत् ॥
जयलक्ष्मीमथो ध्यायेदासीनां कमलोपरि ।
विद्युत्कनकवर्णाभां मुक्तादामविराजितां ॥
पृथुलोत्तुंगवक्षोजां लोचनत्रितयान्वितां ।
चतुर्भुजां पद्मयुगं वराभयमथापि च ॥
दधतीं कौस्तुभोद्भासिहृदयांचिन्तयेत्परां ।
व्याहराम्यथ देवेशि वज्रप्रस्तारिणीमनुं ॥
तारत्रपारमाकामप्रासादांकुशवीजकैः ।
सम्बोधनं ततो देव्याः स्वाहान्तो मनुरीरितः ॥
रत्नसिन्धौ रत्नपोतोपरि देवीं निषेदुषीं ।
कमले द्वादशदले सन्निविष्टां हसन्मुखां ॥

रत्नाङ्गीं रत्नमुकुटां चन्द्रखण्डविराजितां ।
स्तनभारावनम्राङ्गीविशालनयनत्रयां ॥
षड्भुजां रत्नखचितरक्तांवरविराजितां ।
वीजपूरधनुःपाशान्दक्षिणे दधतीं शिवां ॥
अङ्कुशस्मरकोदण्डकपालानि च वामतः ।
विचिन्त्यैवं जगद्धात्रीं न्यासङ्कुर्य्यादतन्द्रितः ॥
मायामादौ समुद्धृत्य पद्मावतिपदन्ततः ।
शिरोमन्त्रान्वितो ज्ञेयो मन्त्रः सप्ताक्षरो महान् ॥
अरुणामरविन्दस्थां फुल्लपद्मसमाननां ।
कराभ्यान्दधनीं रक्तोत्पलद्वन्द्वं त्रिलोचनां ॥
अथ वक्ष्येन्नपूर्णाया मन्त्रं सप्तदशाक्षरं ।
मायावीजं समुद्धृत्य नमो भग इतीरयेत् ॥
वति माहेश्वरि ततोप्यन्नपूर्णे समाहरेत् ।
वह्निजायायुतो मन्त्रो महदन्नसमृद्धिकृत् ॥
विचित्रवसनान्देवीमरुणामंवुजासनां ।
स्तनभारावनम्राङ्गीं नवचन्द्रार्द्धशेखराम् ॥
प्रमथाधिपमालो[४५ ख]क्य प्रहृष्टवदनांवुजां ।
हेमभाण्डं रत्नदर्व्वीन्दधतीं करयोर्द्वयोः ॥
अथ प्रवक्ष्ये देवेशि कालसंकर्षणीमनुं ।ः
यन्न ज्ञातं न चाख्यातं कस्मै चिदपि केन च ॥
तारत्रपारमाकामवाग्भवांकुशकालिकाः ।
पाशक्रोधमहाक्रोधप्रासादामृतगारुडाः ॥
फेत्कारीधनदाचण्डयोगिनीशाकिनीघनैः ।
विद्युद्रतिप्रेतभूतखेचरीकालपन्नगाः ः॥

कालसंकर्षणि प्रोच्य क्रोधयुग्मं ततः परं ।
स्वाहान्तो मन्त्रराजोयं मतः षड्विंशदक्षरः ॥
ध्यानं वदामि ते देवि तत्र चेतो निवेशय ।
घनाघनप्रभां देवीं पितृकाननचारिणीं ॥
प्रज्वलत्पावकचिताशवमध्यनिषेदुषीम् ।
अग्निकीलालसमया जटया गुल्फसंस्पृशा ॥
विमुक्तया शोभमानां शोणनेत्रत्रयान्वितां ।
अतिघोरतरत्र्यस्थिभूषणोज्वलविग्रहां ॥
पीवरापघनांखर्व्वां लंबमानमहोदरीं ।
छिन्नचन्द्रकलातुल्यदंष्ट्राकोटिभयंकरां ॥
लेलिहानमहाशोणप्रकम्पिरसनां शिवां ।
विस्रस्तकेशमनुजकपालकृतकुण्डलां ॥
शुष्कैर्न्नरास्थिभिः शुभ्रैर्व्विहिताशेषभूषणां ।
मयूरपिच्छनिचयच्छादितोरुकटिस्थलां ॥
मृतब्रह्मादिगीर्व्वाणकपालरचितस्रजं ।
कृत्वाट्टहासं धावन्तीं पीनोन्नतपयोधरां ॥
विदीर्णसृक्कयुगलां व्यात्तघोराननां सदा ।
सर्व्वशस्त्राऽस्त्रसम्पूर्णषट्त्रिंशद्दोर्विराजितां ॥
पद्मचर्म्मधनुःपाशाङ्कुशानपि वरानने ।
भिन्दिपालं तथा प्रासं घण्टां कण [४६ क] पमेव च ॥
शंखमृष्टिं च डमरुमक्षमालां क्रमेण च ।
रक्तकुम्भं नृमुण्डञ्च शत्रुजिह्वां ततः परं ॥
खर्प्परं चाभयं वामे दधतीं भीषणाकृतिं ।
त्रिशूलखड्गविशिखचक्रशक्तिगदा अपि ॥

मुद्गरं परिघं कुन्तं तथा मुशलतोमरौ ।
परश्वधं नागपाशं भुशुण्डीं पट्टिशं तथा ॥
खट्वांगं कर्त्तृकां दक्षे वहन्तीं च तथावरं ।
करालाभिः परिवृतांडाकिनीनवकोटिभिः ॥
कालसंकर्षणीनाम्नीं कल्पान्ते क्षयकारिणीं ।
कोटिविद्युद्द् न्निरीक्ष्यां देवैर्हरिहरादिभिः ॥
एवं ध्यात्वा न्यसेद्देवीं चतुर्व्वर्ग्गफलप्रदां ।
अथातो धनदामंत्रं व्याहरामि तवाग्रतः ॥
महाकालसमारूढः क्षेत्रपालो वरानने ।
वामकर्णान्वितं वीजं सद्य एव वसुप्रदं ॥
देवीं कोकनदारूढां विकजाब्जसमाननाम् ।
कृतपद्ममहापद्मनिधिकुण्डलयुग्मिकां ॥
मञ्जीरतापन्नशंखमकराख्यनिधिद्वयां ।
रत्नकङ्कणतापन्नमुकुन्दनिधिकच्छपां ॥
ललाटविंदुतापन्नविराजत्कुन्दसेवधिं ।
त्रिलोचनां नीलनिधिकृतहारां हसन्मुखीं ॥
अञ्जलिर्द्वितयेनापि ददतीं सर्व्वतो धनं ।
सर्व्वालङ्कारसंयुक्तां विचित्रवसनां परां ॥
चिन्तयेद्धनदां देवीं वाञ्छितार्थफलप्रदां ।
प्रवक्ष्ये कुक्कुटीमंत्रं सद्यः प्रत्ययकारकं ॥
वाग्भवं मायिकं वीजं लक्ष्मीं काममनूच्चरेत् ।
फेत्कारीं क्रोधमुल्लिख्य कुक्कुटीति ततो वदेत् ॥
काली पाशाङ्कुशानुक्त्वा शाकिनीचण्डमुच्चरेत् ।
सा[४६ ख]स्त्रद्वयं शिरः पश्चाद्विज्ञेयोष्टादशाक्षरः ॥

इयं वै कुक्कुटी विद्या गुप्ता सर्व्वागमेष्वपि ।
स्कन्देनोपासिता पूर्व्वं तारकस्य जयेप्सुना ।।
अब्धौ रत्नमये पोते रत्नसिंहासनस्थितां ।
श्यामां त्रिनेत्रां कुटिलकुन्तलभ्रूविराजितां ।।
माणिक्यशकलद्योतिदन्तमण्डलमण्डितां ।
रत्नाभरणनद्धाङ्गीं चतुर्द्दोर्व्वल्लिशोभितां ।।
कुक्कुटीं खर्प्परं वामे विभ्रतीं शशिशेखरां ।
खड्गं च कर्त्तृकां दक्षे धारयन्तीं शुचिस्मितां ।।
चिन्तयित्वा चरेन्न्यासं शृणु भोगवतीमथ ।
पाशाङ्कुशौ समुद्धृत्य प्रासादाऽन्तो मनुर्म्मतः ।।
अक्षरो जगतीमध्ये सर्व्वसौख्यप्रदायकः ।
अरुणामरविन्दास्यामतिपीनपयोधरां ।।
शेखरीकृतशीतांशुरत्नमौलिं त्रिलोचनां ।
वराभयकरां शान्तां सितपद्मोपरिस्थितां ।।
कथयाम्यथ देवेशि विद्यान्तां शवरेश्वरीम् ।
तारं त्रपां तथा पाशं ङेन्ता च शवरेश्वरी ।।
युक्तो हृन्मनुनाप्यन्ते महामन्त्रो दशाक्षरः ।
श्यामापर्णावृततनुर्गुञ्जाहारविराजिता ।।
स्मेरा षोडशवर्षीयावतंसितलतादला ।
वैणवं भाजनं वामे कटेरुपरि विभ्रतीं ।।
फलानि चिन्वती दक्ष करेण विपिनावनौ ।
वराटककृताकल्पा गायन्ती खर्व्वविग्रहा ।।
भक्तिभावतया देवी ध्यातव्या शवरेश्वरी ।
अथातः कुब्जिकामंत्रमाकर्णय वरानने ।।

नवकूटात्मिका चिन्ता चिन्तामणिरितीरिता ।
आदौ वैहाय संकूटं वायवीयं द्वितीयकं ॥
आग्ने [४७ क] यकूटं तार्त्रीयं फेत्कारीतुर्य्यमुच्यते ।
पञ्चमं वारुणं कूटं शांकरं षष्ठमुच्यते ॥
सप्तमं हंसकूटं स्यात्पराकूटमथाष्टमं ।
नवमं डाकिनीकूटं गुप्तं सर्व्वागमेष्वपि ॥
पूर्व्वमेव विशेषोस्याः कथितस्त्वयि पार्व्वति ।
अतो विशिष्य नो वच्मि तथाप्युक्तं समासतः ॥
ध्यानं पूर्व्वोदितङ्कुर्य्याद्यथा देवि मयोदितं ।
त्वं चतुर्व्विंशतितमां सिद्धिलक्ष्मीमथो शृणु ॥
लज्जां क्रोधं शाकिनीं च योगिनीम्प्रेतमेव च ।
कालीमथांकुशं वीजं शाकिनीं कामिनीमपि ॥
लक्ष्मींचण्डञ्च कालञ्च वैद्युतं भुजगार्णकं ।
स्वाहान्तः षोडशार्णोयं मन्त्रोमृतफलप्रदः ॥
श्वेतां श्वेतशवारुढ़ां नृमुण्डकृतकुण्डलाम् ।
पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रत्रिलोचनां ॥
व्याघ्रचर्म्मावृतकटिं शुष्कावयवभूषितां ।
आवद्धयोगपट्टाञ्च नरास्थिकृतभूषणां ॥
हस्तैः षोडशभिर्द्दीप्तां विस्रस्तघनकुन्तलां ।
खड्गं वाणं तथा शूलं चक्रं शक्तिं गदामपि ॥
जपमालां कर्त्तृकाञ्च विभ्रतीं दक्षिणे भुजे ।
फलकं कार्म्मुकं नागं पाशं परशु मेव च ॥
डमरुं फेरुपोतञ्च नरमुण्डं कपालकम् ।
उद्वहन्तीङ्करे वामे दीर्घसर्व्वाङ्गभीषणां ॥

कृत्वा ध्यानं न्यसेदङ्गे वालामाकलयाधुना ।
आदौ वाग्भवमुद्धृत्य कामवीजं ततः परं ॥
सकारोधोदन्तयुतो महासेनविराजितः ।
अक्षरः परमो मंत्रो विद्यैश्वर्य्यप्रदायकः ॥
[४७ ख] समुद्यद्रविविंवाभामरुणक्षौमधारिणीं ।
फुल्लराजीववदनां पीनोत्तुंगपयोधरां ॥
रत्नकेयूरताटंकमुक्ताहारविराजितां ।
त्रिनेत्रां वालशीतांशुखण्डशोभिललाटिकां ॥
पद्मोपरि समासीनां वालां देवीं चतुर्भुजां ।
विद्यामभीतिं वामेन दक्षे ज्जपवटीं वरं ॥
धारयन्तीं जगद्धात्रीं सर्व्वदैव हसन्मुखीं ।
संचिन्त्य न्यसनं कुर्य्यादप्रमत्तेन चेतसा ॥
अथाकर्णय देवेशि विद्यां त्रिपुरसुंदरीं ।
यत्र प्रतिष्ठिताः सर्व्वे तंत्रा डामरजामलाः ॥
यतः परतरा विद्या न भूता न भविष्यति ।
केनापि नैव शप्तेयं नैव केन च कीलिता ॥
तत्तेहं संप्रवक्ष्यामि यथावदुपधारय ।
सव्योमसब्रह्मभूमित्रपार्णैराद्यकूटकं ॥
व्योम सब्रह्म गगनमेदिनी भुवनेश्वरी ।
द्वितीयकूटमुद्दिष्टं विद्याराज्यफलप्रदं ॥
सक्रोधीशपिनाकीश लज्जा वीजान्त्यसंयुतं ।
तृतीयकूटमुद्दिष्टं सर्व्वसिद्धिविधायकं ॥
एषा प्रकाशिता विद्या लोपामुद्राभिधायिनी ।
यस्याः संस्मरणेनापि किं कार्य्यं नैव सिद्ध्यति ॥

कथ्यमानं मया देवि ध्यानमस्या निशामय।
उद्यच्चन्द्रोदयक्षुब्धरक्तपीयूषवारिधेः ॥
मध्येहेममयी भूमी रत्नमाणिक्यमण्डिता।
तन्मध्ये नन्दनोद्यानं मदनोन्मादनं महत् ॥
नित्याभ्युदितपूर्णेन्दुज्योत्स्नाजालविराजितं।
सदा सह वसन्तेन कामदेवेन रक्षितं ॥
कदंबचूतपुन्नागनागकेशरचंपकैः।
वकु [४८क] लैः पारिजातैश्च सर्व्वर्तुकुसुमोज्वलैः ॥
ॐकारमुखरैर्भृङ्गैः कूजद्भिः कोकिलैः शुकैः।
नानावर्णैरथान्यैश्च द्विजसंघैर्न्निषेवितं ॥
शिखिकारण्डहंसाद्यैर्न्नानायक्षिभिरावृतं।
नानापुष्पलताकीर्णैः शोभितं वृक्षखण्डकैः ॥
पर्य्यन्तदीर्घिकोत्फुल्लकमलोत्पलसंभवैः।
रजोभिधूसरैः सम्यक्सेवितं मलयानिलैः ॥
ध्यात्वैतन्नन्दनोद्यानं तदन्तः प्रांगणं स्मरेत्।
शुद्धकांचनसंकाशवसुधाभिरलंकृतं ॥
पांगणं चिन्तयित्वेत्थं सुरसिद्धनिषेवितं।
तन्मध्ये मण्डपं ध्यायेद्व्याप्तब्रह्माण्ड मण्डलं ॥
सहस्त्रादित्यसंकाशं चतुरस्त्रसुशोभितं।
रत्नतेजःप्रभापुंजपिंजरीकृतदिङ्मुखं ॥
मध्यान्तं भवनिर्म्मुक्तं कोणस्तम्भसमन्वितं।
महामाणिक्यवैदूर्य्यरत्नकाञ्चनभूषितं ॥
मुक्तादामवितानाढ्यं रत्नसोपानमण्डितं।
मन्दवायुसमाक्रान्तं गंधधूपतरङ्गितं ॥

रत्नचामरघंटादिवितानैरुपशोभितं ।
जातीचम्पकपुन्नागकेतकीमल्लिकादिभिः ॥
रक्तोत्पलसितांभोजमाधवीभिः सपुष्पकैः ।
वद्धाभिश्चित्रमालाभिः सर्व्वत्र समलंकृतं ॥
तिर्य्यगूर्ध्वलसद्रत्नं पुत्तलीकोटिमण्डितं ।
नानारत्नादिभिर्द्दिव्यैर्न्निर्म्मितं विश्वकर्म्मणा ॥
तन्मध्ये भावयेन्मंत्री पारिजातं मनोहरं ।
स्वर्णादिरत्नभूमिं च वालुकां काञ्चन प्रभां ॥
उद्यदादित्यसंकाशं व्याप्तब्रह्माण्डमण्डपं ।
शतयोजनविस्तीर्णं [४८ ख] ज्योतिर्म्मन्दिरमुत्तमं ॥
चतुर्द्वारसमायुक्तं हेमप्राकारमण्डितं ।
रत्नोपक्लृप्तसंशोभिकपाटाष्टकसंयुतं ॥
नवरत्नसमाक्लृप्ततुंगगोपुरतोरणं ।
हेमदण्डशिखालंवि ध्वजावलिपरिस्कृतं ॥
मध्यकोणस्थितस्तंभनवरत्नसमन्वितं ।
महामाणिक्यवैदूर्य्यरत्नचामरशोभितं ॥
मन्दवायुसमाक्रान्तं गंधधूपैरलंकृतं ।
वहुचामरघंटादिवितानैरुपशोभितं ॥
कल्पवृक्षे गिरेः पार्श्वे छत्रं तन्मण्डपोपरि ।
सुवर्णसूत्रै रचितं तन्मध्ये रत्नमण्डपं ॥
तन्मध्ये स्फुरितं ध्यायेन्त्रिशृंगज्योतिरुत्तमं ।
तस्य मध्ये महाचक्रं पीयूषपरिपूरितं ॥
रत्नसिंहासनन्तस्या विद्यामध्ये स्मरेच्छुभं ।
विरिंचिविष्णुरुद्रेशरूपपादचतुष्टयं ॥

सदाशिवमयं साक्षात्वस्मिन्परशिवात्मकं ।
पुष्पपर्य्यंकमाश्चर्य्य.....................।।
तन्मध्ये योनिमध्यस्थे श्रीमदोद्यानपीठके ।
पर्य्यङ्कवद्धविलसत्स्वस्तिकासनशालिनीं ।।
ध्यायेत्परशिवांकस्थां पद्ममध्योज्ज्वलाकृतिं ।
त्रिपुरासुन्दरीन्देवीं वालार्क्ककिरणारुणां ।।
जवाकुसुमसंकाशां दाडिमीकुसुमोपमां ।
पद्मरागप्रतीकाशां कुङ्कुमोदकसन्निभां ।।
स्फुरन्मुकुटमाणिक्यकिंकिणीजालमण्डितां ।
कालालिकुलसंकाशकुटिलालकपल्लवां ।।
प्रत्यग्रारुणसंकाशवदनांभोजमण्डलां ।
किंचिदर्द्धेन्दुकुटिलललाटमृदुपट्टिकां ।।
पिनाकधनुराकारसुभ्रुवं परमेश्वरीं ।
आनन्दमुदितोद्योतल्लीलान्दोलितलोचनां ।।
स्फुरन्मयूखसंघातविलसद्धेमकुण्डलां ।
स्वगण्डमण्डलाभोगजितेन्द्वमृतमण्डलां ।।
विश्वकर्म्मादिनिर्म्माण सू [४६ क] त्रसुस्पष्टनासिकां ।
ताम्रविद्रुमवाभविरक्तोष्ठीममृतोपमां ।।
दाडिमीवीजपंक्त्याभदंतपंक्तिविराजितां ।
स्मितमाधुर्य्यविजितमाधुर्य्यरससागरां ।।
अनौपम्यगुणोपेतचिवुकोद्देशशोभितां ।
कंबुग्रीवां महादेवीं मृणाललिततैर्भुजैः ।।
रक्तोत्पलदलाकारसुकुमारकरांवुजां ।
करांबुजनखज्योतिर्व्विद्योतिततनभस्तलां ।।

मुक्ताहारलतोपेतसमुन्नतपयोधरां ।
त्रिवलीवलिनायुक्तमध्यदेशोपशोभितां ।।
लावण्यसरिदावर्त्ताकारनाभिविभूषितां ।
अनर्घ्यरत्नघटितकांचीयुक्तनितंविनीम् ।।
नितंवविंवद्विरदरोमराजिवरांकुरां ।
कदलीललितस्तंभसुकुमारोरुमीश्वरीं ।।
लावण्यकदलीतुल्यजंघायुगलमण्डितां ।
गूढगुल्फपदद्वन्द्वप्रपदाजितकच्छपां ।।
ब्रह्मविष्णुशिरोरत्ननिघृष्टचरणांबुजां ।
तनुदीर्घांगुलीभास्वन्नखचन्द्रविराजितां ।।
शीतांशुशतसंकाशकान्तिसन्तानहासिनीं ।
लौहितसिन्दूरजवादाडिमरागिनीं ।।
रक्तवस्त्रपरीधानां पाशाङ्कुशकरोद्यतां ।
रक्तपुष्पनिविष्टां च रक्ताभरणमण्डितां ।।
चतुर्भुजांत्रिनेत्रां च पंचवाणधनुर्द्धरां ।
कर्पूरशकलोन्मिश्रताम्बूलापूरिताननां ।।
महामृगमदोद्दामकुंकुमारुणविग्रहां ।
सर्वशृंगारवेषाढ्यां सर्व्वालङ्कारभूषितां ।।
जगदाल्हादजननीं जगद्रञ्जनकारिणीं ।
जगदाकर्षणकरीं जगत्कारणरूपिणीं ।।
सर्व्वमंत्रमयीं देवीं सर्व्वसौभाग्यसुन्दरीम् ।
सर्व्वलक्ष्मीमयीं नि [४६ ख] त्यांपरमानन्दनन्दिताम ।।
प्रदीपैः पूर्णकुंभैश्च सर्वतः समलंकृताम् ।
हैमीभिः पालिकाभिश्च साङ्कुराभिरलंकृताम् ।।

रत्नपीठस्थितैर्दिव्यैरागमैः परिशोभिताम् ।
तदन्तरान्तराप्रोद्यन्मणिदर्पणमङ्गलाम् ॥
मधुरोदारविविधगांधर्वस्तोत्रवृंहिताम् ।
शृंगाररससन्नद्धैर्नवयौवनलंपटैः ॥
अमरीनिकरैर्नानामणिभूषणभूषितैः ।
वीणावेणुमृदंगादिवादनेन च नृत्यकैः ॥
प्रीणयद्भिर्महादेवीम्परीतां परितः सदा ।
देवीं ध्यात्वान्यसेदेवं सर्वान्कामानवाप्नुयात् ॥
अथावक्ष्ये महादेव्यास्तारापा मंत्रमुत्तमं ।
मायावीजं निःसकार वधूवीजं ततः परम् ॥
क्रोधवीजमथोच्चार्य शेषेस्त्रं प्रतिपादयेत् ।
ध्यानमस्याः समासेन कथ्यमानंनिवोध मे ॥
प्रत्पालीढपदांघोरां मुण्डमालाविभूषितां ।
खर्व्वां लंबोदरीं भीमां व्याघ्रचर्मावृतोरुकाम् ॥
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम् ।
चतुर्भुजांमहादेवीं ललज्जिह्वांवरप्रदाम् ॥
खर्गकत्रृंधरां दक्षे तथोत्पलकपालके ।
वामतो विभ्रतीन्देवीं दंष्ट्राघोरतराननां ॥
पिङ्गोगैकजटां ध्यायेन्मौलावक्षोपभूषितां ।
कुणपं वामवादेन चाक्रम्प परिनिष्ठितां ॥
नीलेन्दीवरमालाभिः संशोभिच्चिकुरोच्चयां ।
नीलमेघाभभुजगपरिनद्धजटाभरां ॥
जवाकुसुमसंकाशभुजङ्गकृत कुण्डलां ।
धूमप्रभमहानागकृतकेयूरमण्डलाम् ॥

तप्तकाञ्चनरुडभोगिविहितोज्वलकंकणां ।
दूर्व्वादलश्यामनागकृतयज्ञोप [५० क] वीतिनीम् ।।
हिमकुन्दाभभोगीन्द्र विराजिकटिसूत्रिणीं ।
पाटलीकुसुमाभाहिं कृतमंजीरशोभितां ।।
प्रज्वालपितृभूमध्यगतां दंष्ट्राकरालिनीं ।
सावेशस्मेरवदनां अलंकारविभूषितां ।।
सद्यः कवित्वफलदां सद्यो राज्पफलप्रदां ।
भवाब्धितारिणीं तारां चिन्तपित्वा न्यसेन्मनुं ।।
अथ दक्षिणकाल्यास्तु मंत्रमुद्धारयाम्पहं ।
यदेकवारस्मरणात्किन्तद्यन्न करेस्थितम् ।।
आदौ वीजत्रपं काल्यास्ततः क्रोधयुगं वदेत् ।
लज्जा वीजद्वयं प्रोच्प वदेद्दक्षिणकालिके ।।
पुनर्वीजत्रयं काल्याः क्रोधवीजद्वयं पुनः ।
लज्जा युगं वह्निजाया द्वाविंशत्यक्षरो मनुः ।।
धन्यः सोपि नरो लोके यः सकृत्प्रोच्चरेदमुम् ।
महिमावर्णितुं देवि न शक्योस्यकथंचन ।।
विस्तारोस्याः पूर्व्वमेव देवि ते वर्णितोमया ।
ध्यानंपूजादिकं सर्व्वं कथितं तत्प्रसंगतः ।।
किञ्चिद्धयानं प्रवक्ष्पामि तस्या ध्यानक्रमागतं ।
ज्वलत्पावककीलालश्मशानचितिमध्पगां ।।
करालवदनां घोरां मुक्तकेशीं चतुर्भुजां ।
कालिकां दक्षिणां दिव्पां मुण्डमालाविभूषितां ।।
नागयज्ञोपवीतां च चन्दार्द्धकृतशेखरां ।
जटापुक्तां घोररूपां महाकालसमीपगाम् ।।

सद्यश्छिन्नशिरः खड्गवामोर्ध्वाधः करांवुजाम् ।
अभयं वरदञ्चापि वक्षिणाधोर्ध्वपाणिकां ॥
महामेघप्रभां श्यामां तथा चैव दिगंवरां ।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चितां ॥
कर्णावतंसतांनीतशवयुग्मभयानकां ।
[५० ख] घोरदंष्ट्राकरालास्यां पीनोन्नतपयोधरां ॥
शवानां करसंघातैः कृतकाञ्चींहसन्मुखीं ।
स्टक्कद्वन्द्वस्रवद्रक्तधाराविछुरिताननां ॥
घोराकारां महारौद्रीं श्मशानालयवासिनीम् ।
भूत प्रेत पिशाचादिडाकिनीगणमध्यगाम् ॥
दैत्यदावनकोटिघ्नीं ललज्जिह्वाभयानकां ।
दक्षिणां कालिकां ध्यायेदित्थं सिद्धिविधायिनीं ॥
अथातश्छिन्नमस्ताया मन्त्रन्ते व्याहराम्पहं ।
जिघृक्षयापि यस्यास्युः साधकस्याष्टसिद्धयः ॥
नातः परतरा काचिदुग्रा देवी भविष्पति ।
तस्मादशक्तैर्म्मनुजैर्न्न ग्राह्योयं कथञ्चन ॥
सिद्धिर्व्वा मृत्युरपि वा द्वयोरेकतरं भवेत् ।
प्रणवञ्च रमावीजं लज्जां वाग्भवमेव च ॥
वज्रवैरोचनीये च इत्येवं तत उद्धरेत् ।
क्रोधद्वयं ततश्चास्त्रं स्वाहान्तः षोडशाक्षरः ॥
ध्यानं चास्याः प्रवक्ष्यामि तत्र चेतो निवेशय ।
स्वनाभौ नीरजं ध्यायेच्छुद्धं विकसितं सितं ॥
तत्पद्मकोषमध्येतु मण्डलं चण्डरोचिषः ।
जवाकुसुमसंकाशं रक्तवन्धूकसन्निभम् ॥

रजःसत्वतमोरेखायोनिमण्डलसन्निभं ।
मध्ये तस्या महादेवीं सूर्यकोटिसमप्रभां ॥
छिन्नमस्तां करे वामे धारयन्तीं स्वमस्तकं ।
प्रसारितमुखं भीमं लेलिहानोग्रजिह्वकं ॥
प्रपिवद्रौधिरीं धारां निजकण्ठसमुद्भवां ।
विकीर्णकेशपाशाञ्च नानापुष्पविराजितां ॥
दिगम्वरां महारूपां प्रत्यालीढपदस्थितां ।
अस्थिमालाधरां देवीन्नागयज्ञोपवीतिनीं ॥
विपरीतरतासक्तरतिका[५१ क]मोपरिस्थितां ।
वर्णिनीडाकिनीयुक्तां वामदक्षिणपार्श्वतः ॥
दक्षिणे वर्णिनीं ध्वायेद्वामपार्श्वे च डाकिनीं ।
वर्णिनीं लोहितश्यामां मुक्तकेशीं दिगम्वरां ॥
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः ।
देवीकण्ठोच्छलद्रक्तधारापानं प्रकुर्व्वतीम् ॥
अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् ।
डाकिनीं वामपार्श्वे च कल्पान्तजलदोपमां ॥
विद्युच्छटाभनयनां दन्तपङ्क्तिवलाकिनीं ।
दंष्ट्राकरालवदनां पीनोत्तुंगकुचद्वयां ॥
महोदरीं मुक्तकेशीं महाघोरां दिगम्वरां ।
लेलिहानचलज्जिह्वां मुण्डमालाविभूषिताम् ॥
कपालकर्त्तृकाहस्तां वामदक्षिणयोगतः ।
देवीगलोच्छलद्रक्तधारापानं प्रकुर्व्वतीं ॥
करस्थितकपालेन भीषणेनातिभीषणां ।
दुर्निरीक्ष्यां चेतसापि सर्वकामफलप्रदाम् ॥

ध्यात्वेत्थम्मनुनानेन न्यसेत्साधकसत्तमः ।
अथत्रिकण्टकीमंत्रं समाकर्णयभामिनि ॥
क्रोधमादौ समुद्धृत्यमाक्रूरौ चण्डघण्टिकौ ।
सविसर्गक्षवीजं च तृतीयं परिकीर्त्तितं ॥
अथ ध्यानं शृणु त्वम्मे यथावद्वरवर्णिनि ।
पादादानाभिपर्यन्तं घनाघनतनुच्छविः ॥
नाभेशनापिर्य्यन्तं सिन्दूरारुणविग्रहा ।
चतुर्भिर्वदनैर्य्युक्ता दंष्ट्रापटलभीषणैः ॥
दुर्न्निरीक्ष्यैर्महाघोरैः पतितैरुदरोपरि ।
त्रिनेत्राचन्द्रशकलद्योतिभालस्थला शिवा ॥
हस्ताभ्यां दधनीं शंखं चक्रमद्भुतविक्रमं ।
सर्व्वालंकारशोभाढ्यास [५१ ख] व्वं कामफलप्रदा ॥
ध्येयात्रिकण्टकीदेवी न्यासकर्म्मणिसाधकैः ।
अतोनीलपताकाख्यां विद्यामाकर्णयाम्बिके ॥
तारं हृत्पदमाभाष्य कामेश्वरि पदं ततः ।
कामाङ्कुशे पदं चोक्त्वा ततः कामप्रदायिके ॥
भगवत्यथ नीलान्ते पताके च भगान्तिके ।
रतिहृन्मंत्रमालिख्य ततोस्त्विवति च ते वदेत् ॥
परमान्ते तथा गुह्येहूंकारत्रिकमालिखेत् ।
मदनेमदनान्तेथ देहे त्रैलोक्यमावदेत् ॥
आवेशय तथा लेख्यं कवचास्त्राग्निवल्लभा ।
षट्षष्ठ्यर्णा महेशानी देवी नीलपताकिका ॥
निगद्यमानं ध्यानं च समाकर्णय पार्व्वति ।
इन्द्रनीलशिलाखण्डसमानतनुरोचिषं ॥

प्रफुल्लपुण्डरीकाभवदनां स्मितशालिनीं ।
कवरीवन्धशोमाढ्यां पीवरोरोजसंयुतां ॥
रम्याभिः सर्व्वतो नीलपताकाभिरलंकृतां ।
वराभय कर द्वन्द्वं धारयन्तीं शुचिस्मितां ॥
ध्यायेद्यमनाः स्वस्थः साधकोविजितेन्द्रियः ।
द्वात्रिंशत्तमिकां देवीञ्चण्डघण्टामथो शृणु ॥
युद्धे जयेप्सुभिर्द्दैत्यैः पूर्वमाराधितापरा ।
द्विकाली च चतुः क्रोधमङ्कुशत्रितयं ततः ॥
द्विरमा च द्विमायाच योगिनीशाकिनीवधूः ।
चण्डघण्टे ततो वाच्यं शत्रूंश्च तदनन्तरम् ॥
स्तंभयद्वितयं प्रोच्य मारयद्वितयं ततः ।
कवचास्त्राग्निजायान्तो अष्टत्रिंशाक्षरोमनुः ॥
ध्यायेद्दूर्व्वादलश्यामां पूर्णचन्द्राननत्रयाम् ।
एकैकवक्त्रनयन त्रितयोज्वलविग्रहां ॥
पीतांवरपरीधानां पीतस्रगनुलेपनां ।
सर्व्वाभरणनद्धाङ्गां रत्नाकल्प परि [५२ क] स्कृतां ॥
चण्डघण्टामष्टभुजां स्थितां मत्तगजोपरि ।
खड्गं त्रिशूलंविशिखं कर्त्तृकां दक्षिणे करे ॥
चर्म्मपाशधनुर्द्दण्डखर्पराणि च वामतः ।
धारयन्तीं क्रूरदृष्टि चण्डघण्टां विचिन्तये ॥
अतश्चण्डेश्वरीमंत्रं शृणुसावहितासती ।
तारलज्जारमाक्रोधां कुशकालीवधूस्मराः ॥
अष्टवीजं समुद्धृत्य शांभवं कूटमुद्धरेत् ।
ततश्चभैरवीकूटं कूटं माहेश्वरं ततः ॥

ततः परापरं कूटं व्योमकूटं च पंचमं ।
उक्त्वाचण्डेश्वरि ततः खेचरींयोगिनीं लिखेस् ॥
शाकिनीं गारुडं वीजं युगं क्रोधास्त्रयोस्ततः ।
वह्निजायान्वितोमंत्रो जगतीतलद्दुर्ल्लभः ॥
नातः परतरोमंत्रो न भूतो न भविष्यति ।
शृणु ध्यानममुष्यास्त्वं मतिनिर्मलचेतसा ॥
इन्द्रगोपनिभां देवीं प्रौढास्त्रीरूपधारिणीं ।
पञ्चवक्त्रां महाभीमां दंष्ट्राभिर्व्विकरालिनीं ॥
प्रविस्रस्तजटाभारां नरास्थिकृतभूषणां ।
केयूरांगदकोटीश हारनूपुरशालिनीं ॥
किंकिणीकुण्डलापीडधारिणीमस्थिनिर्म्मितां ।
रांकवत्वक्परीधानां शुष्कलंवस्तनद्वयां ॥
शवद्वयोपरिगतां दक्षवामांघ्रियोगतः ।
सकेशनरमुण्डाभ्यां वद्धाभ्यां पादयोर्द्वयोः ॥
त्रित्रिलोचनसंयुक्तवदनांघोररूपिणीं ।
चण्डेश्वरीं दशभुजामट्टहासं वितन्वतीम् ॥
वक्त्रं मुखद्वयं वामे दक्षिणे वदनद्वयं ।
संमुखे वदनं चैकं धारयन्तीं प्रकल्पितं ॥
हस्तमात्रविनिष्क्रान्त लेलिहान भयानकं ।
जिह्वायुगं दक्षिणयोःक [५२ ख] रयोर्व्विभ्रतीं सदा ॥
तथैव रसनायुग्मं दधती वामहस्तयोः ।
संमुखास्यगतांजिह्वां नभः स्थलप्रसारितां ॥
दधतीं घोरनादाट्टहासत्रस्तजगत्रयां ।
सद्यः कृत्स्नस्रवद्रक्तधारं मुण्डंकचान्वितम् ॥

कराभ्यां वामदक्षाभ्यां वहन्तीं सकलोपरि ।
ततो हस्तद्वये जिह्वां विस्फुरन्तीञ्च विभ्रतीम् ॥
मुण्डक्तासृजांधारां पतन्तीं रसनोपरि ।
पिवन्तीं शीत्कृतिं कृत्वा हूं हूंकारविनादिनीं ॥
तथा नृमुण्डयुगलं पुनर्द्दक्षिणवामयोः ।
पुनर्ज्जिह्वयुगंतद्वद्वामदक्षिणहस्तयोः ॥
धयन्तीं पूर्व्वद्रक्तं सशब्द परिघोरितं ।
पुरः स्थिताभ्यां घोराभ्यां करालाभ्यामतीव हि ॥
योगिनीडाकिनीभ्यां च रक्तपूर्णघटद्वयं ।
सर्व्वदा पातयन्तीभ्यां स्थिताभ्यां पुरतः सदा ॥
संमुखस्थितजिह्वायां मांसखण्डास्थिपूरितं ।
पिवन्तीमीदृशाकारां दुन्निरीक्ष्यां सुरासरैः ॥
कपालं खर्प्परं शेष भुजाभ्यां विभ्रतीं परां ।
चिन्तयेन्मन्त्रविन्यासे देवीं चण्डेश्वरीं हृदि ॥
इदानीं भद्रकाल्यास्त्वं शृणु मंत्रमनुत्तमम् ।
येन सिद्धिमवाप्नोति परत्रामुत्र मानवः ॥
प्रणवं शाकिनीवीजं वधूं कवचमेव च ।
योगिनीमंकुशं पाशं फेत्कारीस्मरमायिकं ॥
नवाक्षरो महामन्त्रो भद्रकाल्याः प्रकीर्त्त्यते ।
ध्यानं चास्याः कथ्यमानमवधारय पार्व्वति ॥
सिंहोपरि समासीनां मसीपुंजसमप्रभां ।
भृकुट्यरालवदनां वीक्षणां घोरदर्शनां ॥
शार्द्दूलत्वक्परीधानां विष्वर्गव [५३ क] स्तारितानना ।
अत्यन्तशुष्कसर्व्वाङ्गी ललज्जिह्वाकरालिनीं ॥

त्रेता गर्भस्थितत्र्यग्निसमाननयनां शिवां ।
नरमुण्डावलीहारां नादापूरितपुष्करां ॥
ज्वलद्धुतवहाकारविस्रस्तकचसंचयां ।
नरास्थिकृतसर्वांगभूषणां जगदंबिकां ॥
कोटि कोटिमहाघोरयोगिनीगणमध्यगाम् ।
कालीं दशभुजां सृक्कगलद्रुधिरचर्च्चिताम् ॥
खड्गं त्रिशूलं विशिखं शक्तिं दक्षिणतः स्मरेत् ।
फलकं डमरुं चापं कपालंवामतोपि च ॥
व्यादाय वदनं घोरं दंष्ट्राभिः पूरितान्तरं ।
लेलिहानचलद्विद्युत्समानरसनं महत् ॥
दानवासुरदैत्यानां कोटिमर्बुदमेव च ।
धारयित्वा च धृत्वा च सार्द्धं कटकटारवैः ॥
प्रक्षिप्य तत्रबाहुभ्यां चर्वयन्तीं हसन्मुखीं ।
गिलन्तीं पूरयन्तीञ्च पातालतुलितोदराम् ॥
ध्यात्वा चैवंविधां कालीं ततोङ्गेषु न्यसेदमुं ।
गुह्यकालीमंत्रमतो ममाकर्णय भामिनि ॥
यत्तवैवोच्यते देवि नैवान्यत्र कदाचन ।
त्रपानंगंशाकिनीञ्च क्रोधमंकुशमेव च ॥
गुह्यशव्दादपि वदेत्कालिशव्दं वरानने ।
कालीं च योगिनीवीजं फेत्कारीं चण्डमेव च ॥
योगिनीकामिनीवीजं स्वाहान्तेविनिवेशयेत् ।
सुदुर्ल्लभो मंत्रराजो ज्ञेयः सप्तदशाक्षरः ॥
न तीर्य्यतेस्यमहिमा वर्णितुं वरवर्णिनि ।
ध्यानंनिशामयाथास्याः प्रोच्यमानं मया स्वयं ॥

आपादपद्मादारभ्याकण्ठं पाटलसन्निभा ।
मुखे दूर्व्वादलश्यामा जटाभारविराजिता ।।
शवोपरिसमासीना किञ्चिद्विस्ता [५३ ख] रितानना ।
दशभिर्व्वदनैर्युक्ता त्रित्रिचक्षुर्व्विराजितैः ।।
मुण्डकुण्डलसंवीता सर्व्वेषुवदनेष्वपि ।
नरास्थिविहिताकल्पा कल्पकल्पक्षयंकरा ।।
सर्वत्रलंवितजटा सर्वत्रापदितारिणी ।
किंचिच्छुष्कगलोद्देशा किंचिदाकुंचितानना ।।
पिचिण्डिला निम्ननाभिर्नातिपीनपयोधरा ।
स्थूलोरुजंघा विकटा सर्वाभरणभूषिता ।।
अदीर्घषोडशापीनदोर्म्मण्डलविराजिता ।
नीलांवरपरीधाना नीलस्रग्गंधलेपना ।।
शिवापोतञ्च खट्वांगं गदामंकुशमेव च ।
घण्टां नृमुण्डं वामेन दधती खर्पराभये ।।
खड्गं त्रिशूलं चक्रञ्च नागपाशं ततः परं ।
जपमालां च डमरुं कर्त्तृकां वरमेव च ।।
धारयन्ती दक्षिणेनोपविष्टा कुणपोपरि ।
योगपट्टसमुन्नद्धजानुमध्यकरांबुजा ।।
समस्तविग्रहव्यापि मुण्डमालाविराजिता ।
सर्व्वकामप्रदादेवी सर्व्वसिद्धिविधायिनी ।।
ध्यातव्याभक्तिभावेन परमैश्वर्यदायिनी ।
नातष्परतरा कापि त्रैलोक्यैश्वर्य्यसाधिका ।।
विद्यते दयिते देवि सद्यः प्रत्ययकारिणी ।
लोकपालशिरोरत्ननिघृष्टचरणद्वयः ।।

त्रैलोक्यविजयी यत्र प्रमाणं दशकंधरः ।
दिव्यं वर्षायुतं देवि व्यापता येन तां परां ॥
पेशष्कारीयता कालात्प्राप्ता सत्यं दशास्यता ।
यमेन्दुचन्द्रवरुणकुवेरानिलनैऋर्ताः ।।
मित्राग्निरविनासत्यरुद्रब्रह्मादिदेवताः ।
यक्षराक्षसगंधर्व्वसिद्धविद्याधरोरगाः ॥
उपासते सभायां यां नित्यमेव समाहिताः ।
मन्वन्तरद्वयं पूर्णं किञ्चिदप्यधिकं [५४ क] प्रिये ॥
यः शशासाखण्डिताज्ञो भुवनानिचतुर्दश ।
नास्तेऽमरत्वमेतस्मात्कालेनामौ निपातितः ॥
अथातोनंगमालाया व्याहरामि मनुं शुभं ।
प्रणवं वाग्भवं पाशं त्रपापाशांकुशान्यपि ॥
क्षेत्रपालं च कालीञ्च गारुडं शाकिनीमपि ।
अनंगमाले उल्लिख्य स्त्रियमित्युच्चरेदथ ॥
आकर्षयद्वयं चोक्त्वा त्रुटछेदययोर्य्युगं ।
कवचद्वितयंचास्त्रद्वयं स्वाहान्तगो मनुः ॥
स्वर्णसिंहासनगतां तप्तकांचनसन्निभां ।
विशालमुकुराकारवदनां स्मितशालिनीं ॥
चलत्खंजनलीलानुकारित्रिनयनां सदा ।
अर्द्धेन्दुशेखरां देवीं किञ्चिदाकुंचितभ्रुवं ॥
कर्णान्दोलस्फुरद्रत्नकुण्डलोद्यत्कपोलकाम् ।
पीवरोत्तुंगवक्षोजां वक्षोजोद्योतिगोस्तनां ॥
गोस्तनोद्योतिशशभृच्छेखरांजगदंबिकां ।
वृहन्नितंववेदीकां तनुमध्यां वरोरुकां ॥

मञ्जीरकिङ्किणीहारकङ्कणाङ्गदराजितां ।
वराभयकरां देवीं द्विभुजां सिद्धिदायिनीं ॥
ध्यात्वा चित्ते न्यसेद्देवीं सर्व्वकामार्थसिद्धये ।
कथयाभ्यथचामुण्डामन्त्रमुन्नतिकारकं ॥
यज्ज्ञात्वा यत्रकुत्रापि संकटे नावसीदति ।
संयुगेनिर्भयो भूपादधिगच्छेच्च संपदं ॥
प्रणवाङ्कुशकालीयशाकिनीचण्डयोगिनीः ।
खेचरीक्रोधफेत्कारीविद्युत्कालरतित्रपाः ॥
भौजंगममहाक्रोधमौपर्णान्षौडशोच्चरेत् ।
चामुण्डे इतिसंकीर्त्य युग्मज्वलह्लिलेः किलेः ॥
ममशत्रूनिति प्रोच्य युगं त्रासय मारय ।
हन युग्मं पदं युग्मं भक्षयद्वितयं ततः ॥
काली त्रपारु [५४ ख] षां युग्मं फट् द्वयंस्वाहया युतं ।
एकसप्तत्यक्षरोमौ मंत्रः परमशोभनः ॥
धरालग्नशिरोजानु प्रसुप्तकुणपोपरि ।
निषेदुषीं निः पललसर्व्वावयवभीषणां ॥
त्वगस्थिमात्रघटितामत्युग्राकारदर्शनां ।
कपालाकारशिरसं विलुंठितशिरोरुहां ॥
स्कंधावसक्तयुगलकुण्डलीकृतखर्परां ।
नारास्थिनिर्म्मितानेकभूषणांभीषणाकृतिं ॥
मुण्डमालापरिक्षिप्तां ललज्जिह्वाभयानकां ।
विकरालमहादंष्ट्रां रौद्रीं रुद्रपरिग्रहां ॥
अतिशुष्कोदरश्रोणि नितंबोरुपयोधरां ।
गणेयोभय पार्श्वस्थपञ्जरास्थिकरालिनीं ॥

दीर्घतालद्रुमाकारकरपादां हसन्मुखीं ।
खर्ज्जूरकंटकाकाररोमराजिविराजितां ॥
लौहसूर्पाकृतिनखां समुत्कल्पिशिरोधरां ।
कूपाकारत्रिनयनां विद्युच्चपलतारकां ॥
लम्बमानौष्ठाधरां तां वलीलग्नपयोधरां ।
विदीर्णसृक्कयुगलां नारांत्रकटिसूत्रिणीं ॥
दिगंवरां चर्व्वयन्तीं शवं कहकहारवैः ।
अष्टादशभुजां भीमां चरन्तीं पितृकानने ॥
वामेकरे चर्म्मचापखट्वांगडमरुन्क्रमात् ।
अंकुशं च तथा पाशं भिदिपालं शवं तथा ॥
रक्तपूर्णकपालं च धारयन्तीं महोदरीं ।
दक्षिणेविभ्रतीं खड्गं विशिखं च त्रिशूलकं ॥
चक्रं शक्तिं गदां पर्शुमस्थिमालां च कर्त्तृकां ।
दिवाकालाभ्रसदृशां जवापुष्पारुणां निशि ॥
वलाकासमदन्तालीं भुजङ्गाकुटिलभ्रुवं ।
अति क्रूराकृतिधरां दृष्ट्वैव मरणप्रदां ॥
घोराट्टहासां गगने प्लवन्तीं सर्व्वतोमुखीं ।
चिन्तयित्वा तु चामुण्डा [५५ क] मित्थमङ्गे न्यसेन्मनुं ॥
धरित्रीधरणेधीरामाकर्णय इतःपरं ।
तारं नमः समाभाष्य भगवत्यै ततो वदेत् ॥
वराह इतिचोद्धृत्य रूपिण्यै तदनन्तरं ।
ततश्चतुर्द्दशप्रोच्य कीर्त्तयेद्भुवना ततः ॥
धियायै समनुद्धृत्य वाराह्यै तदनन्तरं ।
भूपतित्वन्ततः प्रोच्य मे देहि तदनन्तरं ॥

दापयानन्तरंवह्निजायान्तो मनुरीरितः ।
घननोलघनाकारां खर्व्वस्थूलकलेवरां ॥
हस्तमात्रविनिष्क्रान्त प्रचलत्पोत्र रंध्रवत् ।
वामभागेक्षिवदनं धारयन्तीन्द्विलोचनां ॥
अष्टमीचन्द्रखण्डाभदंष्ट्रायुगविराजितां ।
कोपादालोलरसनां विस्तारिविकृताननां ॥
कल्पान्तरविसंकाशां पूरयन्तीं जगत् त्विषा ।
भीमदंष्ट्राट्टहासां च रक्ताक्षीं रक्तवाससं ॥
कृपाणाकाररोमालीपरिपूर्णकलेवरां ।
भूदाररूपधात्रीञ्च संचरन्तीं विहायसि ॥
सटाधूननवित्रस्तप्रपलायितखेचरां ।
सर्व्वालंकारसंयुक्तां घुर्घुरारावकारिणीं ॥
अब्जचापांकुशान्पाशं वामगे बिभ्रतीं करे ।
चक्रं वाणं गदां शंखं दधतीन्दक्षिणे करे ॥
दूर्व्वादलश्यामलया धरण्या सेवितां सदा ।
वाराहीं चिन्तयेदित्थं सर्व्वकामफलप्रदां ॥
शृण्वतो वगलामन्त्रं येनसंवदनं भवेत् ।
प्रणवान्ते नमोदत्वा भगवत्यैततोपि च ॥
पीतांवरायै चोद्धृत्य त्रपायुग्मं ततः परं ।
ततश्चसुमुखि प्रोच्य वगलेतदनन्तरम् ॥
विश्वमेतौवशं प्रोच्य कुरुयुग्मं शिरोपि च ।
एकत्रिंशाक्षरोमंत्रो जगद्वश्यकरः प्रिये ॥
नि[५५ ख]गद्यमानमस्यास्त्वं ध्यानमप्यवधारय ।
गौरीपीतांवरधरा पीतस्रगनुलेपना ॥

रत्नसिंहासनगता रत्नालंकारभूषिता ।
त्रिनेत्रा चन्द्रशकलविराजितललाटिका ॥
सौन्दर्य्यसारविजितजगल्लावण्यपुंजिका ।
चतुर्भुजांकुशवरे दक्षिणेविभ्रती करे ॥
तथैव धारयन्ती च वामेदीपाभये करे ।
ध्यातव्याभक्तिभावेनवश्यकर्म्म चिकीर्षता ॥
अथातो जयदुर्गाया रम्यं मनुमुदीरये ।
तारगाङ्कुशस्मररमामायापाशवधूरुष: ॥
जय दुर्गेततश्चोक्त्वा रक्षरक्षततोवदेत् ।
स्वाहान्तएषकथितो मनुरष्टादशाक्षरः ॥
यथैतां चिन्तयेद्देवीं तथा त्वमवधारय ।
अतिकालघनाकारा चन्द्रार्द्धकृतशेखरा ॥
कटाक्षैः शत्रुसंघातान्निर्द्दहन्ती परात्परा ।
त्रिनेत्रा भृकुटीभङ्गा वित्रासितजगत्त्रया ॥
सिंहधोरणधौरीणा चलच्चिकुरपल्लवा ।
अष्टवाहा जगद्धात्री विकरालतरानना ॥
शङ्खं तथाङ्कुशं चापं जीवतोवैरिणः शिरः ।
सकचंवामपार्श्वस्थकरेण दधती शिवा ॥
करवालं तथा चक्रं विशिखं च गदामपि ।
दक्षिणेनकरेणैव धारयन्ती भयप्रदा ॥
जयदुर्गा सदाध्येया घोरे समरमूर्द्धनि ।
धारय त्वं कथ्यमानं नारसिंहीमनुं मया ॥
तारपाशांकुशक्रोधकालमायास्मरस्त्रियः ।
महाक्रोधक्षेत्रपालचण्डताकालशाकिनीः ॥

उक्त्वा जिह्वासटाशब्द घोररूप ततो वदेत् ।
दंष्ट्राकराले आभाष्यनारसिंहि समुद्धरेत् ।।
प्रासादत्रितयं चोक्त्वा हूंकारत्रिकमालिखेत् ।
अस्त्रद्वयं ततः [५६ क] स्वाहाचत्वारिंशाक्षरो मनुः ।।
यादृशा ध्यानचर्च्चा स्यात्तामप्याकर्णय प्रिये ।
हिमानीकुन्द कैलासरजताचलसन्निभा ।।
विस्रस्तकेशरमणा विकीर्णवदनाकृतिः ।
सृक्कक्षरद्रक्तधारा लंबमानाधरागलं ।।
द्विगुणीकृतशीतांशुकलातुल्यरदावलिः ।
अवभ्रटाक्षीणमध्या—लातसंकाशदृग्द्वया ।।
कृशदोर्घसमस्ताङ्गी सर्व्वालंकारमन्डिता ।
प्रोद्यन्मार्त्तण्डविवाभकौस्तुभोद्भासिनी हृदि ।।
मुखावटबिनिर्गच्छंज्जिह्वाकोटिशतह्रदा ।
केशराधूननत्रस्त खचराखचरस्यदा ।।
वज्राधिकनखस्पर्शा लोचनाभ्यां मुखादपि ।
वमन्ती कल्पकालाग्नि चर्व्वयन्तीदितेः सुतान् ।।
हसन्ती चाट्टहासेन नृत्यन्ती व्योममण्डले ।
गच्छन्तीवातवेगेन चरन्ती पितृकानने ।
दैत्यवक्षःपातनोत्थरुधिरोक्षितविग्रहा ।
सुदीर्घषोडशभुजाशीतिदंभोलिधारिणी ।।
चाप कंव्वब्जचर्माणि मुशलं परशुन्तथा ।
धारयन्ती करे वामे पट्टिशं च विदारणम् ।।
वाणचक्रगदाखड्गपाशांकुशपरीनपि ।
विदारणन्दक्षिणेन करेण दधती तथा ।।

प्रतप्तहेमपिङ्गाग्रसटाभारावगुंठिता ।
प्रकम्पिततनूयष्टिः पारिप्लवकनीनिका ॥
प्रसुप्तभुजगाकारलूमखण्डविराजिता ।
नक्षत्रमालापि तया रम्या नक्षत्रमालया ॥
संवर्त्तकालकोट्यर्कदुर्निरीक्ष्यभयंकरा ।
कोटिप्रलयकालाग्निप्रत्यनीकतनुप्रभा ॥
इत्थं ध्येया नारसिंही न्यासकर्म्मणि पार्व्वति ।
ब्रह्माणीमंत्र [५६ ख] मधुना संदिशामि तवेश्वरि ॥
प्रणवादिं लिखेत् पाशं प्रासादं तदनंतरं ।
पीयूषमंकुशं नागमस्त्रं सप्ताक्षरो मनु. ॥
ध्येयेयं येन विधिना वदामि तदपि प्रिये ।
हंसासनसमारूढ़ा रक्तवर्णचतुर्म्मुखा ॥
पिचिण्डिला निम्ननाभिः शुक्रयज्ञोपवीतिनी ।
स्थूलगंडाधरौष्ठभ्रूकपोलवदनासिका ॥
वद्धपद्मासना स्थूला घनपिंगशिखाजटा ।
सप्तभिर्न्नारदाद्यैः स्तूयमाना परेश्वरो ॥
बाहुभ्यां दक्षवामाभ्यामक्षसूत्रं कमण्डलुं ।
धारयन्ती मुखैर्व्वेदान् वदन्ती सर्व्वविग्रहा ॥
चिन्तनीयेदृशी देवी ब्रह्माणी सर्व्वकामदा ।
वदामि वैष्णवीमंत्रमाकर्णय वरानने ॥
तारं नमः समुद्धृत्य नारायण्यै ततो वदेत् ।
जगत्स्थिति ततश्चोक्त्वा कारिण्यै तदनंतरं ॥
कामवीजत्रयं चोक्त्वा लक्ष्मीवीजत्रयं ततः ।
पाशवीजं कालवीजं ततश्च विनिवेशयेत् ॥

स्वाहान्तो मनुरुद्दिष्टश्चतुर्विंशाक्षरात्मकः ।
इन्द्रनीलमणिश्यामां फुल्लराजीवलोचनां ॥
कोटिशारदपूर्णेन्दुसमानमुखरोचिषं ।
अत्यच्छदर्प्पणीभूतकपोलद्वयराजितां ॥
शोणविंवाधरां रत्नस्फुरन्मकरकुण्डलां ।
कंबुग्रीवां महोदारां तुंगवक्षोजनम्रितां ॥
श्रीवत्सकौस्तुभोद्भासिवक्षःस्थूलविराजितां ।
शंखचक्रगदापद्मधारिभिर्द्दीर्घपीवरैः ॥
चतुर्भिः पल्लवाकारैर्बाहुभिः परिराजिता ।
आपादपद्मलंबिन्यालंकृतां वनमालया ॥
किरीटरत्नकेयूरमंज्जीरादिभिरुज्ज्वला ।
पीताम्बरधरां देवीं भक्तानामभयप्रदां ॥
गरुडासनमारूढां म[५७ क]न्दमंदस्मिताधरां ।
पक्षाभ्यां दीर्घपीनाभ्यां पृथुचंच्वावृताननां ॥
हेमाभं गरुडं ध्यायेद्यमारूढा हि वैष्णवी ।
अथ माहेश्वरीमंत्रं समासात्प्रब्रवीमि ते ॥
यस्यैकवारस्मरणान्निर्वाणमपि लभ्यते ।
तारप्रासादपीयूषपाशलज्जारमारुषः ॥
माहेश्वरीपदं देवि प्रोच्चरेत्तदनन्तरं ।
शांकरं शांभवं व्योम कूटत्रयमुदाहरेत् ॥
भुजंगमतडिन्मेघशाकिनीरतिकालिकाः ।
चण्डकालामृतप्रेतान्युगलं कवचास्त्रयोः ॥
त्रिंशद्वर्णात्मको मंत्रः स्वाहासंवलितो भवेत् ।
इदानीं व्याहराम्यस्या ध्यानं सत्वगुणोज्वलं ॥

हिमानी शैल संकाशामतिपीतजटाभरां ।
धनाघनाभनागेन्द्रपरिवद्धजटात्रयां ।।
जटाजूटोच्छलद्गंगाजलकल्लोलमालितां ।
पंचवक्त्रां गलच्छायाजितकज्जलरोचिषं ।।
हिमांशुशकलोद्दीप्तपञ्चभालां हसन्मुखीं ।
प्रतिभालप्रविद्योतित्रित्रिलोचनसंगताम् ।।
भालतृतीयनेत्रोद्यद्वह्निज्वालासमाकुलां ।
कपोलमण्डलोद्योति शुद्धस्फटिककुण्डलां ।।
शुभ्रवासुकिनागेन्दुलसद्यज्ञोपवीतिनीं ।
शातकुंभाभनागेन्दुरुचिराङ्गदशोभितां ।।
अतिशोणभुजङ्गेन्दुविलसद्रत्नकङ्कणां ।
वसानां चर्म्म वैयाघ्रं रत्नाकल्पोल्लसत्तनुं ।।
माहेश्वरीं समारूढामतिश्वेतवृषोपरि ।
दशवाहां वीरभद्रनन्दिभृंगिपुरःसरां ।।
विष्णुरूपं शरं घोरं त्रिशूलं पर्शुमेव च ।
अक्षमालां दक्षकरे संविभ्रतीं परां ।।
पिनाकं नागपाशञ्च मृगं डमरुमेव च ।
अभयं दधतीं वामे प्रमथा [५७ ख] दिगणैर्वृतां ।।
इत्थं विचिन्त्य मनसा न्यसेदंगेषु साधकः ।
अथेन्द्राणीमनुं वक्ष्ये मातृमण्डलमध्यगं ।।
यदाराधनतो लोकः सद्यः प्राप्नोति देवताम् ।
प्रणवं समनुद्धृत्य वदेल्लज्जारमारुषः ।।
इन्द्राणि तदनूद्धृत्य मायायुग्मं ततोवदेत् ।
हुं हुं ततः समुच्चार्य्य क्षेत्रपालद्वयं ततः ।।

अस्त्रत्रयांते संयुक्तः शिरोमंत्रेण पार्व्वति ।
अष्टादशाक्षरो मंत्रः सर्व्वसिद्धिप्रदायकः ॥
ध्यानं निरुच्यमानं त्वं समाकर्णय पार्व्वति ।
कैलासाचलसंकाशतुंगैरावतसंस्थिता ॥
नीलोत्पलदलश्यामा कवचावृतविग्रहा ।
रक्तांवरपरीधाना पीवरा खर्वविग्रहा ॥
अनर्घ्यरत्नघटितचलच्छ्रवणकुण्डला ।
सर्व्वाङ्गव्याप्तशोणाब्जसहस्रनयनोज्वला ॥
चतुर्भुजा महापीनोत्तुंगवक्षोजमण्डिता ।
वाहुभ्यां दक्षवामाभ्यां स्थिताभ्यामुपरि क्रमात् ॥
कुलिशं खेटकं चापि विभ्रती समरोत्सुका ।
वामेनास्फालयन्ती च गण्डं करिपतेर्म्महत् ॥
दक्षेण बाहुना कुंभं दधती ददती श्रृणिं ।
चतुर्द्दन्तो मदोन्मत्तस्तुषाराचलसन्निभः ॥
ऐरावतोऽपि ध्यातव्यो यमिन्द्राणी समाश्रिता ।
अथातो हरसिद्धाया मंत्रं ते व्याहराम्यहं ॥
सर्व्वं मयाराधितेयं वहुसिद्धिमभीप्सता ।
अतः प्रसिद्धिं संप्राप्ता मन्त्राम्नैव (मन्त्रेणैव?) वरानने ॥
प्रणवं वाग्भवं वीजं मायावीजं ततः परं ।
कमलां मान्मथं वीजं कालीपाशाङ्कुशा अपि ॥
चण्डक्रोधमहाक्रोधफेत्कारी शाकिनो अपि ।
हरसिद्धि ततः प्रोच्य सर्व्वसिद्धिमितीरयेत् ॥
करुयुग्मं देहि युगं दापयद्वितयं [५८ क] पुनः ।
क्रोधत्रयं समुद्धृत्य द्विफडन्तेग्निवल्लभा ॥

द्विचत्वारिंशवर्णाद्यो मंत्रः सर्वोत्तमोत्तमः ।
ध्यानं चास्याः प्रवक्ष्यामि यत्कृत्वा न्यासमाचरेत् ॥
हरितालसमाभासलोचनत्रयभूषितां ।
पादालंविजटाभारां नरमुण्डकृतस्रजं ॥
वर्हिपिछकृतोदग्रकांचीकिङ्किणिमण्डितां ।
शार्दूलचर्म्मारचितकंचुक्याबृतवक्षसं ॥
शवोपरि समारूढामीषत्कंपितमस्तकां ।
चलदोष्ठपुटां वाहुचतुष्केन विराजितां ॥
वर्हिणं वृक्षपालं च नामतो विभ्रतीं शुभां ।
खड्गं च कर्त्तृकां दक्षे योगपट्टकृतस्रजं ॥
अथ फेत्कारिणीमन्त्रं व्याहरामि तव प्रिये ।
सद्यः कविर्य्यद्ग्रहणाद्राजा वापि प्रजायते ॥
प्रणवाङ्कुशसौपर्णफेत्कारीक्रोधयोगिनीः ।
वीजान्युद्धृत्य फेत्कारिपदं प्रोक्त्वा वदेत्ततः ॥
दद युग्मं देहि ततो दापयेति पदं वदेत् ।
स्वाहान्तोमनुराजोयं विंशत्यक्षरिकः प्रिये ॥
ध्यानमस्या ब्रुवे नाभेरधो मनुजसंनिभां ।
ऊर्द्धंगोमायुसदृशीं तदाकारां मुखेपि च ॥
अधोजांबूनदरुचिमूर्द्ध रक्तासितप्रभां ।
पृष्ठे लूमयुतां नग्नां कुर्व्वन्तीं फैरवंरवम् ॥
शिवाकारं बाहुयुगं विभ्रतीं पितृतान्वितां ।
प्रसुप्तशवपृष्ठस्थां योगपट्टे निषेदुषीं ॥
शिवाभिर्घोररूपाभिर्वामदक्षिणतो वृतां ।
अथ ब्रवीमि लवणेश्वर्य्या मन्त्रं कलार्णिकं ॥

आदौ चैतन्यकमले पाशप्रासादकौ ततः ।
रुग्भूतप्रेतडाकिन्यो योगिनी वनिता तथा ॥
मानसं वज्रभारुण्डे कपालं च कुलाङ्गना ।
त्रैर्वाणिकः सर्व्वशेषे महामंत्रोयमीरितः ॥
सांप्र [५८ ख] तं ध्यानमाख्यास्ये यत्कृत्वा न्यासमाचरेत् ।
रत्नसिंहासनारूढ़ां दूर्व्वादलसमद्युतिं ॥
वद्धांजलिपुटैः सप्तसागरै रत्नपाणिभिः ।
विहायसं मुखं दिक्षु विदिक्षु परिवेष्टितां ॥
नेत्रदासक्तहस्तेन धनदेन पुरोजुषा ।
सेवितां प्रज्वलन्मौलिमणिभिर्न्नागनायकैः ॥
अष्टभिर्न्निधिभिश्चापि महापद्मादिभिर्वृतां ।
चतुर्भुजां रत्नकुंभाभये सव्यभुजद्वये ॥
अक्षमालावरे दक्षे भुजयुग्मेषु विभ्रतीं ।
मुक्ताहारपरिक्षिप्तां द्रव्यसिद्धिविधायिनीं ॥
न्यासं समाचरेद्देवि ध्यात्वेत्थं लवणेश्वरीम् ।
अथातो नाकुलीम्वक्ष्ये महाविद्यां जयप्रदां ॥
सर्व्वादिप्रकृतेरादौ सप्तान्ते चतुरस्तथा ।
त्यक्त्वा माध्यमिकैर्भूतमितैर्मंत्रो महाफलः ॥
कपोतगलदेहाभा पीनोरोजा दिगंवरा ।
मुक्तपादालंबिजटाजूटभारा भयङ्करा ॥
वभ्रौ निषेदुषी शूच्याकारतुण्डी खरस्वरा ।
सितलूताजालजाला छादितोर्द्धशिरोरुहा ॥
कपालमालाभरणा ब्रस्थिकांचीगुणोज्ज्वला ।
लंवमानशिवापोतकुण्डलद्वयशोभिता ॥

अर्द्धचंद्रसमुद्भासिभ्रमरीकललाटिका ।
दण्डाकारितयोर्द्दक्षवामयोर्भुजयुग्मयोः ॥
विभ्रती कालभुजगौ दीर्घदंष्ट्रा करालिनी ।
परस्परं त्यक्तवैरैरुरगैर्न्नकुलैरपि ॥
संवेष्टिता चतुर्दिक्षु महारण्यकृता मया ।
सांप्रतं मृत्युहारिण्या मंत्रध्याने ब्रवीमि ते ॥
मृत्युञ्जयप्राणमंत्र उद्धृताया नवाक्षरी ।
नास्या न्यासं तथा कुर्य्यादन्येन प्रब्रवीमि ते ॥
तारमाये रमाकालौ रावास्ता चतुरक्षरी ।
प्रासादप्रेतभैरव्यः कूटं शांभवमे [५६ क] व च ॥
कूटं च परमात्मीयं विहायैतच्छुचिस्मिते ।
विलोमरीत्या प्रवदेत्तान्येव द्वादशानि हि ॥
पंचविंशाक्षरो मंत्रो मृत्योर्म्मृत्युकरः स्मृतः ।
आचरेदमुना न्यासमिदानीं ध्यानमीरये ॥
हिमानीकूटसदृशीमीश्वरीं देहरोचिषा ।
उत्तानकुणपाकारकालमृत्यूपरिस्थितां ॥
चतुर्वेदाकारयोगपट्टजानुद्वयाङ्किताम् ।
सितसूक्ष्मांवरधरां स्मेराननसरोरुहां ॥
ज्ञानरश्मिच्छटाटोपविद्योतिततनुमण्डलां ।
विभूषितां यावदेकयोषिद्भूषणसंचयैः ॥
विद्याभिरष्टादशभिर्न्निवद्धांजलिभिः सदा ।
सेव्यमानां चतुर्दिक्षु हसन्तीं तान्निरीक्ष्य च ॥
चतुर्भुजां सुधाकुंभपुस्तकं वामहस्तयोः ।
दक्षयोरक्षमालां च मुद्रां व्याख्यानशालिनीं ॥

दधतीं सर्व्वदा ध्यायेद्देवीन्तां मृत्युहारिणीं ।
एकपञ्चाशत्तमा वै कामकालिका ॥
न्यसनीया सर्व्वदोषे व्यापकत्वेन पार्व्वति ।
ध्यानं पूर्वोक्तमेवात्र कर्त्तव्यं प्रथमं वुधैः ॥
ततस्तत्त्वमिता मंत्रा न्यसनीया क्रमेण हि ।
सर्व्वाम्नायाः सप्तदश्याः प्रथमं समुदीरयेत् ॥
व्यापकं मातृकावर्णे सहाम्नायनिकस्य च ।
जघन्ये हृन्मनुर्देवि मध्ये तु मनवोऽखिलाः ॥
एकैकेनैकवारं हि विदध्याय(स्व?)कं वुधः ।
पंचविंशतिभिश्चैवं मनुभिः पृथगीरितैः ॥
व्यापकं तावतो वारान्निरालस्यः समाचरेत् ।
अथवा निखिलान्मंत्रानुच्चार्य्य क्रमत. प्रिये ॥
नमोन्ते व्यापकं कुर्यात् पूर्व्वेऽस्मिन्फलभूयता ।
इतरत्र ततः किंचित्तारतम्यम्प्रचक्षते ॥
नरीप्युपासिताविद्या पुरः सप्तदशी मता ।
ततोनु कपि [५६ ख] लोपास्या षोडशार्णा निगद्यते ॥
नवाक्षरी हिरण्याक्षोपासिता तदनन्तरं ।
ततो दशार्णा विज्ञेया लवणोपासिता हि या ॥
वैवस्वतमनूपास्या ज्ञेया पञ्चदशी ततः ।
नववीजात्मिका दत्तात्रेयोपास्या नवाक्षरी ॥
दूर्व्वामोदायितश्चापि ततः पंचाक्षरीमता ।
सप्तदशाक्षरं ज्ञेयं त्रैलोक्याकर्षणं ततः ॥
मन्वक्षरो मनुः पश्चादुत्तङ्कोपासितः प्रिये ।
ततोपरा सप्तदशी विश्वामित्रेण सेविता ॥

तत ऊनत्रिंशदर्णा विद्यौर्व्वोपासिता स्मृता ।
पराशरोपासितश्च षष्ठांशकाक्षरस्ततः ॥
विद्यात्रिकूटा तदनु भगीरथनिषेविता ।
वैरोचनिसमाराध्या तदनु स्यात्षडक्षरी ॥
ख्याता महाषोडशीया संवर्त्तोपासिता ततः ।
नारदोपासिता पश्चाज्ज्ञेया पंचदशाक्षरी ॥
या वीजान्तरिता शांभवादिकूटपुरःसरा ।
सप्तकूटात्मिका पंचवीजेन घटिता तथा ॥
ख्याता महासप्तदशी गरुडोपासिता तथा ।
वक्ष्यमाणक्रमेणापि या च सप्तदशी ततः ॥
कामदग्धोपासिता च ततः सप्ताक्षरी मता ।
भृगूपास्यतया ख्यातस्तत एकादशाक्षरः ॥
चतुर्द्दशार्णास्तदनु कार्त्तवीर्य्येण सेविता ।
पंचाक्षरी पृथूपास्या तत्पश्चादनुकीर्त्त्यते ॥
द्वाविंशाक्षरिकः पश्चाद्धनूमत्समुपासितः ।
शताक्षरसहस्रार्णौ सर्व्वोपास्यौ ततत:(ततः?) परं ॥
चतुर्व्विंशमिता एवं मन्त्रव्यापककर्म्मणि ।
ध्यानञ्चैषामेकमेव यत्पूर्व्वं गदितन्तव ॥
प्राणायामन्ततः कृत्वा षडङ्गमपि चाचरेत् ।
शतमष्टोत्तरं जप्त्वा न्यासं देव्यै समर्प्पयेत् ॥
वक्ष्यमाणेन मन्त्रेण गृहीतकरपुष्करः ।
ॐ सर्वन्नि [६० क] विष्टं त्रैलोक्ये त्रैलोक्यं त्वयि विष्टितं ॥
त्वमप्यमुष्मिन्न्यासे स्वसंनिविष्टाणुरूपिणी ।
त्रैलोक्यविजयत्वेन ख्यातोयमतएव हि ॥

निविष्टोयं मयि न्यासस्त्रिपुरा विश्वरूपिणी ।
न्यासस्तवार्पितो देवि त्रैलोक्यविजयो मया ॥
एतेनैव सह त्वञ्च मय्येव प्रविशाम्बिके ।
त्रैलोक्यमखिलन्तस्मान्मद्रूपत्वे वितुष्टितं ॥
अहन्त्रैलोक्यरूपश्च तस्मादैक्यं वभूव त्वं ।
कृतं न्यासं समर्प्यैवं वलिं देव्यै निवेदयेत् ॥
स्वस्वानुक्रमतोमन्त्रपूर्व्वसंभक्तिभावितः ।
तारत्रपाकामवध्वः शाकिनी डाकिनी तथा ॥
फेत्कारीप्रेतभैरव्यः कूटं शाम्भवमेव च ।
एह्येहि भगवत्युक्त्वा कालि कामकलार्णकः ॥
इमं वलिं गच्छयुगं तावद् गृह्णापयेत्यपि ।
खादयद्वयमाभाष्य भक्षयद्वितयं ततः ॥
सर्व्वसिद्धिप्रयच्छेकं वमदग्निमुखीरयेत् ।
फेरुकोटि समाभाष्य ततः परिवृते वदेत् ॥
हस ज्वल प्रज्वल च द्वयं द्वयमुदीरयेत् ।
क्रोधास्त्रयोश्च त्रितयं नमः स्वाहा जद्य(प?)न्यतः ॥
यथेष्टं विहरेद्धीमान्पठित्वा(त्व?)मुना वलिं ।
संहारमुद्रया देवीं हृदये विनिधाय च ॥
इति कामकलाकाल्या षोढान्यासो मयेरितः ।
किंत्वस्य महिमा वक्तुं मयापि नहि शक्यते ॥
पर्व्वण्यमुं विधायेशि वाञ्छितार्थं प्रसाधयेत् ।
षण्मासमेनं विदधत्कदाप्यपतितं प्रिये ॥
साक्षाद्देवीपुत्र एव भवेद्भैरव एव वा ।
अमुं न्यासं प्रकुर्व्वाणः पर्व्वण्यथ सदापि वा ॥

कस्मै चिदपि न क्रुध्यात्त्वनमेत्त्वशपेदपि ।
न निष्ठुरञ्च भाषेत नचापत्यमृ[६० ख]ति स्मरेत् ।।
यस्मै क्रुध्यात्स म्रियेत षण्मासाभ्यन्तरे नरः ।।

इत्यादिनाथविरचितायां महाकालसंहितायां षोढान्यासोद्धारो नाम द्विशताधिकाष्टचत्वारिंशत्तमः पटलः

देव्युवाच ।।

महायोगिन्महाकाल करुणाम्बुनिधे शिव ।
षोढान्यासः श्रुतस्त्वत्तो महासिद्धिर्म्महाफलः ।।
यत्नेन विधृतश्चापि मया भक्तिप्रवीणया ।
त्रैलोक्यमोहनं नाम कवचं मेधुना वद ।।
कवचत्वेन यद्देवी शिवायादात् स्वयं मुदा ।
तत् कीदृशं हि भविता तत्र कौतूहलं मम ।।
यदि प्रसन्नोसि मयि तदेदं वद सुव्रत ।
सर्व्वस्मादधिकं ह्येतत् त्वयैव समुदीरितम् ।।
नित्यमामुञ्चसि त्वञ्च जातो मम तदाग्रहः ।

श्रीमहाकाल उवाच ।।

ममैव दोषो देवेशि महांस्तेनाणुरप्यहो ।।
यत्पूर्व्वमेव पुरतस्तव तस्या भिदा कृता ।
नोचेत् किमर्थमप्राक्षीरतो निन्दे स्वमात्मना ।।
मम चेतस्यभूदित्थं त्वयेदं विस्मृतं भवेत् ।
नविस्मरन्त्युक्तगुप्तं स्त्रियो हीति श्रुतिप्रथाः ।।
त्वं हि सर्व्वोत्तमा स्त्रीणां कथं नैव स्मरिष्यसि ।
अतः परमिदं गोप्यं मया त्वत्तः कथं भवेत् ।।

शरीरार्द्धञ्च भवसि कथमात्मनि गोपनं ।
तस्मात्तव प्रवक्ष्यामि नोचेद्रक्षसि मां कथं ॥
श्रद्धां भक्तिं तव प्रेक्ष्य विवक्षा मम जायते ।
देवि नैतादृशाः काश्चित् सिद्धयः सन्ति भूतले ॥
त्रैलोक्यमोहनेऽधीते या नैव स्युः करस्थिता ।
पुनरेकम्मया प्रोच्यमानन्देवि निशामय ॥
कर्म्मानुरूपं जन्म स्याद्देहो जन्मनि जन्मनि ।
देहे देहे तथा प्राणास्तथा सर्व्वेन्द्रि[६१ क]याणि च ॥
तेषु तेषु धनं राज्यं भोगा रत्नं स्त्रियो गृहं ।
सर्व्वं नरस्य सुलभं नतु त्रैलोक्यमोहनं ॥
चिच्छेदिषूणां मूर्द्धानं सर्व्वस्वं ददतामपि ।
राज्यं धनं स्त्रियः प्राणानुपढौकयतामपि ॥
सर्व्वथा देवि नाख्येयं त्रिसत्यं ते ब्रवीम्यहं ।
शिष्यस्य सिद्धिः कथिते गुरोस्तु मरणं भवेत् ॥
समासादुपदेशोयं मया ते समुदीरितः ।
मृत्युर्न्न मम तस्मात्तु उपदेक्ष्यामि सुव्रते ॥
लोभादन्ये ये प्रदद्युर्म्मृत्युवक्त्रं विशन्ति ते ।
उपदेशं विना ये वै त्रैलोक्याकर्षणस्य हि ॥
त्रैलोक्यमोहनं नाम पठन्ति कवचं त्विदम् ।
सद्यस्ते मरणं यान्ति भक्षिता योगिनीगणैः ॥
उपदेक्ष्यामि तस्मात्त्वां वध्यतामञ्जलिष्प्रिये ।
सावधाना स्थिरा भूत्वा गदतोनुगदस्व मे ॥
त्रैलोक्यमोहनस्यास्य कवचस्य महेश्वरि ।
त्रिपुरारिर्ऋषिष्प्रोक्तो विराट् छन्द उदीरितम् ॥

देवी भगवती कामकलाकाली प्रकीर्त्तिता ।
फ्रें वीजं वीजमुद्दिष्टं कामार्णं कीलकं मतं ॥
योगिनीशक्तिरुद्दिष्टा डाकिनीतत्त्वमुच्यते ।
विनियोगोस्य कथितः पुरुपार्थचतुष्टये ॥
देवीकामकलाकालीप्रीत्यर्थे च विशेपतः ।
शत्रुक्षयार्थे राज्याप्त्यै प्रयोगोस्य वरानने ॥
ओँ ऐं श्रीं क्लीं शिरः पातु फ्रें ह्रीं छ्रीं मदनातुरा ।
स्त्रीं ह्रूं क्षौं ह्रीं लं ललाटं पातु ख्फ्रें क्रौं करालिनी ॥
आं ह्रौं फ्रों क्षूं मुखं पातु क्लूं ड्रं थ्रौं चण्डनायिका ।
हूं त्रैं च्लूं मौः पातु दृशौ प्रीं ध्रीं क्ष्रीं जगदम्बिका ॥
क्रूं खुं घ्रीं च्लीं पातु कर्णौ जुं प्लैं रुः सौं सुरेश्वरी ।
गं प्रां ध्रीं थ्रीं हनू पातु अं आं इं ईं श्मशानिनी ॥
जूं डुं ऐं औं [६१ ख] भ्रुवौ पातु कं खं गं घं प्रमाथिनी ।
चं छं जं झं पातु नासा टं ठं डं ढं भगाकुला ॥
तं थं दं धं पात्वधरमोष्ठं पं फं रतिप्रिया ।
बं भं यं रं पातुदन्तान् लं वं शं सं च कालिका ॥
हं क्षं क्षं हं पातु जिह्वां सं शं वं लं रताकुला ।
वं यं भं बं च चिबुकं पातु फं पं महेश्वरी ॥
धं दं थं तं पातु कण्ठं ढं डं ठं टं भगप्रिया ।
झं जं छं चं पातु कुक्षौ घं गं खं कं महाजटा ॥
ह्नौः ह्न्ख्फ्रें पातु भुजौ क्ष्मूं म्रैं मदनमालिनी ।
ङां त्रीं णूं रक्षताज्जत्रू नैं मौं रक्तासवोन्मदा ॥
ह्रां ह्रीं ह्रूं पातु कक्षौ मे ह्रैं ह्रौं निधुन प्रिया ।
क्लां क्लीं क्लुं पातु हृदयं क्लैं क्लौं मुण्डावतंसिका ॥

श्रां श्रीं श्रूं रक्षतु करौ श्रैं श्रौं फेत्काररराविणी ।
क्लां क्लीं क्लूं अंगुलीः पातु क्लैं क्लौं च नारवाहिनी ।।
च्रां च्रीं च्रूं पातु जठरं च्रैं च्रौं संहाररूपिणी ।
छ्रां छ्रीं छ्रूं रक्षतान्नाभिं छ्रैं छ्रौं सिद्धिकरालिनी ।।
स्त्रां स्त्रीं स्त्रूं रक्षतात् पार्श्वौ स्त्रैं स्त्रौं निर्वाणदायिनी ।
फ्रां फ्रीं फ्रूं रक्षतांपृष्ठं फ्रैं फ्रौं ज्ञानप्रकाशिनी ।।
क्षां क्षीं क्षूं रक्षतु क्षैं क्षौं नृमुण्डमालिनी ।
ग्लां ग्लीं ग्लूं रक्षतादूरू ग्लैं ग्लौं विजयदायिनी ।।
व्लां व्लीं व्लूं जानुनी पातु व्लैं व्लौं महिषमर्दिनी ।
प्रां प्रीं प्रूं रक्षताज्जंघे प्रैं प्रौं मृत्युविनाशिनी ।।
थ्रां थ्रीं थ्रूं चरणौ पातु थ्रैं थ्रौं संसारतारिणी ।
ॐ फ्रें सिद्धिकरालि ह्रीं छ्रीं हूं स्त्रीं फ्रें नमः ।।
सर्व्वसंधिषु सर्व्वांगं गुह्यकाली सदावतु ।
ॐ फ्रें सिद्धि ह्नख्फ्रें ह्न्फ्रें ख्फ्रें करालि ख्फ्रें ह्नख्फ्रें ह्न्फ्रें फ्रें ॐस्वाहा ।। रक्षताद्घोरचामुण्डा–तु–ककलेवरं ह्क्ष्म्श्व्र्मूं
अव्यात्सदाभद्रकाली [६२ क] प्राणानेकादशेन्द्रियां ।।
ह्रीं श्रीं ॐ ख्फ्रें हख्फ्रें ह्न्ख्फ्रें ह्क्ष्म्श्व्र्यूं न्क्ष्रीं नज्च्रीं स्त्रीं छ्रीं ख्फ्रें ठ्रीं ध्रों नमः ।
यत्रानुक्तस्थलं देहे यावत्तत्र च तिष्ठति ।
उक्तं वाऽप्यथवानुक्तं करालदशनावतु ।।
ॐ ऐं ह्रीं श्रीं क्लीं हूं स्त्रीं ध्रीं फ्रें क्षूं क्शौं क्रौं ग्लूं ।
ख्फ्रें प्रीं ठ्रीं थ्रीं ट्रैं व्लौं फट् नमः स्वाहा ।।
सर्व्वमापादकेशाग्रं कालीकामकलावतु ।
एतत्ते सर्व्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
एतेन कवचेनैवं यदा भवति गुण्ठितः ।।

वज्रात् सारतरं तस्य शरीरं जायते तदा ।
शोकदुःखामयैर्म्मुक्तः सद्योह्यमरतां व्रजेत् ॥
आमुच्यानेन देहं स्वं यत्र कुत्रापि गच्छतु ॥
युद्धे दावाग्निमध्ये च सरित्पर्वतसिन्धुषु ।
राजद्वारे च कान्तारे चौरव्याघ्राकुले पथि ॥
विवादे मरणे त्रासे महामारीगदादिषु ।
दुःस्वप्ने बंधने घोरे भूतावेशग्रहोद्गतौ ॥
विचर त्वं हि रात्रौ च निर्भयेनान्तरात्मना ।
एकावृत्त्याऽघनाशः स्यात् त्रिवृत्त्या चायुराप्नुयात् ॥
शतावृत्त्या सर्व्वसिद्धिः सहस्रैः खेचरो भवेत् ।
वल्लभेयुतपाठेन शिव एव न संशयः ॥
किंवा देवि—जानेः सत्यं सत्यं ब्रवीमि ते ।
चतुस्त्रैलोक्यलाभेन त्रैलोक्यविजयी भवेत् ॥
त्रैलोक्याकर्षणो मंत्रस्त्रैलोक्यविजयस्तदा ।
त्रैलोक्यमोहनं चैतत् त्रैलोक्यवशकृन्मनुः ॥
एतच्चतुष्टयं देवि संसारेष्वतिदुर्ल्लभं ।
प्रसादात्कवचस्यास्य के सिद्धिं नैव लेभिरे ॥
संवर्त्ताद्याश्च ऋषयो मारुत्राद्याद्या(मारुत्राद्या?) महीभुजः ।
विशेषतस्तु भरतो लब्धवान्य(त्?)छृणुष्व तत् ॥
जाह्नवी यमु[६२ ख]ना रेवा कावेरी गोमतीष्वयम् ।
सहस्रमश्वमेधानामेकैकत्राजहार हि ॥
याजयित्रे मातृपित्रे त्वेकैकस्मिन्महाक्रतौ ।
सहस्रं यत्र पद्मानां कण्वायादात्सवर्म्मणां ।
सप्तद्वीपवतीं पृथ्वीं जिगाय त्रिदिनेन यः ॥

नवायुतञ्च वर्षाणां योजीवत् पृथिवीपतिः ।
अव्याहतरथाध्वा यः स्वर्गपातालमीयिवान् ॥
एवमन्योपि फलवानेतस्यैव प्रसादतः ।
भक्तिश्रद्धापरायान्ते मयोक्तं परमेश्वरि ॥
प्राणात्यये नोवाच्यं त्वयान्यस्मै कदाचन ।
देव्यदात् त्रिपुरघ्नाय स मां प्रादादहन्तथा ।
तुभ्यं संवर्त्तऋषये प्रादां सत्यं ब्रवीमि ते ॥
संवर्त्तो दास्यति प्रीतो देवि दुर्व्वाससे त्विमम् ।
दत्तात्रेयाय स पुनरेवंलोके प्रतिष्ठितम् ॥
वक्त्राणां कोटिभिर्देविवर्षाणामपि कोटिभिः ।
महिमा वर्णितुं शक्यः कवचस्यास्य नो मया ॥
पुनर्व्ब्रवीमि ते सत्यं मनो दत्त्वा निशामय ।
इदं न सिद्धयते देवि त्रैलोक्याकर्षणं विना ॥
ग्रहीत्रे तुष्यते देवी दात्रे कुप्यति तत्क्षणात् ।
एतज्ज्ञात्वा यथाकर्त्तुमुचितं तत् करिष्यसि ॥

इत्यादिनाथविरचितायां महाकालसंहितायां त्रैलोक्यविजयं कवचं नाम द्विशताधिकोन-पञ्चाशत्तमः पटलः ॥

श्रीमहाकाल उवाच ।

अथ वक्ष्ये महेशानि देव्याःस्तोत्रमनुत्तमं ।
यस्य स्मरणमात्रेण विघ्ना यान्ति पराङ्मुखाः ॥
विजेतुं प्रतस्थे यदा कालकस्यासुरान् रावणो मुञ्जमालिप्रवर्हान् ।
तदा कामकालीं स तुष्टाव वाग्भिर्जिगीषुर्मृधे वाहुवीर्य्येण सर्व्वान् ॥
महावर्त्तभामासृगब्भ्युत्थवीची [६३ क] परिक्षालिता श्रान्तकंथश्मशाने।
चितिप्रज्वलद्वह्निकीलाजटाले शिवाकारशावासने सन्निषण्णां ॥

महाभैरवीयोगिनीडाकिनीभिः करालाभिरापादलंवत्कचाभिः ।
भ्रमन्तीभिरापीय मद्यामिषास्त्रान्यजस्रं समं सञ्चरन्तीं हसन्तीम् ॥
महाकल्पकालान्तकादम्बिनीत्विट्परिस्पर्द्धिदेहद्युतिं घोरनादां ।
स्फुरद्द्वादशादित्यकालाग्निरुद्रज्वलद्विद्युदोघप्रभादुर्न्निरीक्ष्यां ॥
लसन्नोलपाषाणनिर्म्माणवेदिप्रभश्रोणिविम्बां चलत्पीवरोरुम् ।
समुत्तुंगपीनायतोरोजकुंभां कटिग्रंथितद्वीपिकृत्युत्तरीयाम् ॥
स्रवद्रक्तवल्गन्नृमुण्डावनद्धसृगावद्धनक्षत्रमालैकहारां ।
मृतब्रह्मकुल्योपक्लृप्ताङ्गभूपां महाट्टाट्टहासैर्जगत्त्रासयन्तीं ॥
निपीताननान्तामितोद्वृत्तरक्तोच्छलद्धारया स्नापितोरोजयुग्मां ।
महादीर्घदंष्ट्रायुगन्यञ्चदञ्चल्ललल्लेलिहानोग्रजिह्वाग्रभागां ॥
चलत्पादपद्मद्वयालम्बिमुक्तप्रकम्पालिमुस्निग्धसंभुग्नकेशां ।
पदन्यासभासंभारेति(संभार?)भीताहिराजाननोद्गच्छदात्मस्तुतिव्य-
स्तकर्णां ॥
महाभीषणां घोरविंशार्द्धवक्त्रांस्तथासप्तविंशान्वितैर्ल्लोचनैश्च ।
पुरादक्षवामे द्विनेत्रोज्वलाभ्यां तथान्यानने चि(च)त्रिनेत्राभिरामाम् ॥
लसद्वीपिहर्य्यक्षफेरुप्लवंगक्रमेलर्क्षतार्क्षद्विपग्राहवाहैः ।
मुखैरीदृशाकारितैर्भ्राजमानां महापिंगलोद्यज्जटाजूटभारां ॥
भुजैः सप्तविंशांकितैर्व्वामभागे युतां दक्षिणे चापि तावद्भिरेव ।
क्रमाद्रत्न मा[६३ ख]लां कपालं च शुष्कं ततश्चर्मपाशं सुदीर्घं दधानां ॥
ततः शक्तिखट्वाङ्गमुण्डं भुशुण्डीं धनुश्चक्रघंटाशिशुप्रेतशैलान् ।
ततोनारकङ्कालवभ्रूरगोन्मादवंशीन्तथा मुग्दरं वह्निकुण्डम् ॥
अधो डम्मरुं पारिघं भिन्दिपालं तथा मौशलं पट्टिशं प्राशमेवं ।
शतघ्नीं शिवापोतकं चाथ दक्षे महारत्नमालां तथा कर्त्तृखड्गौ ॥
चलत्तर्ज्जनीमङ्कुशं दण्डमुग्रं लसद्रत्नकुम्भं त्रिशूलं तथैव ।
शरान् पाशुपत्यांस्तथा पञ्चकुन्तं पुनः पारिजातं छुरीन्तोमरं च ॥

प्रसूनस्रजं डिण्डिमं गृध्रराजं ततः कोरकं मांसखण्डं श्रुवञ्च ।
फलं वीजपूराह्वयं चैव सूचीन्तथा पर्शुमेत्रं गदायष्टिमुग्रां ॥
ततो वज्रमुष्टिं कुणप्पं सुघोरं तथा लालनं धारयन्तीम्भुजैस्तैः ।
जवापुष्परोचिष्फणीन्द्रोपक्लृप्तक्वणन्नूपुर न्द्वसक्तांघ्रिपद्मां ॥
महापीतकुम्भीनसावद्धनद्धस्फुरत्सर्व्वहस्तोज्वलत्कंकणाञ्च ।
महापाटलद्योतिदर्व्वीकरेन्द्रावसक्ताङ्गदव्यूहसंशोभमानां ॥
महाधूसरत्त्विड्भुजङ्गेन्दुक्लृप्तस्फुरच्चारुकाटेयसूत्राभिरामां ।
चलत्पाण्डुराहीन्द्रयज्ञोपवीतत्विडुद्भासिवक्षः स्थलोद्यत्कपाटां ॥
पिषङ्गोरगेन्द्रावनद्धावशोभामहामोहवीजांगसंशोभिदेहां ।
महाचित्रिताशीविषेन्द्रोपक्लृप्तस्फुरच्चारुताटङ्कविद्योतिकर्णाम् ॥
वलक्षाऽहिराजावनद्धोर्द्ध्वभासिस्फुरत्पिङ्गलोद्यज्जटाजूटभारां ।
महाशोणभोगीन्द्रनिस्यूत मु[६४ क]ण्डोल्लसत्किङ्किणीजाल
संशोभिमध्यां ॥
सदा संस्मरामीदृशीं कामकालीं जयेयं सुराणां हिरण्योद्भवानाम् ।
स्मरेयुर्हि येऽन्येऽपि ते वै जयेयुर्विपक्षान्मृधे नात्रसन्देहलेशः ॥
पठिष्यन्ति ये मत्कृतं स्तोत्रराजं मुदा पूजयित्वा सदा कामकालीम् ।
न शोको न पापं न वा दुःखदैन्यं न मृत्युर्न रोगो न भीतिर्नचापत् ॥
धनं दीर्घमायुः सुखंवुद्धिरोजो यशः शर्म्मभोगःस्त्रियः सूनवश्च ।
श्रियो मङ्गलं बुद्धिरुत्साह आज्ञा लयः शर्म्मविद्या भवेन्मुक्तिरन्ते ॥

इति महावामकेश्वरतंत्रे कालकेयहिरण्यपुरविजये रावणकृतकामकाली-
भुजंगप्रयातस्तोत्रराजं समाप्तम् ।

देव्युवाच ॥

महायोगिन् महाकाल करुणाम्बुनिधे शिव ।
अत्यद्भुतमिदं त्वत्तः श्रुतं कवचमुत्तमम् ॥

विशेषेण श्रुतं सर्व्वं मया चैतन्महेश्वर ।
इदानीं श्रोतुमिच्छामि ममप्रीतिकरं प्रिय ॥
कीदृशेन विधानेन आशु सा च प्रसीदति ।
तत् कथयस्व देवेश यदि(स्नेहोऽस्ति?)मेऽस्ति स्नेहस्तव ॥

श्रीमहाकाल उवाच ॥

अथ सर्व्वप्रयोगानां राजानं व्याहरामि ते ।
यदेकवारकरणात् कृतकृत्योऽभिजायते ॥
महागोप्यतमन्देवि प्रसन्नाकलसं(सकल?)म्विधिम् ।
विशेषतस्तथाशक्तिसामरस्यकरं विधिं ॥
गुरुदैवतमंत्राणां यथैकत्वं फलप्रदं ।
तीर्थदैवतशक्तीनां तथैकत्वं महाफलम् ॥
क्षत्रविट्शूद्रजातीनामेष एव विधिर्म्मतः ।
देवस्य मध्यतोल्लेखादुभयत्र समाक्रिया ॥
द्विजातेः केवलंतीर्थे नाऽधि [६४ ख] कारः प्रशस्यते ।
निन्दा तु प्राणनाशाय त्यागात्सिद्धिक्रियाफलः ॥
निन्दात्यागौ न कर्त्तव्यौ देवि सिद्धिमभीप्सता ।
प्रत्यष्टम्यां चतुर्द्दश्यां संक्रान्तौ मंगलेऽहनि ॥
व्यतीपातोपरागे च स्वेच्छा यस्मिन्दिनेऽपिवा ।
कल्पिताच्चार्चादिसंभारः कृतनित्यक्रियो दिवा ॥
भुक्तान्नो वाप्यभुक्तान्नो विधिं कुर्य्यान्महानिशि ।
तोर्थशक्त्योर्भिदां वच्मि तत्र चेतो निवेशय ॥
माध्वीका पानसी चैव खार्ज्जूरी च मधूकिका ।
गौडी ताली चतुर्जाता तण्डुली पुष्पसंभवा ॥

माध्वीका च गौधूमी तथौषधिशिफात्मिका ।
क्षत्रविट्शूद्रजातीनां प्रशस्ता द्वादशैव हि ।।
मधुक्षीरं तथाद्यंच नारिकेलोदकं प्रिये ।
ब्राह्मणानामिदं शस्तं फलानां च रसास्तथा ।।
शक्तिश्च द्विविधा प्रोक्ता स्वकीया परकीयका ।
अभावे परकीयायाः स्वीयां शक्तिं प्रकल्पयेत् ।।
न व्यंगीं नाधिकाङ्गींञ्च न रुक्षां न शिरालिनीं ।
न पिङ्गां नाधिकां श्यामां जरन्तीन्न करालिनीं ।।
नादृष्टरजसं कन्यां नार्त्तवं समुपागतां ।
नान्तर्वत्नीन्न वा वालां नापत्यां न गलत्कुचां ।।
गौरांगीं युवतीं रम्यां पीनोन्नतपयोधरां ।
विशालजघनां चारुदन्तपंक्तिविराजितां ।।
दीक्षितां कुलमार्ग्गेषु भक्तिश्रद्धापरायणां ।
सदा वचस्कारिणीञ्च भयहीनां हसन्मुखीं ।।
सर्व्वजातीर्द्विजः कुर्याद् विप्रां त्यक्त्वा तु भूमिपः ।
उभे विहाय वैश्यश्च तिस्रः शूद्रश्च वर्ज्जयेत् ।।
भक्तौ दृढ़ायां जातायां [६५ क] सर्व्वा सर्व्वेषु शस्यते ।
तीर्थमित्रमथो वच्मि हैमं वा राजतं तथा ।।
पार्थिवं नारिकेलं वा वात्नीयं सर्व्व सिद्धिदं ।
तीर्थप्रासेषु पूजायामुभयत्रापि युज्यते ।।
अथ कल्पितपूजादिसंभारो भक्तितत्परः ।
शून्यागारे निर्ज्जने च श्मशाने च चतुष्पथे ।।
गृहे वा निःशलाके स्याद्यत्र वा मनसो रुचिः ।
कुर्याद् गोप्यतमं सर्व्वं पशुर्नैवेक्ष्यते यथा ।।

प्रक्षालितांघ्रिराचान्त उत्तराभिमुखो विभीः ।
दृढ़ं पद्मासनं कृत्वा व्याघ्रचर्म्मोपरिस्थितः ॥
भूतापसारणं कृत्वा तालैर्द्दिग्बंधनं तथा ।
अंगन्यासन्ततः कृत्वा करांगन्यासमाचरेत् ॥
मातृकान्यासपीठादिन्यासं कुर्य्यात्पुरोक्तवत् ।
अर्घ्यस्थापनपर्य्यन्तं सर्व्वं कुर्यादतन्द्रितः ॥
ततोगोमयलिप्तायां भूमौ स्वस्तिकाजुषि ।
स्थापयेत्क्षालितं पीठं दारवं धातुमत्तथा ॥
वक्ष्यमाणेन मंत्रेण गोमयालिप्तभूपरि ।
आदौ तारत्रयं प्रोच्य मायायाष्पंचकं ततः ॥
कूर्च्चांकुशमहाक्रोधामृतगुह्यारतिप्रियाः ।
कापालभैरवी नीलचामुण्डाशक्तिमानसाः ॥
योगिनी काली कामगारुडविघ्नतः ।
भारुण्डा खेचरी काम लक्ष्मीमेते त्रिशक्तयः ॥
सद्योजातादिकः पंच कूटाश्च तदनन्तरं ।
दानवाधार धनदा कूर्म्मानन्तविषामराः ॥
एत्वेहिभगवत्येवं ततः पदमुदीरयेत् ।
ततः कामकलाकालिसर्व्वशक्तिपदं ततः ॥
समन्विते इति प्रोच्य प्रसन्नापदमुच्चरेत् ।
शक्तिभ्यां सामरस्यं च त [६५ ख] त उद्गारयेत्सुधीः ॥
कुरुद्वंद्वं मम ततः पूजां गृह्ण युगं वदेत् ।
शत्रून् हन युगं प्रोच्य युगं मर्द्दय पातय ॥
राज्यं मे समुद्धृत्य देहि दापय युग्मकं ।
शाकिनी योगिनी कूर्च्चस्त्रीह्रियां नवकं वदेत् ॥

पञ्चचत्वारिंशवीजमेवं भवति भाविनि ।
फट्त्रयान्ते हृच्छिरोभ्यां मंत्रः सर्व्वशुभावहः ॥
उच्चार्य्यामुं मनुं पीठं स्थापयेत् स्थण्डिलोपरि ।
पुनर्गृहीत्वा सिन्दूरं प्रशस्तं प्रसृतित्रयं ॥
वक्ष्यमाणेन मंत्रेण पीठे मण्डलमाचरेत् ।
प्रणवं शाकिनीवीजं फेत्कारीं योगिनीमपि ॥
चण्डं भूतं परां नादं रौद्रमानन्दमंकुशं ।
फट्पंचकं कामकलाकालीसंबोधनं ततः ॥
घोररावे इतिततो विकटदंष्ट्र इत्यपि ।
कालिकापालि इति च ....॥
नररुधिर इत्युक्त्वा वसामांस इतीति च ।
भोजनप्रियइत्युक्त्वा भगप्रियइतीरयेत् ॥
भगांकुश इति प्रोच्य भगमालिनि चोद्धरेत् ।
भगोन्मादिनि इत्युक्त्वा भगात्तव इतीरयेत् ॥
इहागच्छ युगान्तिष्ठ सन्निधिं कुरु च द्वयं ।
ततश्च भरतोपास्या गुह्यकाल्याश्च षोडशी ॥
ततः कामकलाकाल्यास्त्रैलोक्याकर्षणं मनुः ।
शाकिनी डाकिनीवीजात्फेत्कारीवीजमुद्धरेत् ॥
कूर्च्चवधूं योगिनीञ्च प्रणवस्य च पञ्चकम् ।
फडन्ते हृच्छिरश्त्रापि महामंत्रोऽयमीरितः ॥
अनेन पीठोपरि हि सिन्दूरैर्म्मण्डलं चरेत् ।
ततः स्नातां शुचिं शक्तिं सर्व्वालङ्कारभूषितां ॥
आनीयानेन मंत्रेण तस्या वस्त्रं विमोचयेत् ।
तारप्रासादवेतालरुद्रद्रावणभै[६६ क]रवीः ॥

शाङ्करब्रह्मभारुण्डा चामुण्डा कालमारुण्डाः ।
पराकाली इति क्षेत्रपालकामरमा(ह्वयेत्?)ह्रियः ॥
फेत्कारीम्विशतितमां नमः स्वाहान्तगो मनुः ।
चतुर्व्विंशत्यक्षरेण तां नग्नां कारयेत्सुधीः ॥
सिन्दूरमण्डलस्योर्द्ध्वं कृतपद्मासनां स्त्रियम् ।
उपवेश्य तदङ्के तु पूर्वोक्तङ्कलशं क्षिपेत् ॥
वक्ष्यमाणेन मनुना योनिमण्डलमध्यगम् ।
तारं षड्दीर्घकोक्रश्च प्रासादांकुशपाशकाः ॥
कूर्च्चं भूतश्च धनदा हयग्रीवकुमारकौ ।
त्रिशक्तिस्नायिनीतत्त्वं कूर्म्मद्रावणदानवाः ॥
ततो जय जयेत्युक्त्वा भगवत्यपि संवदेत् ।
ततः कामकलाकालि सर्व्वेश्वरि पदं ततः ॥
इहागत्य चिरन्तिष्ठ तिष्ठेति तदनन्तरम् ।
ततश्च प्रोच्चरेद्देवि यावत्पूजां करोम्यहं ॥
ततस्त्रयं हि वीजानां पंचानां समनुद्धरेत् ।
शाकिनीयोगिनीक्रोधक्रीवधूनां पृथक्पृथक् ॥
अन्ते फट् यं त्र च स्वाहा कलशस्थापने मनुः ।
इमं मंत्रं गृणन् जुष्टं तस्या योन्युपरि न्यसेत् ॥
ततः पूर्व्वोदितं तीर्थम्भिन्नपात्रस्थितं पुरः ।
आनीयाच्छाद्य हस्ताभ्यां त्रैलोक्याकर्षणं जपेत् ॥
दशकृत्वस्ततो धेनुमुद्रया चावगुण्ठनं ।
दिग्बंधनं छोटिकया कुर्य्याच्चि तदनन्तरम् ॥
तस्योपरिष्टात्क्रमशो नवमुद्राः प्रदर्शयेत् ।
शक्तिं कपालं योनिञ्च सामरस्यं ततः परम् ॥

मुद्रासु स्वदर्शितास्वेवं सर्व्वं तद्विफलं भवेत् ।
तत्र दिक्षुविदिक्ष्वेवं शक्तीरष्ट प्रपूजयेत् ॥
इच्छाक्रियासिद्धिॠद्धिः स्वाहाभी[६६ ख]मा करालिनो ।
चण्डसंकर्षणीचेति दिक्ष्वष्टसु पृथक्स्थितं ॥
मध्येनंगकुलां देवीं गंधपुष्पादिभिर्य्यजेत् ।
त्रैलोक्याकर्षणेनैव मध्ये कामकलामपि ॥
तद्भक्ता गुह्यकालीं वा पूजयेयुर्हि तत्स्थले ।
कुर्य्यात्ततः शापमोक्षं कुल द्रव्यस्य भाविनि ॥
वैदिकागममंत्राभ्यां द्रव्यशापविमोक्षणं ।
तत्रादौवैदिकं वच्मि कथयिष्ये ततः परम् ॥
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं ।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥
सूर्य्यमण्डलसंभूते वरुणालयसंभवे ।
अमावीजमये देवि शुक्रशायाद्विमुच्यतां ॥
वेदानां प्रणवोवीजं ब्रह्मानन्दमयं यदि ।
तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु ॥
इमं मंत्रत्रयं देवि वैदिकं परिकीर्त्तितं ।
आगमोक्तं मन्त्रमपि मयोक्तमवधारय ॥
तारं कूर्च्चंण्डाकिनीञ्च फेत्कारीं योगिनीमपि ।
लक्ष्मीमन्मथचामुण्डाभारुण्डाभैरवीतड़ित् ॥
वामदेवं ततः कूटमीशानं च ततः परं ।
ततः प्रसन्ने इति च प्रसन्ना तदनन्तरं ॥
रूपिण्यतो भगवति कालिकामकलाक्षरात् ।
शुक्रदत्तं शापमिति मुञ्च मुञ्चापय द्वयं ॥

परमानंदात्सामरस्यकारिणीति समुद्धरेत् ।
इदं ब्रह्मभूयादहं ब्रह्मभूयासमित्यपि ॥
पठेद्वारत्रयमिदं वीजानीह त्रयोदश ।
व्युत्क्रमात्पठनीयानि फट्नमो वह्निकामिनी ॥
एतन्मंत्रेणाभिमंत्र्य षड्दीर्घैरमृतंस्मरेत् ।
ब्रह्मशापमोचितायै सुधादेव्वै [६७ क] नमो वदेत् ॥
दशवारान्जपित्वैवं कामषड्दीर्घमुच्चरेत् ।
कुलकृत्स्नमिति प्रोच्य शापं मोचय युग्मकं ॥
अमृतं स्रावय द्वन्द्वं वह्निजायान्तगो मनुः ।
दशवारानिदंजप्त्वा त्रैलोक्याकर्षणं जपेत् ॥
ततो द्रव्यस्य मध्ये तु ध्यायेदानन्दभैरवं ।
आनन्दभैरवीं चापि सामरस्यपदं गतौ ॥
सूर्य्यकोटिप्रतीकाशं चन्द्रकोटिमुशीतलं ।
वृषारूढ नीलकण्ठं सर्व्वाभरणभूषितं ॥
कपालखट्वांगधरं घण्टाडमरुवादिनं ।
पाशाङ्कुशधरं देवं गदामुशलधारिणं ॥
खड्गखेटकचक्रर्ष्टिपर्शुमुद्गरशूलिनं ।
भुशुण्डीधारिणं घोरं वरदाभयपाणिकं ॥
लोहितं देवदेवेशं भावयेद्भैरवीयुतं ।
एवं ध्यात्वा गुह्यवीजैर्व्वषट् तं पूजयेत् त्रिधा ॥
ततोध्यायेत्सुधादेवीञ्चन्द्रकोट्यमृतप्रभां ।
हिमकुन्देन्दुधवलां पचवक्त्रां त्रिलोचनां ॥
अष्टादशभुजैर्य्युक्तां सर्व्वानन्दकरोद्यनां ।
प्रहसन्तीं विशालाक्षीं देवदेवस्य संमुखे ॥

गुह्यवीजैः सुधादेव्यै वौषट् संपूज्य पार्व्वति ।
त्रिकोणचक्रं संलिख्य वामावर्त्तेन वै दले ॥
कोणाच्च दक्षिणादूर्ध्वं दक्षिणादुत्तरावधि ।
अकारादिक्षकारान्तं गुह्यवीजं त्रिवारकं ॥
विलिख्य शाकिनीवीजं दशकृत्वो जपेत्तु तं ।
ध्यात्वामृतत्वं द्रव्येऽस्मिन् शिवशक्ति समागमात् ॥
अमृतीकृत्य धेन्वा तद् वारुणं चाष्टधा जपेत ।
कुर्यात्ततोमृतन्यासं न्यासराजं महोदयम् ॥
न्यासमेनं विना देवि द्रव्यशुद्धिर्न्न जायते ।
पञ्चवि [६७ ख] शतितत्त्वानि तावन्त्येव स्थलानि च ॥
वक्ष्यमाणेन मंत्रेण तेपु स्थानेषु विन्यसेत् ।
विधाय पुरतो वस्तु वामहस्तकनिष्ठया ॥
तृतीयपर्वाङ्गुष्ठस्य योगान्मुद्राभिजायते ।
परमीनामतां स्पृष्ट्वा तया तत् तत् स्थलं न्यसेत् ॥
आदाविरां ततः स्वांगं ततः शक्तिं ततो घटम् ।
मंत्रपाठेन चैकेन न्यसेद्देवि चतुर्ष्वपि ॥
अयमेव विधिर्ज्ञेयो न्यासनिर्व्वाणनामनि ।
न्यासे तथासामरस्ये किन्तु भिन्नं स्थलं भवेत् ॥

इति श्रीमदादिनाथविरचितायां महाकालसंहितायां पुजाविधिर्न्नाम पटलः ।

श्री महाकाल उवाच ॥

ततः परं प्रकुर्व्वीत न्यासं देव्यमृतान्वयम् ।
दोपनाशगुणाधिक्ये जायते तेननिश्चितं ॥

न्यासस्यास्यामृताख्यस्प कात्यायनऋषिर्म्मतः ।
छन्दोविराडितिख्यातं कालीकामकलासुरी ॥
कामवीजं कीलकं स्याद्योगिनीशक्तिरुच्यते ।
वधूवीजमिह प्रोक्तं विनियोगः प्रकीर्त्तितः ॥
आनन्दानुभवायोच्चैरथवा सर्व्वसिद्धये ।
पंचविंशतिपात्राणि पूर्व्वोक्तानि प्रकल्पयेत् ॥
साधाराणि क्रमाद्देवि व्यत्यासं नैव कल्पयेत् ।
एतन्यासे प्रात्यहिके प्रोक्तं मुक्त्वा समाचरेत् ॥
ज्ञानेछाकृतिधर्म्माश्च वैराग्यैश्वर्य्यमित्यपि ।
शक्तिः कैवल्यमुत्साहधैर्य्यं गुप्तविवेककौ ॥
विकारः सुखमानन्दः संज्ञा पुण्यक्रिया तथा ।
विकृतिः प्रकृतिश्चैवाहंकारोमहदादिकः ॥
तन्मात्रलिंगं परमात्मानौ चेतिप्रकी[६८ क]र्त्तितौ ।
पुनस्तत्त्वान्तरं पंचविंशं देवि निशामय ॥
शिवेश्वरौ शुद्धिविद्ये लिङ्गजीवात्मश्म(सू)क्ष्मकाः ।
अविद्या नियतिः कालः कला रागः कुलामृतं ॥
बुद्धिर्माया मनुः कामो रजःसत्त्वं तमस्तथा ।
युक्तिः सिद्धिः सामरस्यं पंचविंशमिदं क्रमात् ॥
शिरो ललाटास्यकण्ठाः स्कंधौ चापि कदोनिकौ ।
मणिवंधावंगुलीनां मूलाग्रौ परिकीर्त्तितौ ॥
रं क्षणौ जानुनीगुल्फौ पादांगुल्यंघ्रिकाघ्नकाः ।
व्यापकं सर्व्वशारीरं पंचविंशत्तमं प्रिये ॥
तारवाग्भवह्लीकूर्च्चवधूलक्ष्मीमनोभ्रुवाम् ।
पाशांकुशमहाक्रोधभूतप्रासादविद्युतां ॥

पराचण्डामृतप्रेत फेत्कारी शाकिनी रतिः ।
पंचकूटास्तात्पुरुषाश्चामुण्डा भैरवी विषाः ॥
ब्रह्मवेतालभारुण्डा नीलद्रावणमारसाः ।
वज्रशांकरकापालरौद्रानन्दगरुत्मतां ॥
चत्वारिंशच्च वीजानामुद्धरेत्प्रथमं सुधीः ।
इदममृतीकृत्येति पदंदद्यात्ततः परं ॥
परमात्मनीतिसंलिख्य(पञ्चवा)रमितीरयेत् ।
जुषस्व वह्निजायान्त एकषष्ठचक्षरो मनुः ॥
प्रतिवारं मन्त्रपाठं सकृद्वापि प्रयोजयेत् ।
ज्ञानात्मने शिवायेति प्रोक्त्वा शीर्षं न्यसेत्प्रिये ॥
एवं पूर्वोक्तविधिना त्रितयं त्रितयं वदेत् ।
प्रोक्ष्यण्यादाय पीयूषं तत्तत्पात्रे निवेशयेत् ॥
तेनैव मंत्रेण सकृत्प्रतिवारमथापि वा ।
पुनरादाय षट्पात्राण्यन्यानि परिकल्पयेत् ॥
वीरो भोगः शक्तिकुलं गुरुर्द्दैवतमेव च ।
तत्रैकषष्ठचक्षरिणा प्रत्येकं मनुनार्च्चयेत् ॥
सामरस्यं च निर्व्वाणमत्रैव समये चरेत् ।
वक्ष्यमाणेनमं[६८ ख]त्रेण तद्वस्तु स्थापयेद्घटे ॥
प्रणवः शाकिनी कूर्च्चं फेत्कारी भोग मन्मथः ।
लज्जाप्रेतरमामेधसुधाकालीरतिक्रमाः ॥
संहारानाख्यभासाज्ञाविशुद्धयानाहतप्रभाः ।
वृहद्रथन्तरज्येष्ठपुण्डरीकमहाव्रतान् ॥
सौत्रामण्यश्वमेधैडाविश्वजित्सिद्धवारुणान् ।
कूटानष्टादशैतांस्तु प्रोच्चरेत्तदनन्तरम् ॥

पञ्चामृतं समुद्धृत्य सुधारूपेण चोद्धरेत् ।
कुंभेस्मिन्संविश द्वन्द्वं तिष्ठापि सन्निधिकुरु ॥
सप्तविंशत्सुधादीनि प्रतिलोमं ततोवदेत् ।
अन्तेस्त्रत्रितयं हार्द्दवन्हिजायान्तगोमनुः ॥
इतिसंस्थाप्य पीयूषं कुंभे आवाह्य कालिकां ।
पुष्पस्रजाछाद्य घटं मृत्विङ्नागांकमण्डितं ॥
दशोपचारैः संपूज्य स्तुत्वा नत्वा विधूप्य च ।
पंचविंशतिपात्राणां देव्या मध्ये च सम्मितं ॥
पात्रं संस्थाप्य साधारं योनिमुद्रां प्रदर्श्य च ।
भूमौ त्रिकोणमालिख्य तद्बहिश्चतुरस्रकं ॥
आधारशक्तिं संपूज्य पात्रं तस्योपरि न्यसेत् ।
मूलेन पात्रं संवीक्ष्य शाकिन्यस्त्रेण क्षालनम् ॥
तेनैव ताडनं कृत्वा कवचेनावगुण्ठयेत् ।
पुनरन्यघटस्थायिद्रव्यं दक्षिणतो न्यसेत् ॥
पात्रं वामकरे कृत्वा मनुनानेन पूजयेत् ।
ऊहः सर्व्वत्र कर्त्तव्यः स्वेष्टदेव्यास्तु नामनि ॥
तारं त्रपां तथा कूर्च्चं योगिनीं शाकिनीमपि ।
काकिनीं खेचरीन्नागं भारुण्डात्रिशिखामपि ॥
प्रोच्चार्य वामहस्ते तु देव्याः पात्रं निधापयेत् ।
ततस्तारं च मायां च शाकिनोन्त्रिपुटां स्मरं ॥
मोहाद्धचुपात्राशनाय नमउ[६६ क]च्चारयेत्सुधीः ।
डाकिनीह्लीरमाकालवेदीसानुवलिस्त्रियः ॥
उच्चार्य्यसोहदेव्यर्घ्यपात्राधारमितीरयेत् ।
साधयामि नमः प्रोच्य धूपयेत्संविदापुरैः ।

संपूज्य पात्राधारंहि पात्रं संपूजयेत्ततः ।
डाकिनीं च त्रपां लक्ष्मीं तारकं कोणखेदकौ ॥
आग्नेयास्त्रं सवामश्रु कूटं वहिरथं तथा ।
धर्म्याग्निसोमसूर्याञ्च सकलान्नमर्ईरयेत् ॥
त्रपां रमां समुच्चार्य्याक्षरं य श ह वर्गकं ।
धूम्रार्च्चि नीलरक्ता च कपिला विस्फुलिंगिनी ॥
ज्वालिन्यर्चिष्मतो हव्यवाहिनी कव्यवाहिनी ।
रौद्री संहारिणी चेति कलां श्रीपादुकान्नमः ॥
इत्याधारं पुनश्चार्घ्यपात्रगर्भं विधूपयेत् ।
वक्ष्यमाणेन विधिना सुगंधिद्रव्यविस्तरैः ॥
तारं लज्जां च लक्ष्मीञ्च कामं मुक्तां नृसिंहकम् ।
सन्धूप्य विन्यसेत्पात्रं त्रिपाद्यां साधकोत्तमः ॥
लज्जां लक्ष्मीं स्मरंकूर्च्चं डाकिनीं शाकिनीं वलिम् ।
सोहाम्वर्घ्यपात्रमुक्त्वा स्थापयामि नमो वदेत् ॥
अथ साधारमर्घ्यं तं पूजयेत् परमेश्वरि ।
लज्जां लक्ष्मीं रुपं कामं योगिनीं शाकिनीं सुधां ॥
क्षेत्रं पात्रं गारुडञ्च कूटं च द्वादशाहकं ।
सिद्धिप्रदद्वादशकलात्मने सूर्येतिकीर्त्तयेत् ॥
मण्डलायार्घ्यपात्राय नमउच्चारयेत्ततः ।
त्रपां लक्ष्मीं स्मरं कूर्च्चं वक्ष्यमाणकलादिभिः ॥
श्रीपादुकां नम इति पूजयेत्तदनन्तरम् ।
तपिनी तापिनीचैव भ्रामरी क्लेदिनी तथा ॥
शोधिनी शेधिनी चैव वारुण्याकर्षिणी तथा ।
सुषुम्णा [६८ ख] वृष्टिवाहा च ज्येष्ठा चैव हिरण्यका ॥

पूजयित्वा वामभागे सिन्दूरैर्म्मण्डलं चरेत् ।
उत्थाप्य दक्षिणाद्भागाद्वक्ष्यमाणमनुं वदन् ॥
स्थापयेत्पूर्णकुंभन्तं वामभागस्थ मण्डले ।
प्रणवं वाग्भवं लज्जां लक्ष्मीं कामं च शाकिनीम् ॥
योगिनीन्त्रिशिखां कूर्च्चं फेत्कारीजम्भपंक्तयः ।
सिन्दूरगंधपुष्पाद्यैः कुलकुम्भं प्रपूजयेत् ॥
सृष्टचा स्थित्या च संहारा नाख्या भासा कूटकैः ।
ततोलज्जां रमां कूर्च्चं कूटंसंहारमेव च ॥
हिरण्यगर्भकूटञ्च आनन्दभैरवाय च ।
वौषट् त्रिवारमुच्चार्य्य कराभ्यां कुंभमुद्धरेत् ॥
तीर्थसंस्थापने कुंभे पूर्व्वोक्तं मंत्रमुच्चरन् ।
शतार्णं मन्त्रमथवा सहस्रार्णमथापि वा ॥
जपन्पात्रं पूरयीत निःशब्दं सूक्ष्मधारया ।
तारं मैधं त्रपां लक्ष्मीं स्मरकूर्च्चौ च शाकिनीम् ॥
उच्चार्य वक्ष्यमाणेन श्लोकेन पिहितं चरेत् ।
ब्रह्माण्डखण्डसंभूतपीयूपसमतावह ॥
आपूरित महापात्र त्वमशेपरसं वहेः ।
अमृतं नाभ संकूटं सिद्धकूटं समुच्चरन् ॥
संवेष्टयेत् ततः पात्रं मुद्रया लेलिहानया ।
पंचमुद्रां ततः पश्चाद्दर्शये···त्तथा ॥
स्तंभनञ्चतुरस्रञ्च मत्स्यं गोक्षुरमेव च ।
योनिमुद्रा च विज्ञेया पञ्चमुद्रामहाफलाः ॥
अस्मिन्नेवक्षणे देवि पंचविद्यां समुच्चरेत् ।
मैधत्रपारमा मैधा अमृते अमृतोद्भवे ॥

अमृतवर्षिण्युच्चार्य्य कामार्णादमृतं वदेत् ।
ततश्च स्रावयद्वन्द्वं भैरवीवीजमुच्चरेत् ॥
ततः सुधे शुक्रशापंमोच [७० क] येतिप्रकीर्त्तयेत् ।
चतुरन्वयिनां सिद्धिसामर्थ्यं दहयुग्मकं ॥
उक्त्वा महाखेचरीति मुद्रां प्रकटय द्वयं ।
कूर्च्चस्वाहान्तगो मंत्रः प्रथमः परिकीर्त्तितः ॥
मैधत्रयं ह्लषड् दीर्घसुधाकृत्य ततः परं ।
शापं नाशय इत्युक्त्वा अमृतं स्रावयद्वयं ॥
मन्त्रोद्वितीयः स्वाहान्तस्तृतीयमवधारय ।
मैधत्रयमुषस्तृप्ताऽपराधान्परिकीर्त्तयेत् ॥
विकारशोधिनि प्रोच्य कुलद्रव्यस्य चेत्यपि ।
विकारान्हर युग्माग्निवल्लभाय तृतीयकः ॥
चतुष्टयं वाग्भवस्य अमृते अमृतोद्भवे ।
इत्युच्चार्य वदेदमृतवर्षिणीति ततः परं ॥
महाप्रकाशयुक्ते च स्वाहान्तोयं चतुर्थकः ।
चतुः सारस्वतं सोमं त्रपाकूर्च्चस्मरस्त्रियः ॥
तिरस्करिणि संबोध्य सकलेति जयेति च ।
वाग्वादिनीतिसकलात्ततः पशुजनेति च ॥
आभिस्तुपंचविद्याभिः सर्व्वदोषविघातिभिः ।
इति ते कथितो व्यासान्मन्त्रध्यानाऽर्च्चनक्रियाः ॥
वैशेषिकाः क्रियायोगाः प्रयोगा औपचारिकाः ।
सांप्रतं ब्रूहि मे किन्त्वमाकर्णयितुमिच्छसि ॥

इति श्रीमदादिनाथ विरचितायां महाकालसंहितायां नानाप्रयोगकथनं-
नाम द्विशताधिकैक पंचाशत्तमः पटलः

देव्युवाच ।

त्वत्तः श्रुतं मया नाथ देव देव जगत्पते ।
देव्याः कामकलाकाल्या विधानं सिद्धिदायकम् ॥
त्रैलोक्यविजयस्यापि विशेषेण श्रुतो मया ।
तत्प्रसंगेन चान्यासां मन्त्रध्याने तथा श्रुते ॥
इदानीं जायते नाथ शुश्रुषा मम भूय[७० ख]सो ।
नाम्नां सहस्रे त्रिविधमहापापौघहारिणि ॥
श्रुतेन येन देवेश धन्या स्यां भाग्यवत्यपि ।

श्रीमहाकाल उवाच ।

भाग्यवत्यसि धन्यासि सन्देहो नात्र भाविनि ।
सहस्रनामश्रवणे यस्मात्ते निश्चितं मनः ॥
तस्या नाम्नान्तु लक्षाणि विद्यन्ते चाथ कोटयः ।
तान्यल्पायुर्मतित्वेन नृभिर्द्धारयितुं सदा ॥
अशक्यानि वरारोहे पठितुं च दिने दिने ।
तेभ्यो नामसहस्राणि साराण्युद्धृत्य शम्भुना ॥
अमृतानीव दुग्धाब्धेर्भूदेवेभ्यः समर्प्पितं ।
कानिचित्तत्र गौणानि गदितानि शुचिस्मिते ॥
रूढाण्याकारहीनत्वाद् गौणानि गुणयोगतः ।
राहित्याद्रूढिगुणयोस्तानि सांकेतकान्यपि ॥
त्रिविधान्यपि नामानि पठितानि दिने दिने ।
राधयन्त्यीक्षितानर्थान्ददत्यमृतमव्ययं ॥
क्षपयत्यपमृत्युं च मारयन्ति द्विपोऽखिलान् ।
घ्नन्ति रोगानथोत्पातान्मंगलं कुर्व्वतेन्वहं ॥

किमुतान्यत् स ग सन्निधापयत्यर्थिकामपि ।
त्रिपुरघ्नोऽप्यदोनामसहस्रं पठति प्रिये ॥
तदाज्ञयाऽहमपि कीर्त्तयामि दिनेदिने ।
भवत्यपीदमस्मत्तः शिक्षित्वा तु पठिष्यति ॥
भविष्यति च निर्णीतं चतुर्व्वर्गस्य भाजनं ।
मनोन्यतो निराकृत्य सावधाना निशामय ॥
नाम्नां कामकलाकाल्याः सहस्रम्मुक्तिदायकं ।
ॐ अस्य कामकलाकालीसहस्रनामस्तोत्रस्य श्री ।
त्रिपुरघ्नऋषिरनुष्टुप् छन्दस्त्रिजगन्मयरूपिणी ॥
भगवती श्री कामकलाकाली देवता क्लीं वीजं स्फ्रों ।
शक्तिः हुं कीलकं क्ष्रौं तत्त्वं श्री का[७१ क]मकला-
कालीसहस्रनामस्तोत्रपाठे जपे विनियोगः ॐ तत्सत् ।३।
ॐ क्लीं कामकलाकाली कालरात्रिः कपालिनी ।
कात्यायनी च कल्याणी कालाकारा करालिनी ॥
उग्रमूर्त्तिर्महाभीमा घोररावा भयंकरा ।
भूतिदामयहन्त्री च भवबन्धविमोचनी ॥
भव्या भवानी भोगाढ्या भुजंगपतिभूषणा ।
महामाया जगद्धात्री पावनी परमेश्वरी ॥
योगमाता योगगम्या योगिनी योगिपूजिता ।
गौरी दुर्गा कालिका च महाकल्पान्तनर्त्तकी ॥
अव्यया जगदादिश्च विधात्री कालमर्द्दिनी ।
नित्या वरेण्या विमला देवाराध्यामितप्रभा ॥
भारुण्डा कोटरी शुद्धा चञ्चला चारुहासिनी ।
अग्राह्यातीन्द्रियागोत्रा चर्च्चरोर्द्धशिरोरुहा ॥

कामुकी कमनीया च श्रीकण्ठमहिषी शिवा ।
मनोहरा माननीया मतिदा मणिभूषणा ।।
श्मशाननिलया रौद्रा मुक्तकेश्यट्टहासिनी ।
चामुण्डा चण्डिका चण्डी चार्वङ्गी चरितोज्ज्वला ।।
घोरानना धूम्रशिखा कंपना कम्पितानना ।
वेपमानतनुर्भीदा निर्भया बाहुशालिनी ।।
उल्मुकाक्षी सर्प्पकर्णी विशोका गिरिनन्दिनी ।
ज्योत्स्नामुखी हास्यपरा लिङ्गालिङ्गधरा सती ।।
अविकारा महाचित्रा चन्द्रवक्त्रा मनोजवा ।
अदर्शना पापहरा श्यामला मुण्डमेखला ।।
मुण्डावतंसिनी नीला प्रपन्नानन्ददायिनी ।
लघुस्तनी लम्बकुचा धूर्णमाना हरांगना ।।
विश्वावासा शान्तिकरी दीर्घकेश्यरिखण्डिनी ।
रुचिरा सुन्दरी कम्रा मदोन्मत्ता मदोत्कटा ।।
[७१ ख] अयोमुखी वह्निमुखी क्रोधनाऽभयदेश्वरी ।
कुडम्बिका साहसिनी खड्गकी रक्तलेहिनी ।।
विदारिणी पानरता रुद्राणी मुण्डमालिनी ।
अनादिनिधना देवी दुर्न्निरीक्ष्या दिगंबरा ।।
विद्युज्जिह्वा महादंष्ट्रा वज्रतीक्ष्णा महास्वना ।
उदयार्क्कसमानाक्षी विन्ध्यशैलसमाकृतिः ।।
नीलोत्पलदलश्यामा नागेन्द्राष्टकभूषिता ।
अग्निज्वालकृतावासा फेत्कारिण्यहिकुण्डला ।।
पापघ्नी पालिनी पद्मा पुण्या पुण्यप्रदा परा ।
कल्पान्ताम्भोदनिर्घोषा सहस्रार्क्कसमप्रभा ।।

सहस्रप्रेतराट्क्रोधा सहस्रेशपराक्रमा ।
सहस्रधनदैश्वर्य्या सहस्रांघ्रिकराम्बिका ॥
सहस्रकालदुष्प्रेक्ष्या सहस्रेन्द्रियसंचया ।
सहस्रभूमिसदना सहस्राकाशविग्रहा ॥
सहस्रचन्द्रप्रतिमा सहस्रग्रहचारिणी ।
सहस्ररुद्रतेजस्का सहस्रब्रह्मसृष्टिकृत् ॥
सहस्रवायुवेगा च सहस्रफणकुण्डला ।
सहस्रयंत्रमथिनो सहस्रोदधिसुस्थिरा ॥
सहस्रबुद्धकरुणा महाभागा तपस्विनी ।
त्रैलोक्यमोहिनी सर्व्वभूतदेववशंकरी ॥
सुस्निग्धहृदया घण्टाकर्णा च व्योमचारिणी ।
शंखिनी चित्रिणीशानी कालसंकर्पिणी जया ॥
अपराजिता च विजया कमला कमलाप्रदा ।
जनयित्री जगद्योनिर्हेतुरूपा चिदात्मिका ॥
अप्रमेया दुराधर्पा ध्येया स्वच्छन्दचारिणी ।
शातोदरी शांभविनी पूज्या मानोन्नताऽमला ॥
ॐ काररूपिणी ताम्रा वालार्क्कसमतारका ।
[७२ क] चलज्जिह्वा च भीमाक्षी महाभैरवनादिनी ॥
सात्विकी राजसी चैव तामसी घर्घराऽचला ।
माहेश्वरी तथा ब्राह्मी कौमारी मानिनीश्वरा ॥
सौपर्णी वायवी चैन्द्री सावित्री नैर्ऋती कला ।
वारुणी शिवदूती च सौरी सौम्या प्रभावती ॥
वाराही नारसिंही च वैष्णवी ललिता स्वरा ।
मैत्र्यार्य्यम्नी च पौष्णी च त्वाष्ट्रीवासव्युमारतिः ॥

राक्षसी पावनी रौद्री दास्त्री रोदस्युदुम्बरी ।
सुभगा दुर्भगा दीना चञ्चुरीका यशस्विनी ॥
महानन्दा भगानन्दा पिच्छिला भगमालिनी ।
अरुणा रेवती रक्ता शकुनी श्येनतुण्डिका ॥
सुरभी नन्दिनी भद्रा वला चातिवलामला ।
उलूपी लम्बिका खेटा लेलिहानान्त्रमालिनी ॥
वैनायिकी च वेताली त्रिजटा भृकुटी मती ।
कुमारी युवती प्रौढा विदग्धा घस्मरा तथा ॥
जरती रोचना भीमा दोलमाला पिचिण्डिला ।
अलम्बाक्षी कुम्भकर्णी कालकर्णी महासुरी ॥
घंटारवाथ गोकर्णा काकजंघा च मूषिका ।
महाहनुर्म्महाग्रीवा लोहिता लोहिताशनी ॥
कीर्त्तिः सरस्वती लक्ष्मीः श्रद्धा बुद्धिः क्रिया स्थितिः ।
चेतना विष्णुमाया च गुणातीता निरञ्जना ॥
निद्रा तन्द्रा स्मिता छाया जृम्भा क्षुदशनायिता ।
तृष्णा क्षुधा पिपासा च लालसा क्षान्तिरेव च ॥
विद्या प्रजा स्मृतिः कान्तिरिच्छा मेधा प्रभा चितिः ।
धरित्री धरणी धन्या धोरणी धर्म्मसन्ततिः ॥
हालाप्रिया हाररतिर्हारिणी हरिणेक्षणा ।
चण्डयोगेश्वरी सिद्धि करा[७२ ख]ली परिडामरी ॥
जगदान्या जनानन्दा नित्यानन्दमयी स्थिरा ।
हिरण्यगर्भा कुण्डलिनी ज्ञानं धैर्य्यञ्च खेचरी ॥
नगात्मजा नागहारा जटाभारायतर्द्दिनी ।
खड्गिनी शूलिनी चक्रवती वाणवती क्षितिः ॥

घृणिधर्त्री नालिका च कर्त्री मत्यक्षमालिनी ।
पाशिनी पशुहस्ता च नागहस्ता धर्नुर्द्धरा ।।
महामुद्गरहस्ता च शिवापोतधरापि च ।
नारखर्प्परिणी लम्बत्कचमुण्डप्रधारिणी ।।
पद्मावत्यन्नपूर्णाच महालक्ष्मीः सरस्वती ।
दुर्ग्गा च विजया घोरा तथा महिषमर्द्दिनी ।।
धनलक्ष्मी······श्चाश्वारूढा जयभैरवी ।
शूलिनी राजमातंगी राजराजेश्वरी तथा ।।
त्रिपुटोच्छिष्टचाण्डाली अघोरा त्वरितापि च ।
राज्यलक्ष्मीर्जयमहाचण्डयोगेश्वरी तथा ।।
गुह्या महाभैरवी च विश्वलक्ष्मीररुन्धती ।
यन्त्रप्रमथिनी चण्डयोगेश्वर्य्यप्यलम्बुषा ।।
किराती महाचण्डभैरवी कल्पवल्लरी ।
त्रैलोक्यविजया सम्पत्प्रदा मन्थानभैरवी ।।
महामन्त्रेश्वरी वज्रप्रस्तारिण्यङ्गचर्पटा ।
जयलक्ष्मीश्चण्डरूपा जलेश्वरी कामदायिनी ।।
स्वर्णकूटेश्वरीरुण्डा मर्म्मरीवुद्धिवर्द्धिनी ।
वार्त्ताली चण्डवार्त्ताली जयवार्त्तालिकातथा ।।
उग्रचंडा श्मशानोग्रा चण्डा वै रुद्रचण्डिका ।
अतिचण्डा चण्डवती प्रचण्डा चण्डनायिका ।।
चैतन्यभैरवी कृष्णा मण्डली तुम्बुरेश्वरी ।
वाग्वादिनी मुण्डमध्यमत्यनर्घ्या पिशाचिनी ।।
मञ्जीरा रोहिणीकुल्या तुङ्गा पूर्णेश्वरी वरा ।
वि[७३ क]शाला रक्तचामुण्डा अघोरा चण्डवारुणी ।।

धनदा त्रिपुरा वागीश्वरी जयमङ्गला ।
दैगंवरी कुब्जिका च कुड्डुक्का कालभैरवी ॥
कुक्कुटी संकटा वीरा कर्प्पटा भ्रमराम्बिका ।
महार्णवेश्वरी भोगवती सङ्केश्वरी तथा ॥
पुलिन्दी शवरी म्लेच्छी पिंगला शवरेश्वरी ।
मोहिनी सिद्धिलक्ष्मीश्च बाला त्रिपुरसुन्दरी ॥
उग्रतारा चैकजटा महानीलसरस्वती ।
त्रिकण्टकी छिन्नमस्ता महिषघ्नी जयावहा ॥
हरसिद्धानंगमाला फेत्कारी लवणेश्वरी ।
चण्डेश्वरी नाकुलीच हयग्रीवेश्वरी तथा ॥
कालिन्दी वज्रवाराही महानीलपताकिका ।
हंसेश्वरी मोक्षलक्ष्मीर्भूतिनी जातरेतसा ॥
शातकर्णा महानीला वामा गुह्येश्वरी भ्रमिः ।
एकानंशाऽभया तार्क्षी वाभ्रवी डामरीतथा ॥
कोरङ्गी चर्च्चिका विघ्ना संसिका ब्रह्मवादिनी ।
त्रिकालवेदिनी नीललोहिता रक्तदन्तिका ॥
क्षेमंकरी विश्वरूपा कामाख्या कुलकुट्टनी ।
कामांकुशा वेशिनी च मायूरी च कुलेश्वरी ॥
इभ्राक्षी द्योनकी (शांर्गी) भीमा देवी वरप्रदा ।
धूमावती महामारी मङ्गला हाटकेश्वरी ॥
किराती शक्तिसौपर्णी वान्धवी चण्डखेचरी ।
निस्तन्द्रा भवभूतिश्च ज्वालाघंटाग्निमर्द्दिनी ॥
सुरङ्गा कौलिनी रम्या नटी चारायणी धृतिः ।
अनन्ता पुञ्जिका जिह्वा धर्म्माधर्म्मप्रवर्त्तिका ॥

वन्दिनी वन्दनीया च वेलाऽहस्करिणी सुधा ।
अरणी माधवी गोत्रा पताका वाग्मयी श्रुतिः ॥
गूढा त्रिगूढा विस्पष्टा मृगाङ्का च निरिन्द्रिया ।
मेनानन्दकरी बोध्री त्रिनेत्रा वेद[७३ ख]वाहना ॥
कलस्वना तारिणी च सत्यासत्यप्रियाऽजडा ।
एकवक्त्रा महावक्त्रा बहुवक्त्रा–घनानना ॥
इन्दिरा काश्यपी ज्योत्स्ना शवारूढा तनूदरी ।
महाशंखधरा नागोपवीतिन्यक्षताशया ॥
निरिन्धना धराधारा व्याधिघ्नी कल्पकारिणी ।
विश्वेश्वरी विश्वधात्री विश्वेशी विश्ववन्दिता ॥
विश्वा विश्वात्मिका विश्वव्यापिका विश्वतारिणी ।
विश्वसंहारिणी विश्वहस्ता विश्वोपकारिका ॥
विश्वमाता विश्वगता विश्वातीता विरोधिता ।
त्रैलोक्यत्राणकर्त्री च कूटाकारा कटंकटा ॥
क्षामोदरी च क्षेत्रज्ञा क्षयहीना क्षरवर्जिता ।
क्षपा क्षोभकरी क्षेम्याऽक्षोभ्या क्षेमदुघा क्षिया ॥
सुखदा सुमुखी सौम्या स्वङ्गा सुरपरा सुधीः ।
सर्व्वान्तर्यामिनी सर्व्वा सर्व्वाराध्या समाहिता ॥
तपिनी तापिनी तीव्रा तपनीयातु नाभिगा ।
हैमी हैमवती ऋद्धिर्वृद्धिर्ज्ञानप्रदा नरा ॥
महाजटा महापादा महाहस्ता महाहनुः ।
महाबला महारोषा महाधैर्य्या महाघृणा ॥
महाक्षमा पुण्यपापध्वजिनी घुर्घुरारवा ।
डाकिनी शाकिनी रम्या शक्तिः शक्तिस्वरूपिणी ॥

तमिस्रा गन्धराशान्ता दान्ता क्षान्ता जितेन्द्रिया ।
महोदया ज्ञानिनीच्छा विरागा सुखिताकृतिः ॥
वासना वासनाहीना निवृत्तिर्निर्वृतिः कृतिः ।
अचला हेतुरुन्मुक्ता जयिनी संस्मृतिः च्युता ॥
कपर्द्दिनी मुकुटिनी मत्ताप्रकृतिरूर्ज्जिता ।
सदसत्साक्षिणी स्फीता मुदिता करुणामयी ॥
पूर्वोत्तरा पश्चिमा च दक्षिणाविदिगूहता ।
आत्मारामा शिवारामा रमणी शङ्करप्रिया ॥
वरेण्या वरदा वेणी[७४ क]स्तंभिण्याकर्षिणी तथा ।
उच्चाटनी मारणी च द्वेषिणी वशिनी मही ॥
भ्रमणी भारती भामा विशोका शोकहारिणी ।
सिनीवाली कुहू राकानुमतिः पद्मिनीतिहृत् ॥
सावित्री वेदजननी गायत्र्याहुतिसाधिका ।
चण्डाट्टहासा तरुणी भूर्भुवःस्वःकलेवरा ॥
अतनुरतनुप्राणदात्री मातंगगामिनी ।
निगमाद्धिमणिः पृथ्वी जन्ममृत्युजरौषधी ॥
प्रतारिणी कलालापा वेद्याछेद्या वसुन्धरा ।
प्रक्षुन्ना वासिता कामधेनुर्व्वाञ्छितदायिनी ॥
सौदामिनी मेघमाला शर्व्वरी सर्व्वगोचरा ।
डमरुर्डमरुका च निःस्वरा परिनादिनी ॥
आहतात्मा हता चापि नादातीता विलेशया ।
पाराऽपारा च पश्यन्ती मध्यमा वैखरीतथा ॥
प्रथमा च जघन्या च मध्यस्थान्तविकाशिनी ।
पृष्ठस्था च पुरःस्था च पार्श्वस्थोर्ध्वतलस्थिता ॥

नेदिष्ठा च दविष्ठा च वर्हिष्ठा च गुहाशया ।
अप्राप्या वृंहिता पूर्णा पुण्यै(र्वेद्याह्य?)र्नविदनामया ॥
सुदर्शना च त्रिशिखा वृहती सन्ततिर्व्विना ।
फेत्कारिणी दीर्घस्त्रुक्का भावना भववल्लभा ॥
भागीरथी जाह्नवीच कावेरी यमुना स्मया ।
सिप्रा'गोदावरी' वेण्या विपाशा नर्म्मदा धुनी ॥
त्रेता स्वाहा सामिधेनी स्रुक्स्रुवा च ऋवावसुः ।
गर्व्विता मानिनी मेना नन्दिता नन्दनन्दिनी ॥
नारायणी नारकघ्नी रुचिरा रणशालिनी ।
आधारणाधारतमा धर्म्मा ध्वन्या धनप्रदा ॥
अभिज्ञा पण्डिता मूका वालिशा वागवादिनी ।
ब्रह्मवल्ली मुक्तिवल्ली सिद्धिवल्ली विपह्लवी ॥
आह्लादिनी जितामित्रा साक्षिणी पुन[४७ ख]राकृतिः ।
किर्म्मरी सर्वतोभद्रा स्वर्व्वेदी मुक्तिपद्धतिः ॥
सुषमा चन्द्रिका वन्या कौमुदी कुमुदाकरा ।
त्रिसंध्याम्नायसेतुश्च चर्च्चाऽछायारि नैष्ठिकी ॥
कला काष्ठा तिथिस्तारा संक्रातिर्विषुवत्तथा ।
मञ्जुनादा महावल्गु भग्नभेरीस्वनाऽरटा ॥
चित्रा सुप्तिः सुषुप्तिश्च तुरीया तत्त्वधारणा ।
मृत्युञ्जया मृत्युहरी मृत्युमृत्युविधायिनी ॥
हंसी परमहंसी च विन्दुनादान्तवासिनी ।
वैहायसी त्रैदशी च भैमीवासातनी तथा ॥
दीक्षा शिक्षा अनूढ़ा च कङ्काली तैजसी तथा ।
सुरी दैत्या दानवी च नरो नाथा सुरी त्वरी ॥

माध्वी खना खरा रेखा निष्कला निर्म्ममा मृतिः ।
महती विपुला स्वल्पा क्रूरा क्रूराशयापि च ॥
उन्माथिनी धृतिमती वामनी कल्पचारिणी ।
वाडवी वडवा खोढा कोला पितृवलायना ॥
प्रसारिणी विशारा च दर्प्पिता दर्प्पणप्रिया ।
उत्तानाधोमुखी सुप्ता वञ्चन्याकुञ्चनी त्रुटिः ॥
क्रादिनी यातनादात्री दुर्ग्गा दुर्ग्गार्तिनाशिनी ।
धराधरसुता धीरा धराधरकृतालया ॥
सु-(च)रित्री तथात्री च पूतना प्रेतमालिनी ।
रंभोर्वशी मेनकाच कलिहृत्कालकृद्दृशा ॥
हरीष्टदेवी हेरम्बमाता हर्य्यक्षवाहना ।
शिखण्डिनी कोण्डयिनी वेतुण्डी मन्त्रमय्यपि ॥
वज्रेश्वरी लोहदण्डा दुर्विज्ञेया दुरासदा ।
जालिनी जालपा याज्या भगिनी भगवत्यपि ॥
भौजंगी तुर्व्वरा वभ्रु महनीया च मानवी ।
श्रीमती श्रीकरी गाद्धी सदानन्दा गणेश्वरी ॥
असंदिग्धा शाश्वता च सिद्धा सिद्धेश्वरी[७५ क]डिता ।
ज्येष्ठा श्रेष्ठा वरिष्ठा च कौशांबी भक्तवत्सला ॥
इन्द्रनीलनिभा नेत्री नायिका च त्रिलोचना ।
वार्हस्पत्या भार्ग्गवी च आत्रेयांगिरसीतथा ॥
धुर्य्याधिहर्त्री धारित्री विकटा जन्ममोचिनी ।
आपदुत्तारिणी दृप्ता प्रमिता मितिवर्जिता ॥
चित्ररेखा चिदाकारा चञ्चलाक्षी चलत्पदा ।
वलाहकी पिंगसटा मूलभूता वनेचरी ॥

खगी करंधमा ध्माक्ष्यी संहिता केररीन्धना ।
अपुनर्भविनी वान्तरिणी यमगञ्जिनी ।।
वर्णातीताश्रमातीता मृडानी मृडवल्लभा ।
दयाकरी दमपरा दंभहीना दृतिप्रिया ।।
निर्व्वाणदा च निर्व्वन्धा भावाभावविधायिनी ।
नैःश्रेयसी निर्व्विकल्पा निर्व्वीजा सर्व्ववीजिका ।।
अनाद्यन्ता भेदहीना वन्धोन्मूलिन्यवाधिता ।
निराभासा मनोगम्या सायुज्यामृतदायिनी ।।
इतीदंनाम साहस्रं नामकोटिशताधिकं ।
देव्याः कामकलाकाल्या मयाते प्रतिपादितम् ।।
नानेन सदृशंस्तोत्रं त्रिषुलोकेषुविद्यते ।
यद्यप्यमुष्य महिमा वर्णितुं नैव शक्यते ।।
प्ररोचनातया कश्चित्तथापि विनिगद्यते ।
प्रत्यहं य इदं देवि कीर्त्तयेद्वा शृणोति वा ।।
गुणाधिक्यमृते कोऽपि दोषो नैवोपजायते ।
अशुभानिक्षयं यान्ति जायन्ते मङ्गलान्यथ ।।
पारत्रिकामुष्मिकौ द्वौ लोकौ तेन प्रसाधितौ ।
व्राह्मणो जायते वाग्मी वेदवेदाङ्गपारगः ।।
ख्यातः सर्व्वासु विद्यासु धनवान् कविपण्डितः ।
युद्धे जयी क्षत्रियः स्याद्दाता भोक्ता रिपुञ्जयः ।।
आहर्ता [७५ ख] चाश्वमेधस्य भाजनं परमायुषां ।
समृद्धो धन धान्येन वैश्यो भवति तत्क्षणात् ।।
नानाविधपशूनांहि समृद्ध्या स समृद्धते ।
शूद्रः समस्तकल्याणमाप्नोति श्रुतिकीर्त्तनात् ।।

भुंक्ते सुखानि सुचिरं रोगशोकौ परित्यजन् ।
एवं नार्य्यपि सौभाग्यं भर्तृहार्द्दं सुतानपि ॥
प्राप्नोति श्रवणादस्य कीर्तनादपि पार्व्वति ।
स्वस्वाभीष्टमथान्येऽपि लभन्तेऽस्यप्रसादतः ॥
आप्नोति धार्म्मिको धर्म्मानर्थानाप्नोति दुर्गतः ।
मोक्षार्थिनस्तथा मोक्षंकामुकाः कामिनीम्वराम् ॥
युद्धे जयं नृपाः क्षीणाः कुमार्य्यः सत्पतिन्तथा ।
आरोग्यं रोगिणश्चापि तथा वंशार्थिनः सुतान् ॥
जयं विवादे कलिकृत्सिद्धीः सिद्धीछुरुत्तमाः ।
नियुक्ता वन्धुभिःसङ्गं गतायुश्चायुषाञ्चयं ॥
सदा य एतत्पठति निशीथे भक्तिभावितः ।
तस्या साध्यमथाप्राप्यन्त्रैलोक्ये नैव विद्यते ॥
कीर्त्तिं भोगान् स्त्रियः पुत्रान्धनं धान्यं हयान्गजान् ।
ज्ञातिश्रैष्ठ्यंपशून्भूमिं राजवश्यञ्च मान्यताम् ॥
लभते प्रेयसि क्षुद्रजातिरप्यस्य कीर्त्तनात् ।
नास्य भीतिर्न्न दौर्भाग्यं नाल्पायुष्यन्नरोगिता ॥
न प्रेतभूताभिभवो न दोषो ग्रहजस्तथा ।
जायते पतितो नैव क्वचिदप्येष सङ्कटे ॥
यदीछसि परं श्रेयस्तर्त्तुं सङ्कटमेव च ।
पठान्वहमिदं स्तोत्रं सत्यं सत्यं सुरेश्वरि ॥
न सास्ति भूतले सिद्धिः कीर्त्तनाद्या न जायते ।
शृणु चान्यद्वरारोहे कीर्त्त्यमानं वचो मम ॥
महाभूतानि पञ्चापि खान्येकादश यानि च ।
तन्मात्राणि च [७६ क] जीवात्मा परमात्मा तथैव च ॥

सप्तार्णवाः सप्तलोका भुवनानि चतुर्द्दश ।
नक्षत्राणि दिशः सर्व्वाः ग्रहाः पातालसप्तकं ।।
सप्तद्वीपवतीपृथ्वी जंगमाजंगमं जगत् ।
चराचरं त्रिभुवनम्विद्याश्चापि चतुर्द्दश ।।
सांख्ययोगस्तथा ज्ञानञ्चेतना कर्म्मवासना ।
भगवत्यां स्थितं सर्व्वं सूक्ष्मरूपेण वीजवत् ।।
सा चास्मिन् स्तोत्रसाहस्रे स्तोत्रे तिष्ठति वद्धवत् ।
पठनीयं विदित्वैवं स्तोत्रमेतत्सुदुर्ल्लभं ।।
देवीं कामकलाकालीं भजन्तः सिद्धिदायिनीम् ।
स्तोत्रं चादः पठन्तोहि साधयन्तीप्सितान्स्वकान् ।।

इति महाकालसंहितायां कामकलाकालीसहस्रनामस्तोत्रं संपूर्णं ।

श्रीमहाएाल उवाच—

अथ वक्ष्ये महेशानि महापातकनाशनं ।
गद्यं सहस्रनाम्नस्तु संजीवनतया स्थितं ।।
पठन् यत्सफलं कुर्य्यात्प्राक्तनं सकलं प्रिये ।
अपठन् विफलन्तत्तत्तद्वस्तु कथयामि ते ।।
ॐ फ्रें जय जय कामकलाकालि कपालिनि सिद्धि ।
करालि सिद्धि विकरालि महावलिनि त्रिशूलिनि ।।

नरमुण्डमालिनि शववाहिनि कात्यायनि महाट्टहासिनि सृष्टिस्थितिप्रलयकारिणि दितिदनुजमारिणि श्मशानचारिणि महाघोररावे अध्यासितदावे अपरिमितवलप्रभावे भैरवीयोगिनी-डाकिनीसहवासिनि जगद्भासिनि स्वपदप्रकाशिनि। पापौघहारिणि

आपदुत्तारिणि अपमृत्युवारिणि वृहन्मद्यमानोदरि सकलसिद्धिकरि चतुर्द्दशभुवनेश्वरि गुणातीतपरमसदाशिवमोहिनि अपवर्ग्ग रसदोहिनि रक्तार्णवलोहिनि अष्टनाग[७६ ख]राजभूपितभुजदण्डे आकृष्टकोदण्डे परमप्रचण्डे मनोवागगोचरे म(ष?)खकोटिमंत्रमय-कलेवरे महाभीषणतरे प्रचलजटाभारभास्वरे।

सजलजलदमेदुरे जन्ममृत्युपाशभिदुरे सकलदैवतमयसिंहास-नाधिरूढे ।। गुह्यातिगुह्यपराऽपरशक्तितत्त्वरूढे । वासवीकृतमूढे ।। प्रकृत्यपरशिवनिर्व्वाणसाक्षिणी । त्रिलोकीरक्षिणि दैत्यदानव-भक्षिणि ।। विकटदीर्घदंष्ट्राकोटिसञ्चूर्णितकोटिब्रह्मकाले । चन्द्रखण्डाङ्कितभाले ।। देहप्रभाजितमेधजाले । नवयश्चचक्र-नयिनि महाभीमषोडशशयिनि ।। सकलकुलाकुलचक्रप्रवर्त्तिनि-निखिलरिपुदलकर्त्तिनि ।। महामारीभयनिवर्त्तिनि लेलिहानरसना-करालिनि त्रिलोकीपालिनि ।। त्रयस्त्रिंशत्कोटिशस्त्रा(श?)स्त्रशा-लिनि । प्रज्वलप्रज्वलनलोचने ।। भवभयमोचने ।। निखिलागमा-देशितपुरोचने । प्रपञ्चातीतनिष्कलतुरीयाकारे ।। अखण्डानन्दा-धारे निगमागमसारे महाखेचरी सिद्धिविधायिनि ।। निजपदप्रदा-यिनि महामायिनि घोराट्टहाससंत्रासितत्रिभुवने ।। चरणकमल-द्वयविन्यासखर्व्वीकृतावने ।। विहित भक्तावने ।।

ॐ क्लीं क्रों स्फ्रों ह्रूं ह्रीं छ्रीं स्त्रीं फ्रें भगवति प्रसीद-प्रसीद जय जय जीव जीव ज्वल ज्वल प्रज्वल प्रज्वल हस हस नृत्य नृत्य क छ भगमालिनि भगप्रिये भगातुरे भगांकिते भग-रूपिणि भगप्रदे ।। भगलिंगद्राविणि ।। संहारभैरवसुरतरसलोलुपे

व्योमकेशि पिंगकेशि महाशंखसमाकुले खर्प्परविहस्तहस्ते रक्तार्णवद्वीपप्रि[७७ क]ये मदनोन्मादिनि ।। शुष्कनरकपालमालाभरणे विद्युत्कोटिसमप्रभे नरमांसखण्डकवलिनि ।। वमदग्निमुखि फेरुकोटिपरिवृते ।। करतालिकात्रासितत्रिविष्टपे । नृत्यप्रसारितपादाघातपरिवर्त्तितभूवलये । पदभारावनम्रीकृतकमठशेषाभोगे । कुरुकुल्ले ।। कुञ्चतुण्डि रक्तमुखि यमघण्टे चर्च्चिके ।। दैत्यासुरदैत्य राक्षसदानवकुष्माण्डप्रेतभूत डाकिनीविनायकस्कन्दघोणकक्षेत्र - पालपिशाचब्रह्मराक्षसवेतालगुह्यकसर्प्पनागग्रहनक्षत्रोत्पातचौराग्निस्वापदयुद्धवज्रोपलाशनि वर्षविद्युन्मेघविषोपविषकपटकृत्याभिचारद्वेषवशीकरणोच्चाटनोन्मादापस्मार भूतप्रेतपिशाचावेश नदनदी समुद्रावर्त्तकान्तारघोरांधकारमहामारीवालग्रहहिंस्रसर्वस्वापहारिमायाविद्युद्दस्युवंचकदिवाचररात्रिंचरसंध्याचरशृंगिनखिदंष्ट्रिविद्युदुल्कारण्यदरप्रान्तरादिनानाविधमहोपद्रवभंजिनि ।। सर्व्वमन्त्रतन्त्रयन्त्रकुप्रयोगप्रमर्द्दिनि ।। षडाम्नायसमयविद्याप्रकाशिनि श्मशानाध्यासिनि ।। निजवलप्रभावपराक्रमगुणवशीकृतकोटिब्रह्माण्डवर्त्तिभूतसङ्घे ।। विराड्पिण्डिसर्व्वदेवमहेश्वरि सर्व्वजनमनोरंजनि सर्व्वपापप्रणाशिनि ।। अध्यात्मिकाधिदैविकभौतिकादिविविधहृदयाधिनिर्द्दलिनि कैवल्यनिर्व्वाणवलिनि ।। दक्षिणकालि भद्रकालि चण्डकालि कामकलाकालिकौलाचारव्रतिनि ।। कौलाचारकूजिनि कुलधर्म्मसाधनि जगत्कारणका[७७ ख]रिणि ।। महारौद्रि रौद्रावतारे ।। अवीजे नानावीजे जगद्वीजे कालेश्वरि कालातीते त्रिकालस्थायिनि महाभैरवे भैरवगृहिणि जननि जनजननिवर्तिनि प्रलयानल ज्वालाजालजिह्वे विखर्व्वोरुफेरुपोतलालिनि ।। मृत्युञ्जयहृदयानन्दकरि

विलोलव्यालकुण्डलउलूकपक्षछत्रमहाडामरि विद्युत्वक्त्रबाहुचरणे सर्व्वभूतदमनि नीलांजनसमप्रभे ।। योगीन्द्रहृदयाम्बुजासनस्थितनीलकण्ठदेहार्द्धहारिणि ।। षोडशकलान्तवासिनि हकारार्द्धचारिणि कालसङ्कर्षिणि कपालहस्ते मदघूर्णितलोचने निर्व्वाणदीक्षाप्रसादप्रदे ।। निन्दानन्दाधिकारिणि मातृगणमध्यचारिणि ।। त्रयस्त्रिशत्कोटित्रिदशतेजोमयविग्रहे प्रलयाग्निरोचिनि विश्वकर्त्तृ विश्वाराध्ये विश्वजननि विश्वसंहारिणि विश्वव्यापिके विश्वेश्वरि निरुपमे निर्व्विकारे निरंजने निरीहे निस्तरङ्गे निराकारे परमेश्वरि परमानन्दे परापरे प्रकृतिपुरुषात्मिके प्रत्ययगोचरे प्रमाणभूते प्रणवस्वरूपे संसारसारे सच्चिदानन्दे सनातनि सकले सकलकलातीते सामरस्य समयिनि केवले कैवल्यरूपे कल्पनातिगे काललोपिनि कामरहिते कामकलाकालि भगवति ॐ ख्फ्रें ह्सौः सौः श्रीं ऐं ह्लौं क्रों स्फ्रों सर्व्वसिद्धिं देहि देहि मनोरथान्पूरय पूरय मुक्तिं नियोजय नियोजय भवपाशं समुन्मूलय २ जन्ममृत्युं तारय २ परविद्यां प्रकाशय २ अपवर्गं निर्माहि २ संसारदुःखं यातनां विछेदय २ पापानि संशम[७८ क]य २ चतुर्व्वर्गं साधय २ ।। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं यान् वयं द्विष्मो ये चास्मान् विद्विषन्ति तान् सर्व्वान् विनाशय २ मारय २ शोषय २ क्षोभय २ मयि कृपां निवेशय २ फ्रें ख्फ्रें ह्न्फ्रें ह्न्ख्फ्रें—हुं स्फ्रों क्लीं ह्लीं जय जय चराचरात्मकब्रह्माण्डोदरवर्त्तिभूतसंघाराधिते प्रसीद प्रसीद तुभ्यं देवि नमस्ते नमस्ते नमस्ते । इतीदं गद्यमुदितं मंत्ररूपम्वरानने । सहस्रनामस्तोत्रस्य आदावन्ते च योजयेत् ।

अशक्नुवानो द्वौ वारौ पठेच्छेष इमं स्तवं ।
सहस्रनामस्तोत्रस्य तदैव प्राप्यते फलम् ।।

अपठन् गद्यमेतत्तु तत्फलन्न समाप्नुयात् ।
यत्फलं स्तोत्रराजस्य पाठेनाप्नोति साधकः ॥
तत्फलं गद्यपाठेन लभते नात्र संशयः ॥

इति महाकालसंहितायां गद्यकथनन्नाम द्विशताधिकद्विपञ्चाशत्तमः पटलः ॥ २५२ पटलः समाप्तः

देव्युवाच—

भगवन् देव देवेश भक्तानां वांछितप्रद ।
त्वत्प्रसादात् श्रुतं सर्व्वं कामकाल्या विधानकं ॥
सहस्रनामस्तोत्रञ्च तस्य गद्यमनुत्तमं ।
त्रैलोक्यविजयञ्चापि कवचं परमाद्भुतम् ॥
स्तोत्राणां स्तोत्रराजञ्च भुजङ्गप्रयातमद्भुतं ।
एकाक्षरं समारभ्य यावन्तो मनवः पुनः ॥
कामकलामहादेव्यास्तान्मनून् श्रोतुमुत्सहे ।
कथ्यतां मयि ते नाथ यदि तेऽस्ति स्नेहो मम ॥

श्रीमहाकाल उवाच—

साधु धन्ये महाभागे श्रूयतां वाञ्छितन्तव ।
तारमैधत्रपालक्ष्मीकालीकामरुपःक्रमात् ॥
योगिनीं प्रमदाञ्चैव शाकिनीमंकुशन्तथा ।
प्रासादक्षेत्रपालौ च [७८ ख] पाशभूतौ समुद्धरेत् ॥
ततोऽग्निस्त्री सप्तदशी मरीचिसमुपासिता ।
कर्द्दमोऽस्य ऋषिः प्रोक्तो वृहतीछन्द उच्यते ॥
देवी कामकलाकाली ह्लीं शक्तिर्ह्रूं च कीलकं । ॥१॥
ह्लींशाकिन्यंकुशसुधायोगिनीप्रमदाक्रुधः ॥

भूतडाकिनी कल्पान्त फेत्कारी नरसिंहका ।
प्रेतास्त्रशिरसः प्रोक्ताः कपिलोपास्यषोडशी ॥
सनकोऽस्य ऋषिर्ज्ञेयः प्रतिष्ठाछन्द ईरितं ।
देवता कामकाली च ह्यमृते शक्तिकीलके ॥ ॥२॥
डाकिनी सानुतुङ्गा हि सचूडामणिमेखलाः ।
वलिजंभौ सभोगास्त्रौ हिरण्याक्षनवाक्षरी ॥
ऋषीरुचिश्छन्द उष्णिग् देवता कामकालिका ।
डाकिनीमेखले शक्तिकीलके परिकीर्त्तिते ॥ ॥३॥
त्रपाद्या डाकिनी कूर्च्चभूतमन्मथयोगिनी ।
वधूश्च शाकिनी स्वाहा लवणस्य दशाक्षरी ॥
छन्दः पंक्तिरथर्व्वऋषिर्देवी कामकलापि च ।
शाकिन्यनंगौ विज्ञेयौ मनोर्व्वै शक्तिकीलके ॥ ॥४॥
कूर्च्चास्त्रशाकिनी प्रोच्य ततः कामकला इति ।
कालिकायै ततः प्रोच्य हार्द्दमन्त्रोऽग्निवल्लभा ॥
वैवस्वतस्य हि मनोर्म्मनुः पञ्चदशाक्षरी ।
ऋषिरत्रिः समुद्दिष्टो छन्दोमध्या प्रकीर्त्तिता ॥
देवीयं शाकिनी कूर्च्चौ कीर्त्तिते शक्तिकीलके । ॥५॥
वेदादिमैधयोगिन्यः शाकिनीकामयोषितः ॥
भूतक्रोधत्रपाज्ञेया दत्तात्रेयेण राधिता ।
ऋषिर्वसन्तवटुकोऽनुष्टुप्छन्द उदीरितं ॥
एषैष देवता ज्ञेया ह्रीमैधे शक्तिकीलके । ॥६॥
श्रृणिर्भूतशाकिनी च डाकिनी भूतपञ्चमा ॥
दुर्व्वासः साधिता ज्ञेया महापञ्चाक्षरी प्रिये ।
[७६ क] गोतमोस्य ऋषिर्ज्ञेयश्छन्दस्त्रिष्टुबुदीरितं ॥

देवतैषा भूतश्रृणी शक्तिकीलकनामकौ । ॥७॥
मैधप्रणवशाकिन्यो डाकिनी प्रलयान्विता ॥
फेत्कारीह्लीरमानंगयोगिनीस्त्रीरुषश्च हृत् ।
चतुर्द्दशाक्षरो मंत्र उतङ्कसमुपासितः ॥
अस्य ऋषिर्द्दक्षिणामूर्त्तिः सुतलं छन्द उच्यते ।
देवी देवी कामकला रुग्रमे शक्तिकीलके ॥ ॥८॥
रुग्व्रीडाशाकिनी हार्द्दी विकराला पदं सङे ।
कामडाकिनी भूतान्ते हृच्छीर्षौ कौशिकेश्वरी ॥
ऋपिर्न्नारद एतस्य शर्क्व(क्व?)रीछन्द ईरितं ।
देव्येपैव स्मरो भूतः शक्तिकीलकमिष्यते ॥ ॥६॥
व्रीडायोगिनिकूर्च्चस्त्रीशाकिनीपंच चोद्धरेत् ।
भगवत्यै इति प्रोच्य ततः कामकला इति ॥
कालिकायै तारमेधाङ्कुशकालीरमास्मराः ।
भूतास्त्रयो वह्निस्त्रीत्यूनत्रिंशौर्व्वराधिता ॥
ऋषिर्व्वत्सस्त्रिवृच्छन्दोदेवीयं शक्तिरंकुशः ।
शाकिनी कीलकं ज्ञेयं योगिनीतत्वमित्यपि ॥ ॥१०॥
योगिनीभूतरुट्कामा अस्त्रपाराशरी मता ।
अङ्गिराश्चापि गायत्रीऋषिश्छन्दश्च कीर्त्यते ॥
सूरियं डाकिनीभूतौ विज्ञेयौ शक्तिकीलकौ । ॥११॥
आदौ परापरं कूटं वृहत्कूटं द्वितीयकं ॥
कूटं राथन्तरं पश्चात् ज्ञेया भागीरथी प्रिये ।
छन्दस्त्रिष्टुवृषिर्व्यासो देव्येषा शक्तिकीलकौ ॥
फेत्कारीप्रलयौ ज्ञेयौ डाकिनीतत्वमित्यपि । ॥१२॥
ह्लीभूतक्रोधडाकिन्यः कामफेत्कारिसंयुताः ॥

षडक्षरा वल्युपास्या देवी कामकला प्रिये ।
ऋषिः कात्यायनो ह्यस्य छन्दः ख्यातं [७६ ख] वृहत्यपि ॥
अधिष्ठात्रीत्वियं देवी स्त्रीकामौ शक्तिकीलकौ । ॥१३॥
कामलक्ष्मीत्रपाकूर्च्चयोगिनीभीरुशाकिनी ॥
डाकिनीमहदामर्षामृतप्रासाददक्षिणा ।
श्रृणिकालीतारमैधां संवर्त्तोपास्यषोडशी ॥
छन्दः पंक्तिर्ऋषिश्चात्रिर्देवीकामकलापि च ।
शक्तिर्हारावलिः कीलः कर्णिकातत्त्वमीरितं ॥ ॥१४॥
वेदादिसारस्वतकामभूता लज्जा ततो डाकिनि योगिनी च।
कल्पान्तरा मे तदनुप्रकीर्त्त्ये फेत्कारिकूर्च्चौ तदनुप्रदेयौ ॥
वेतालमस्त्रमथ वह्निनितम्बिनी च प्रोक्तं प्रिये नारदपञ्च-दश्यां ।
विरूपाक्ष ऋषिः प्रोक्तो जगतीछन्द इत्यपि ॥
अधिष्ठात्री कामकाली वीजशक्ती त्रपारुषौ ।
शक्तितत्वे रमानङ्गौ प्रयोगः सर्व्वसिद्धये ॥ ॥१५॥
आदौ च शांभवं कूटं लज्जावीजं द्वितीयकं ।
ततः पाशुपतं कूटं योगिनी तदनन्तरं ॥
ततो माहेश्वरं कूटं कूर्च्चशांकरकूटकौ ।
वधू श्रीकंठकूटौ च शाकिनी स्यात्ततः परं ॥
पुण्डरीकाश्वमेधौ च ततोऽस्त्रं हृच्छिरोऽपि च ।
गरुडोपासिता ज्ञेया महासप्तदशी त्वियं ॥
प्रचेता ऋषिरस्य स्यात्सुतलं छन्द ईरितं ।
देवीकामकला काली फेत्कारी वीजमुच्यते ॥

शक्तिकीलकतत्त्वानि त्रपाकूर्च्चस्मराः क्रमात् । ॥१६॥
लक्ष्मीर्लज्जाकामवीजं योगिनो भीरुकालिका ॥
फडन्ता पर्शुरामेण साधिता परमेश्वरि ।
तस्यर्षिः कश्यपो ज्ञेयः प्रतिष्ठाछन्द उच्यते ॥
प्रोक्ता देवी कामकाली शाकिनीवीजमुच्यते ।
रमाकाल्यौ शक्तिकीलौ ज्ञेयौ सप्ताक्षरी मनौ ॥ ॥१७॥
तारपाशाङ्कुशान्दत्वा प्रासादं महतीन्ध्रुवम् ।
अमृ[८० क]तं शाकिनीं रामायोगिनीवह्निवल्लभा ।:
उद्धरेद्भार्ग्गवो कामकालीमेकादशाक्षरी ।
ब्रह्मर्षिः शर्व्वरीछन्दो देव्येषा वीजमंकुशम् ॥
शक्तिकीलौ सुधापाशौ षडंगोमनुरीरितः । ॥१८॥
मेधांकुशौ तथा भूतं शाकिनी डाकिनी तथा ॥
प्रलयश्चाऽपि फेत्कारी फट्त्रयं हृदयं शिरः ।
द्वाभ्यां सहस्रवाहुभ्यां साधितेयं चतुर्द्दशी ॥
प्रोक्तः संमोहनोऽस्यर्षिग्गायित्रं छन्द उच्यते ।
मनोर्द्देवी कामकलाचक्रास्त्रं वीजमुच्यते ॥
विज्ञेयौ दक्षिणाजम्भौ शक्तिकीलौ मनोः प्रिये । ॥१९॥
कामभूतौ भूतकामौ फडन्तौ पृथुराधिता ॥
पञ्चाक्षरी परिज्ञेया कामकाल्या वरानने ।
ऋषिर्म्मनोर्व्वीतहव्यो जागतं छन्द इत्यपि ॥
देवताकामकाली च नाराचो वीजमुच्यते ।
कुन्तसृष्टी शक्तिकीलौ मन्त्रस्य परिकीर्त्तितौ ॥ ॥२०॥
तारयोर्म्मध्यगौ पाशमेधावादौ प्रयोजयेत् ।
कलातारत्रपाकूर्च्चलक्ष्मीकामांस्ततः परम् ॥

काल्याः कराल्याः संबुद्धिं विकराल्यास्ततः परं ।
द्वाविंशत्यक्षरीम्विद्यां त्रिफडन्ता समुद्धरेत् ॥
एषैव हि परिज्ञेया हनूमत्समुपासिता ।
ऋषिः सनारुरस्यो(तनश्चो?)क्तश्च्छन्दो ज्ञेयञ्च वार्हतं ॥
देवता कामकाली च काकिनीवीजमिष्यते ।
नागः शक्तिः क्षमा कीलं नासत्यौ तत्वमिष्यते ॥ ॥२१॥

श्रीमहाकाल उवाच ॥

शताक्षरसमुद्धारमथाकर्णय भाविनि ।
येन विज्ञातमात्रेण सर्व्वसिद्धिः करे स्थिता ॥
आदौ त्रपाकामकूर्च्चान्हृन्मन्त्रान्तान्समुद्धरेत् ।
ततः कामकलेत्युक्त्वा कालिकायै समुद्धरेत् ॥
मैधांकुशरमाका[८० ख]ली योगिनीभीरुशाकिनीः ।
डाकिन्यन्ताः समुद्धृत्य सकचेति पदन्ततः ॥
नरमुण्ड इति प्रोच्य कुण्डलायै इतीरयेत् ।
भोगं सृष्टिं च फेत्कारीं त्रेतां कृत्यां तथोद्धरेत् ॥
महेति विकरालेति वदनायै इतीरयेत् ।
महाप्रलय इत्युक्त्वा समयेत्युद्धरेत्प्रिये ॥
व्रह्माण्डनिष्पेषणतः करायै इत्यपीरयेत् ।
सान्विष्टिदक्षिणाध्यानचञ्चून् कूर्च्चास्त्रयोस्त्रयं ॥
भयङ्करेति संलिख्य रूपायै तदनन्तरं ।
हारं वैधं कर्णिकां च नालीकं हाकिनीमपि ॥
कौरजानुत्तमाङ्गास्थिभेदिनोस्त्रितयं पुनः ।
संविद्वयं हृच्छिरसी निर्ज्ञेयं शताक्षरी ॥

अस्या ऋषिः समुद्दिष्टो लोमपादो वरानने ।
छन्दो विराट् क्रमोवीजं देवता कामकालिका ॥
शक्तिः सौत्रामणीकूटं नागास्त्रं कीलकंभवेत् ।

देव्युवाच ॥

मन्त्रोद्धाराः सकलाः कामकलाया निशामितास्त्वत्तः ।
अधुना वद शशिशेखर दयितसहस्रासा(सा)क्षरोद्धारं ॥

श्रीमहाकाल उवाच ॥

प्रणव नमो भगवत्यै कामकलाकालिकायै च ।
तारत्रपारमास्मररुडचोगिनि योषितां पंच ॥
प्रत्येकं संलेख्यं ततश्च संहारभैरवेत्यपि च ।
सुरतरसलोलुपायै चतुर्द्दशान्तां च पंचकं पश्चात् ॥
आदौ शार्णं वीजं प्रासादं शाकिनीन्तदनु ।
डाकिनिमहारुषावपि भूतप्रेतामृतान्यपि च ॥
क्षेत्रप्रचण्डौ कालीं गारुडकालौ रतिञ्चापि ।
प्रकटविकटानुदशनविकरालवदना ङेन्तैव ॥
घनविद्युद्घनदानां मानसभारुण्डयोश्चापि ।
द्रावणतत्त्वयवीनां प्रत्येकं पञ्च[८१ क]चोद्धृत्य ॥
सृष्टिस्थितिसंहारकारिण्यै इत्यपि ब्रूयात् ।
तदनु मदनातुरायै चामुण्डां चापि कापालं ॥
उग्रं ब्रह्म च शक्ति चानन्दं रौद्रकं पंच ।
प्रत्येकं संलेख्यं भयंकरेति प्रयोज्यमस्यानु ॥
दंष्ट्रायुगलान्मुखरं रसनायै तदनु च ब्रूयात् ।
कूर्म्मानन्तहयग्रीवदानवक्ष्वेडसुरतपिनीः ॥

तस्य त्रिशक्तिगणपतिकुमारकान् पञ्चशो विलिखेत् ।
सकचनरमुण्डशब्दा ङेन्ताकृतकुला चापि ॥
त्रिकूटा सिंहसमाधीःयक्षविरिञ्ची सुदर्शनं चापि ।
गांधर्व्वञ्च निरंजनमेषां वै वारपंञ्चकं लेख्यं ॥
तदनु महाकल्पान्तकान्ब्रह्माण्डचर्व्वणेत्यपि च ।
विलिखेत्ततः करायै समाधिनादौ च दक्षिणं चक्षुः ॥
स्थाणुं तत्वं तारकगणपाप्सरसां च पञ्चशो विलिखेत् ।
युगभेदभिन्नगुह्याकाल्येकान्मूर्त्तितोऽपि च धरायै ॥
शाकिनिडाकिनिप्रलेयाः फेत्कारीकर्णिकाहाराः ।
सानुःसमेखलोऽपि च जम्भोभासाख्यकूटश्च ॥
एते च पञ्चकृत्वः क्रमशो लेख्यास्ततो दयिते ।
शतवदनान्तरितैकाद् वदनायै फट्त्रयं प्रणवः ॥
तुरुतास्मुरु च तारं हिलितारं किलि ततो विलिखेत् ।
ह्लः सर्व्वदीर्घयुक्तस्ततोमहाघोररावे च कालि च ॥
कापालि ततो महा च कापालि विकटदंष्ट्रे च ।
शोपिणि संमोहिनितः करालवदने ततो वाच्यं ॥
मदनोन्मादिनिशव्दाज्ज्वालामालिन्यपि ब्रूयात् ।
तदनु शिवारूपि वै भगमालिनितो भगप्रिये चापि ॥
उद्धृत्य भैरवीति चामुण्डाशव्दतो विलिखेत् ।
योगिन्यादिशतादनुको[८१ ख]टिगणात् परिवृते चापि ॥
प्रत्यक्षं च परोक्षं मां द्विपतो भवति तस्यान्ते ।
युगलं सप्ता(प्त?)विंशस्यास्य वदेत्तदनु देवेशि ॥
जहि नाशयानुत्रासय मारय उच्चाटयेत्यपि च ।
स्तम्भय विध्वंसय हन त्रुटतो विद्रावय छिन्धि ॥

पच शोषय मोहय चोन्मूलय भस्मीकुरु दहेति ।
क्षोभय हरतः प्रहरात्पातयतो मर्दय दमेति ॥
मथतः स्फोटय जंभय तस्यान्ते भ्रामयेत्यपि च ।
उद्धृत्य सर्व्वभूताद् भयंकरि स्याच्च सर्व्वजनशब्दः ॥
तदनु वशंकरि सर्व्ववदेछत्रुक्षयंकरीत्यपि च ।
प्रणवो व्रीडातारः कामो वदादिकूर्च्चौ च ॥
गायत्रीमुखभूतावागमशीर्षाङ्कुशौ तदनु ज्वलयुग्मं ।
प्रज्वलयुक्क ह हसयुग्मं ततो विलिखेत् ॥
राज्यधनायुः प्रोक्त्वा तदनु सुखैश्वर्य्यमित्यपि च ।
देहिद्वितयं दापययुगलं पश्चात् कृपाकटाक्षं च ॥
मयि च वितरस्वयुगलं योगिन्यवला च शाकिन्यः ।
द्रावणमानसवक्त्रं कापालं चापि भारुण्डा ॥
काली स्मराध्वमनसः कूर्च्चं मुण्डे सुमुण्डे च ।
चामुण्डे इत्युक्त्वा प्रवदेद्वै मुण्डमालिनि पदञ्च ॥
मुण्डावतंसिकेपि च ततश्च मुण्डासने मृतं वीजम् ।
शक्तिन्निर्म्मलवीजं तदनु शवारूढ इत्यपि च॥
षोडशभुजे सोद्यते पाशपदात्परशुनागेति ।
चापानुमुद्गरशिवा पोतानु च खर्प्परानु च नरेति ॥
मुण्डाक्षादर्पमात्रा कर्त्रीतोनाननाङ्कुशशवेति ।
चक्रत्रिशूलकरवालधारिणि प्रोच्चरेत्पश्चात् ॥
स्फुरयुगलन्तदनुवदेत्प्रस्फुरयुग्मं मम हृदि प्रोच्य।
तिष्ठद्वितयं[८२ क]निगदेत् स्थिराभवन्त्वन्तममरेशि ॥
सारस्वतागमशिरः कुलिकस्मरभूतवीजानि ।
त्रितयं कौरजपदवीमनोरुषां जययुग्मं पश्चात् ॥

विजयद्वितयादस्त्रत्रितयं हृदयं च शीर्षञ्च ।
इत्येषा कथिता तव देवि सहस्राक्षरी शुभदा ।।
कालाग्निरुद्रऋषिरिहमहापरो जागतं छन्दः ।
देवी कामकलापि च कूर्च्चो वीजं स्मरः कीलः ।।
शक्तिर्भूतः शृणिरपि तत्वं सप्ताङ्गको मंत्रः ।

इति श्रीमदादिनाथविरचितायां महाकालसंहितायां कामकलाकाल्या-एकाक्षरमारभ्यसहस्राक्षरीपर्य्यन्तमन्त्रोद्धारकथननामद्विशताधिकत्रिपंचाशत्-पटलः। २५३ पटलः समाप्तः।

श्रीमहाकाल उवाच ।।

मनोमंत्रं कामकलाकाल्यास्त्वमयुताक्षरं ।
पृष्टवत्यसि मां देवि तं चाहं नारदं त्वयि ।।
किञ्चित्कारणमस्त्यत्र तन्निशामय सादरं ।
नातः परतरः कोऽपि मन्त्र उग्रोऽस्ति भूतले ।।
न चास्य वेत्ता नो जापी न स्मर्त्ता न च साधकः ।
नोद्धर्त्ता नोपदेष्टा च न प्रष्टा न जिघृक्षुकः ।।
षट्स्वाम्नायेषु ये मंत्राः प्रोक्ताः सन्ति वरानने ।
वर्त्तन्ते तेऽखिलाः सर्व्वनद्यम्बून्यर्णवे यथा ।।
उत्पत्तिमयुताक्षर्य्यास्त्वमादौ शृणु सोत्सुका ।
ततः श्रोष्यसि तं मंत्रमुग्रादुग्रतरं प्रिये ।।
अहं नारायणश्चापि कल्पे ऋष्यन्तरा—ये ।
सर्गादौ त्रिपुरघ्नेनास्मद्भक्त्या तोपमीयुषा ।।
त्रैलोक्याकर्षणेनोपदिष्टौ स्यावो वरानने ।
शिक्षयित्वा विधानानि ध्यानपूजादिकानि हि ।।
दत्ताभ्यनुज्ञौ गुरुणा मिथः संमन्त्र्य सत्वरम् ।
संसिषाध[८२ ख]यिषू आवां मंत्रराजं महत्तरं ।।

अगच्छावरहो ज्ञात्वा पुष्करद्वीपमुत्तमं ।
प्रत्यक्षां च प्रसन्नां च चिकीर्षूतामहर्निशं ।।
तपावहे तपोघोरं दिव्यानां शरदां शतं ।
ततः प्रसन्ना भगवत्यागत्य पुरतः स्थिता ।।
तां महोग्रतराकारां द्रष्टुमेव न शक्नुवः ।
मीलिताक्षौ नम्रशीर्षावतिष्ठाव क्षणं प्रिये ।।
भीता वा वां परिज्ञायाऽम्बा सौम्यं वपुराददे ।
तत उन्मील्य नेत्राणि पादयोरपतावहि ।।
कराभ्यां सा समुत्थाप्य प्रार्थयेतां युवां वरम् ।
इत्युवाच जगद्धात्री भक्तिप्रवणकंधरौ ।।
आवामवोचाव ततः कृतांजलिपुटौ शिवाम् ।
देवि त्वयैव जगतां स्थितिसंहारकारकौ ।।
कृतावावां त्वत्प्रसादात्प्राप्तयुद्धपराजयौ ।
प्राप्तदेवाधिपत्यौ च स्वेच्छाकर्म्मविहारिणौ ।।
ब्रह्माणं च तृणं मन्यावन्येषाञ्च वरप्रदौ ।
किञ्चिदप्यवशिष्टं नावयोस्त्वत्करुणावशात् ।।
आवयोर्द्देवता त्वं हि देवेष्वावां च देवताः ।
देवा देवा द्विजातीनां द्विजाः शेषस्य देवताः ।।
वरं दित्सस्यावयोश्च तदेकं देहि नौ वरं ।
मूर्त्तीनां कतिभेदास्ते सौम्योग्राणां महेश्वरि ।।
तान् परिज्ञातुमिच्छावः समन्त्रान् जगदम्बिके ।
एकस्यां तव मूर्त्तौ चोपासितायां धरेश्वरि ।।
उपासितास्ता भवन्ति चण्डिके तद्वदावयोः ।
श्रुत्वा तदावयोर्व्वाक्यं स्मितं कृत्वावदच्छिवा ।।

श्रीमहाकाल्युवाच ॥

अन्तो न मम मूर्त्तीनां सौम्योग्राणां सुरेश्वरौ ।
न च तन्मंत्रभेदानां संख्यास्ति जगतीतले ॥
आगमादिपुराणेषु याः काश्चिच्छिवशक्तयः ।
[८३ क] श्रूयन्ते वाथ दृश्यन्ते मूर्त्तयो हि ममैव ताः ॥
सुरैभ(र्भ?)वदिदृक्षार्थं तत्रकाञ्चनमूर्त्तयः ।
मयैव निर्म्मिता देवौ सौम्याग्राश्चित्स्वरूपया ॥
रक्षोदानवदैत्यानां मारणाय भयानकाः ।
सौम्याः परशिवस्यापि मोहार्थमुपपादिताः ॥
एता मूर्त्यनुकारिण्यः कृताश्चान्या सुमूर्त्तयः ।
सौम्यानां कोटिमूर्त्तीनां सौन्दर्य्यमयताजुषां ॥
यामूर्त्तिर्म्मम विख्याता नाम्ना त्रिपुरसुन्दरी ।
सर्व्वासामेव मध्ये सा विज्ञेया परमावधिः ॥
उग्रावन्ध्यो मूर्त्तयो मे सन्ति कोटचष्टसम्मिताः ।
घोरघोरतराकाराः शक्यन्ते या न वीक्षितुं ॥
चामुण्डा भैरवी भीमा गुह्यकाली च दक्षिणा ।
छिन्नमस्ता चैकजटा कालसंकर्षणी तथा ॥
श्मशानकाली कोरङ्गी भद्रकाली च कुब्जिका ।
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ॥
चण्डा चण्डवतो चण्डचण्डा चण्डी च चण्डिका ।
वाभ्रवी शिवदूती च कात्यायन्यर्द्धमस्तका ॥
काल्योऽन्याः पञ्चपञ्चाशन्मुख्याः सर्व्वागमेषु याः ।
सतीषु तासु घोरासु मूर्त्तिषु प्रथितासु मे ॥

नहि कामकलाकाली सदृश्युग्रा जगत्त्रये ।
उग्राणां मम मूर्त्तीनामियं हि परमावधिः ।।
सौम्योग्रामूर्त्तयः सन्ति यावत्यो मे सुरेश्वरौ ।
तावतीनामपि ध्यानं मन्त्रः पूजा च वर्त्तते ।।
नान्योऽस्ति जगतीमध्ये तासां वेत्ता शिवम्विना ।
अतएव षडाम्नायान् परिज्ञाय चकार सः ।।
तत्तन्मन्त्रध्यानभेदन्यासपूजाविधीनपि ।
प्राक् भवान् स हि सर्व्वज्ञः सर्व्वं विज्ञाय तत्त्वतः ।।
उत्तरोद्ध्वाधः प्रतीची पूर्व्वदक्षि[८३ ख]णसंज्ञकाः ।
आम्नायास्तुषडेवैते शिववक्त्रविनिर्गताः ।।
यामला डामरास्तन्त्रसंहितास्तस्य मध्यगाः ।
स्वस्वभक्तिविशेषेण तत्तत्कार्य्यादिसिद्धये ।।
दैवतैर्ऋषिभिः सिद्धैरसुरैर्दैत्यदानवैः ।
गुह्यकैरप्सरोभिश्च किन्नरोरगराक्षसैः ।।
सोमसूर्य्यान्वयोद्भूतैर्भूपालैरितरैर्न्नरैः ।
दृष्टप्रतीतिभिर्म्मर्त्यैः सा सा मूर्त्तिरुपास्यते ।।
युगशेषे कलौ क्षीणे नरा अल्पायुषोऽलसाः ।
निरुत्साहा दरिद्राश्च भक्तिहीनाः कुमार्ग्गकाः ।।
आसामुपासका नैव भविष्यन्ति विशेषतः ।
ध्यानमंत्रादिकं तासान्तदा लुप्तं भविष्यति ।।
तासां सौम्योग्रमूर्त्तीनां भिन्नाम्नायजुषां सदा ।
एकत्रावस्थितिर्नैव तिमिरालोकयोरिव ।।
उपासितायामेकस्यां कथं ताः समुपासिताः ।
भवेयुरित्यपि महद्दुर्घटं प्रतिभाति मे ।।

ममैको वर्त्तते किंतु महामंत्रोयुताक्षरः ।
षडाम्नायस्थिता मंत्राः प्रायशः सन्ति तत्र हि ॥
सौम्योग्राणां च मूर्त्तीनां भेदो नामानि सन्ति वै ।
एतत्परो न मन्त्रो न मंत्रोस्ति क्वापि त्रिजगतीतले ॥
महामहोग्रोग्रतरः सर्व्वसिद्ध्येकसाधकः ।
त्रैलोक्याकर्षणश्चायं तुल्यावेतौ मतौ मम ॥
नदीजलौघा जलधिं यथा सर्व्वे विशन्ति हि ।
षडाम्नायस्थिताः मंत्रास्तथैवानुविशन्ति तम् ॥
मेरुर्य्यथा पर्व्वतानां गङ्गा च सरितां तथा ।
तीर्थानाञ्च यथा काशी शस्त्राणामशनिर्य्यथा ॥
अश्वमेधोऽध्वराणां च तपस्यानामुपोषणं ।
समीरणो वलवतां कामधेनुर्ग्गवां यथा ॥
शिवो यथा देवतानां देवीनाञ्च यथाप्यहं ।
[८४ क] सर्वेषामेव मंत्राणां तथायमयुताक्षरः ॥
आराधितायामेतेन मंत्रेणैव मयि ध्रुवं ।
सर्व्वा आराधिता हि स्युः षडाम्नायस्य शक्तयः ॥
आरिराधयिषू चेन्मां सौम्योग्रास्ताश्च देवताः ।
कुरुतं यत्नमेतस्मिन् मालामन्त्रेऽयुताक्षरे ॥
प्रविशन्ति यथेभानां पादेऽन्येषां पदानि हि ।
यथेतरेषां हि पदे विशेदिभपदं न च ॥
मन्त्राः सर्व्वे तथामुष्मिन्प्रविशन्ति सुरोत्तमौ ।
नच प्रवेशः क्वाप्यस्य प्रकारैरपि भूरिभिः ॥
वीजकूटोपकूटाश्च यावन्तश्चागमोद्धृताः ।
ते सर्व्वे तत्र तिष्ठन्ति मयि त्रिभुवनं यथा ॥

आम्नायानां यथा षण्णामुपदेशो भवेत्तदा ।
अस्याधिकारी भवति नो चेन्नार्हत्यमुं मनुम् ॥
महिमानममुष्याहं वेद्मि वेद शिवोऽथवा ।
गुरूपदेशाधिगतैस्तन्मन्त्रस्य नरस्य हि ॥
पुरस्तिष्ठामि सततं भवामि वशवर्त्तिनी ।
यथाकर्षन्ति सूत्रेण खगमाराद्विहङ्गमीम् ॥
तथामुनैव मन्त्रेण मामाकर्षन्ति साधकाः ।
एह्येतत्कथितं यत्तद्भवद्भ्यां पृष्टवत्यहं ॥
समासाद्विस्तराद् वक्तुं ममशक्तिर्न्नविद्यते ।

श्रीमहाकाल उवाच ॥

श्रुत्वा देव्या वचः सर्व्वमावाभ्यां पुनरीरितम् ।
यदि देवि प्रसन्नासि तदाह्युपदिश स्वयं ॥
इति विज्ञापिता देवी प्राह (तौ?) सस्मिता(नना?) ।
कृतांजलिपुटौ कृत्वा गदत्यागदतां मनुं ॥
इति देव्या वचः श्रुत्वा तथैवाकरवावहि ।
एवं देव्युपदिश्यावां क्षणादन्तर्द्धिमागता ॥
एवं प्रकारेणावाभ्यां लब्धोयमयुताक्षरः ।
अदाद्विष्णुर्न्नारदाय सनकाय च तोषितः ॥
दुर्व्वासाः कश्यपो दत्तात्रेयश्च कपिलस्त[८४ख]था ।
चत्वार एते सच्छिष्या मता मन्त्रस्य पार्व्वति ॥
एतैः शिष्यप्रशिष्याश्च वहवो विहिताः स्वकाः ।
इत्थं परम्पराप्राप्तो ह्यस्मिंल्लोके प्रतिष्ठितः ॥

नाम्ना मृत्युञ्जयप्राणो मालामंत्रोऽयुताक्षरः ।
एवमेतस्य महिमा वर्णितुं केन शक्यते ॥
यत्रैवमवदद्देवी तत्रान्यस्य हि का कथा ।
शांभवाद्याश्च ये कूटास्ताराद्या वीजसंचयाः ॥
सर्व्वे तत्रैव तिष्ठन्ति ब्रह्मणीव जगत्त्रयं ।
यथोर्णनाभिः सूत्राणि वमत्यपि गिलत्यपि ॥
तथैवायं सृजत्यत्ति विश्वं स्थावरजंगमं ।
जन्मकोटिसहस्त्राणां लक्षेणापि न लभ्यते ॥
विना देवीप्रसादेन तथैवानुग्रहं गुरोः ।
जिघृक्षुरिममध्यायं पठित्वा प्रथमं प्रिये ॥
ततो मृत्युञ्जयप्राणं शनैः स्पष्टमुदीरयेत् ।
समाप्य सकलं मंत्रं प्रणम्य भुवि दण्डवत् ॥
मृत्युंजयप्राणदात्रे सर्व्वस्वं गुरवेऽर्पयेत् ।
अथवा येन संतोषं गुरुर्व्व्रजति तच्चरेत् ॥

इति महाकालसंहितायां प्राणायुताक्षर्य्याः प्रशंसाकथनन्नामद्विशताधिकचतुःपञ्चाशत्तमः पटलः ॥२५४ पटलः समाप्तः ॥

श्रीमहाकाल उवाच ॥

शृणुष्व हिमवत्पुत्रि षष्ठकाल्ययुताक्षरम् ।
यस्य स्मरणमात्रेण सर्व्वसिद्धिः प्रजायते॥
तारवाग्भवमायाश्च लक्ष्मीर्ह्रीस्मर एव च ।
क्रोधश्च योगिनी चैव वधूश्च शाकिनी तथा ॥
अंकुशं च प्रासादश्च क्षौंकारं पाशमेव च ।
स्फ्रोंकारञ्च समुच्चार्य्य वह्निजाया ततो वदेत् ॥

ततः कामकलाकालिमायाकाल्यौ ततो वदेत् ।
मायात्रयं समुच्चार्य क्रोधद्वयं समुच्चरेत् ॥
दक्षिणकालिके चैव क्रोधद्वयन्तथा पुनः ।
भुवनेशी त्र[८५ क]यं चोक्त्वा कालीत्रयं द्विठस्तथा ॥
ततो दक्षिणकालिके वाक्काल्यौ च समाहरेत् ।
त्रपा क्रोधा वला चैव शाकिनीवीजमुद्धरेत् ॥
वधूवीजं योगिनी च ह्फ्रेंकारं भद्रकाल्यपि ।
हूं द्वितयं समुच्चार्य्य चास्त्रद्वयं नमः पुनः ॥
वह्निजाया भद्रकालि तारं माये क्रोधौ तथा ।
भगवति ततो प्रोच्य ततः श्मशानकाल्यपि ॥
नरकंकालमालाधारिणि च ततो वदेत् ।
भुवनेशी कालीवीजं कुणपभोजिनि तथा ॥
शाकिनीद्वितयं प्रोच्य ततो वह्निनितम्विनी ।
श्मशानकालि संप्रोच्य कालीक्रोधौ तथोच्चरेत् ॥
मायावधूरमाकामफट्स्वाहाकालकालि च ।
तारं च शाकिनी चैव सिद्धिकरालि च वदेत् ॥
मायावीजं समुच्चार्य्य योगिनीवीजमुच्चरेत् ।
क्रोधवधूशाकिन्यश्च हृल्लेखा वह्निवल्लभा ॥
गुह्यकालिसमुच्चार्य्य तारमन्त्रद्वयं चरेत् ।
हूंकारं ह्रींकारञ्चैव फ्रेंकारं छ्रींकारम्पुनः ॥
स्त्रींकारं च रमावीजमंकुशं हृदयं वदेत् ।
ङेन्ता धनकालिका च विकरालरूपिण्यपि ॥
संवोधनान्ता वोद्धव्या सर्व्वत्रैव सुरेश्वरी ।
धनं चोक्त्वा देहिद्वयं दापयदापयेति च ॥

क्षेत्रपालं तथोच्चार्य इन्द्रस्वरविभूषितं ।
विंदुनादसमायुक्तमंकुशं पाशमेव च ॥
मायाक्रोधहृदां द्वे चास्त्रद्वे वह्निवल्लभा ।
ततो धनकालिके च तारवाग्भवमन्मथाः ॥
लज्जाक्रोधसिद्धिकाल्यै हृदयं सिद्धिकालि च ।
ततो मायां समुच्चार्य्य वदेच्चण्डाट्टहासिनि ॥
ततो जगद्ग्रसनकारिणि तु समुच्चरेत् ।
नरमुण्डमालिनि च प्रवदेत् चण्डकालिके ॥
का[८५ ख]मरमाक्रोधानुक्त्वा शाकिनी त्वंगनापि च ।
योगिनी फट्द्वयं प्रोच्य वह्निस्त्री चण्डकालिके ॥
नमः कमलवासिन्यै स्वाहालक्ष्मि तथोच्चरेत् ।
तारं च लक्ष्मीवीजं च माया च कमला पुनः ॥
कमले च ततश्चोक्त्वा प्रवदेत्कमलालये ।
प्रसीदद्वितयं चोक्त्वा रमा लज्जा रमा पुनः ॥
महालक्ष्म्यै नमः प्रोच्य महालक्ष्मि मायां वदेत् ।
नमो भगवति चोक्त्वा माहेश्वरि ततो वदेत् ॥
अन्नपूर्णे वह्निजाया अन्नपूर्णे तथोच्चरेत् ।
तारमायाक्रोधान् प्रोच्य उत्तिष्ठ पुरुषि वदेत् ॥
कि–पिषिभयं चोक्त्वा ततो मे समुपस्थितं ।
यदि शक्यमशक्यं वा क्रोधदुर्गे ततो वदेत् ॥
भगवति ततश्चोक्त्वा शमय वह्निसुन्दरी ।
क्रोधलज्जातारानुक्त्वा वनदुर्ग्गे मायां वदेत् ॥
स्फुरद्वे प्रस्फुरद्वे च घोरघोरतरेत्यपि ।
तनुरूपे समुच्चार्य्य च टद्वे प्रचटद्वयं ॥

कह कह रम रम वन्ध वन्ध ततो वदेत् ।
घातयद्वितयं चोक्त्वा क्रोधमस्त्रं ततः स्मरेत् ॥
ततश्च विजयाघोरे माया पद्मावति वदेत् ।
वह्निजायां ततः स्मृत्वा ततः पद्मावति स्मरेत् ॥
महिषमर्द्दिनि स्वाहा महिषमर्द्दिनि स्मरेत् ।
तारं चोक्त्वा दुर्गे द्वयं रक्षिणि वह्निकामिनि ॥
जय दुर्गे समुच्चार्य तारमाये समुच्चरेत् ।
दुं दुर्गायै स्वाहा चोक्त्वा वाङ्मायाविष्णुवल्लभाः ॥
तारं नमो भगवति मातंगेश्वरि संस्मरेत् ।
सर्व्वस्त्रीपुरुषेत्युक्त्वा वशङ्करि ततो वदेत् ॥
सर्व्वदुष्टमृगेत्युक्त्वा वशंकरि ततो वदेत् ।
सर्व्वग्रहवशंकरि सर्व्वसत्ववशंकरि ॥
सर्व्वजनमनोहरि सर्व्वमुखरंजिनि च ।
सर्वराजवशंकरि ततः स्मरेच्च साधकः ॥
सर्व्वलोकमुमे वशमानय ततो वदेत् ।
वह्नि [८६ क] स्त्री च तथा राजमातंगि साधकोत्तमः ॥
तथोच्छिष्टमातंगिनि चान्ते क्रोधवीजं स्मरेत् ।
एवं मायां ततस्तारं ततो मन्मथमेव च ॥
वह्निजायोच्छिष्टेत्युक्त्वा मातंगि समुदाहरेत् ।
तथोच्छिष्टचाण्डालिनि सुमुखि देवि संवदेत् ॥
महापिशाचिनि मायात्रिठं द्विविन्दुकं स्मरेत् ।
तथोच्छिष्टचाण्डालिनि तारश्च समुदाहरेत् ॥
महासेनो धरासंस्थो वामनेत्रविभूषितः ।
विन्दुनादसमायुक्तो वगलामुखि चोद्धरेत् ॥

सर्व्वेत्युक्त्वा च दुष्टानां मुखं वाचं समीरयेत् ।
ततश्च स्तम्भय जिह्वां कीलयद्वितयं वदेत् ॥
बुद्धिं नाशय संस्मृत्य पूर्व्ववीजं ततः स्मरेत् ।
तारपूर्व्वा वह्निजाया वगले वाग्भवं वदेत् ॥
रमामायास्मरान् स्मृत्वा धनलक्ष्मि वदेत्ततः ।
तारलज्जावाग्भवाश्च मायां तारं स्मरेत्ततः ॥
सरस्वत्यै नमः स्मृत्वा भरस्वति वदेत्ततः ।
पाशं मायां क्रोधं चोक्त्वा भुवनेश्वरि चेत्यपि ॥
तारत्रपाविष्णुजायाक्रोधकामपाशास्ततः ।
तथा चाश्वरूढ़ायै च फट्द्वयं वह्निवल्लभा ॥
अश्वारूढे समाभाष्य तारवाग्भवलज्जकाः ।
नित्यक्लिन्ने मदद्रवे वाङ्माया वह्निसुन्दरी ॥
नित्यक्लिन्ने समाभाष्य सुन्दरीवीजमुद्धरेत् ।
ततश्च भैरवीकूटं वालाकूटं ततः स्मरेत् ॥
वगलाकूटमुच्चार्य्य त्वरिताकूटमुद्धरेत् ।
जय भैरवि संप्रोच्य रमात्रपावाग्भवं स्मरेत् ॥
व्लूंकारं च ततश्चोक्त्वा चन्द्रश्च सविसर्गकः ।
अकारञ्च आकारञ्च इकारं संस्मरेत्ततः ॥
विन्दुनादसमायुक्तं वाचयेत्सा[८६ ख]धकोत्तमः ।
राजदेवी राजलक्ष्मी क्रमशस्तु ततः स्मरेत् ॥
चतुर्द्दशस्वरोपेतविन्दुद्वयविभूषितः ।
चन्द्रवीजं समुच्चार्य्य स्वर्णकूटं समाहरेत् ॥
वाङ्मायाकाममातृश्च राजराजेश्वरि ततः ।
ज्वल ज्वल समाभाष्य शूलिनि दुष्टग्रहं वै ॥

ग्रस स्वाहा समुच्चार्य्य शूलिनि च वदेत्सुधीः ।
मायामहाचण्डयोगेश्वरि श्रीकारमुद्धरेत् ॥
दान्ततान्तौ वह्निसंस्थौ तुरीयस्वरभूपितौ ।
नादबिंदुसमायुक्तौ ततोऽस्त्रपंचकं स्मरेत् ॥
जय महाचण्डयोगेश्वरि विष्णुनितम्बिनी ।
त्रपाकामत्रिपुटे च वाङ्मायानङ्गमातरः ॥
क्षींकारं क्लींकारं चैव सिद्धिलक्ष्म्यै नमस्ततः ।
काममाता भुवनेशी वाग्भवश्च स्मरेत्ततः ॥
राज्यसिद्धिलक्ष्मि चोक्त्वा ॐकारं शम्भुवल्लभा ।
क्रोधपाशौ क्रोंकारं च स्त्रींकारं क्रोधमुच्चरेत् ॥
क्षौंकारं ह्रांकारं चैव फट्कारं त्वरितं स्मरेत् ।
नक्षत्रकूटमुच्चार्य्य चन्द्रकूटं ततः स्मरेत् ॥
ततो ग्रहकूटं चैव तदन्ते च दिवाकरं ।
काम्यकूटंततोऽपि स्यात्ततः कालकूटं चरेत् ॥
तदुत्तरं पार्श्वकूटं कामकूटं तदुत्तरम् ।
ततः पश्चात् धराकूटं वारुणं तदनन्तरं ॥
चक्रकूटं समाभाष्य पद्मकूटमनन्तरं ।
शंखवराहकूटौ दर्शनान्मुक्तिदायकौ ॥
ततः स्मरेन्नृसिंहकूटं सर्व्वफलप्रदम् ।
इन्द्रकूटं समाराध्य इन्द्रलोके महीयते ॥
मत्स्यकूटं ततोऽपि स्यात्ततो ज्ञेयं त्रिशूलकम् ।
शक्तिकूटं तथोच्चार्य्य शिवलोके वसेद्ध्रुवं ॥
वैष्णवकूटं तथा ज्ञेयं केवलं विष्णुरूपिणम् ।
त्रपालज्जाक्रोधकामयो[८७ क]पितो वाग्भवं तथा ॥

गारुडं योगिनीञ्चैव शाकिनीं कालिकां चरेत् ।
ततो धराकूटं ज्ञेयं क्रोधवीजं ततश्चरेत् ॥
ततोऽघोरे सिद्धिं मे वै देहि दापय संस्मरेत् ।
वह्निजाया अघोरे च ॐकारं नम इत्यपि ॥
चामुण्डे च तथोच्चार्य्य करङ्किणि वदेत्ततः ।
करङ्कमालाधारिणि च किं किं विलम्वसे ततः ॥
भगवति ततश्चोक्त्वा शुष्कानानि ततः स्मरेत् ।
खद्वयं च ततः प्रोच्य चान्त्रकरावनेति च ॥
भो भो वला इति प्रोच्य—वल्गेति वदेत्ततः ।
कृष्णभुजंगवेष्टिततनुलम्वकपाले वै ॥
ह्लष्ट ह्लष्ट इति प्रोच्य हट्ट हट्ट तदन्तरम् ।
पत पत समुच्चार्य्य पताका च ततो वदेत् ॥
हस्ते ज्वल ज्वल प्रोच्य ज्वालामुखि ततो वदेत् ।
अनलनखखट्वाङ्गधारिणि च तथोच्चरेत् ॥
हा हा चट्ट चट्ट इति हुं हुं अट्टाट्टहासिनि ।
उड्ड उड्ड ततोऽपि स्याद्वेरेतालमुखि इति ॥
अकि अकि स्फुलिङ्गेति पिङ्गलाक्षि ततोऽपि च ।
चल चल चालयेति चालयेति तथोच्चरेत् ॥
करङ्कमालिनि प्रोच्य नमोऽस्तुते स्वाहा ततः ।
विश्वलक्ष्मि ततश्चोक्त्वा तारमाये समुच्चरेत् ॥
क्षेत्रपालो वह्निसंस्थो चतुर्थस्वरमस्तकः ।
नादविन्दुसमायुक्तो वीजं समुच्चरेत् सुधीः ॥
दादिरेवं समुच्चार्य्य रान्तश्चैवं समाहरेत् ।
एवं शान्तः समाहार्य्यः कालीक्रोधौ पुनर्व्वदेत् ॥

अस्त्रं यन्त्रप्रमथिनि स्फ्रेंकारं च ततः स्मरेत् ।
ततो धरां समाहृत्य वीजं शृणु मनोहरम् ॥
रेक्षश्चैव जकारश्च तदन्तश्च क्रमाल्लिखेत् ।
वह्निरूढं वीजं ज्ञेयं तुरी[८७ ख]यस्वरपूजितं ॥
नादविन्दुशिरोवीजमुच्चरेद्वीजमुत्तमं ।
तारत्रपे समाभाष्य फेंकारं समुदीरितं ॥
चण्डयोगेश्वरि कालि शाकिनी हृदयन्तथा ।
चण्डयोगेश्वरि लज्जाक्रोधास्त्राणि विनिर्दिशेत ॥
महाचण्डभैरवि च भुवनेशीं वदेत्ततः ।
क्रोधास्त्रं वह्निजायां च महाचण्डभैरवी वै ॥
वाग्भुवनेश्वरी कामशाकिनी वाग्भवानपि ।
लज्जा रमा तथा चैव उद्धरेत्कोविदो जनः ॥
त्रैलोक्यविजया ङेन्ता हृदये वह्निवल्लभा ।
त्रैलोक्यविजये चैव वाग्लज्जालक्ष्मीमन्मथाः ॥
प्रासादं जय लक्ष्मि च युद्धे मे विजयं वदेत् ।
देहि चेत्युच्य प्रासादं पाशमङ्कुशफट्त्रयम् ॥
वह्निस्त्री जयलक्ष्मि च अतिचण्डं तथोच्चरेत् ।
तथा महाप्रचण्डेति भैरवि च ततः स्मरेत् ॥
क्रोधचण्डं समाभाष्य अतिचण्डटकारकौ ।
योगवीजं समाभाष्य फटं स्मरेत्ततोऽपि च ॥
विलिखेच्च ततो याम्यकूटं परमसिद्धिदम् ।
फान्तफस्थो वह्निसंस्थस्ततश्च ठादिमुच्चरेत् ॥
तदन्ते च महाकूटमीशसंज्ञं समुच्चरेत् ।
रेफमुच्चार्य्य धीरेन्द्र फटं स्मरेत्तदन्तरम् ॥

महामन्त्रेश्वरि चैव तारत्रपारमास्मरान् ।
प्रासादक्रोधौ वज्रञ्च वदेत्प्रस्ताविनि द्विठम् ॥
वज्रप्रस्तारिणि चोक्त्वा तारं ह्रीं हृदयं वदेत् ।
परमभीषणे चोक्त्वा क्रोधद्वयं क्रमाल्लिखेत् ॥
करकङ्कालमालिनि चोक्त्वा वै शाकिनीद्वयम् ।
कात्यायनि व्याघ्रचर्म्मावृतकटि वदेदिति ॥
कालीद्वयं समुच्चार्य्य श्मशानचारिणि वदेत् ।
नृत्य नृत्य गाय गाय हस हस क्रोधद्वयं ॥
कार[८८क]णादीनि संलेख्य चांकुशद्वितयमपि ।
शववाहिनि संलेख्य मां रक्ष रक्ष चेत्यपि ॥
अस्त्रद्वयं क्रोधद्वयं हृल्लेखा वह्निकामिनी ।
कात्यायनीत्विति प्रोच्य वाङ्माया हरिसुन्दरी ॥
शान्तः षान्तश्च पान्तश्च यान्तो भगविभूषितः ।
नादविन्दुस्ब(स्व?)लंकृत्य वदेद्बीजमनुत्तमम् ॥
विन्दुहीनं प्रेतवीजं शान्तं पाशसमन्वितम् ।
विन्दुनादभूषितन्तु वदेद्बीजं तदुत्तरं ॥
भान्तं विन्दुयुतं चैव तुरीयस्वरभूषितं ।
दादिं विन्दुयुतं स्मृत्वा वामकर्णविभूषितं ॥
नकुलीशो वह्निसंस्थो पाशविन्दुसमन्वितः ।
वीजं स्मृत्वा तथा मायां तथादीर्घतनुच्छदं ॥
योगिनीकूटमुच्चार्य्य फेत्कारी कूटमुच्चरेत् ।
शिवशक्तिसमरसचण्डकापालेश्वरि ततः ॥
क्रोधं हृदयमुच्चार्य्य चण्डं वदेत्तदन्तरं ।
कापालेश्वरि चोच्चार्य्य वाक्कालीमारमातरः ॥

ततश्च खेचरीकूटं कूटानां कूटमुत्तमं ।
सुवर्णद्वितयं प्रोच्य महासुवर्ण इत्यपि ॥
कूटेश्वरि समाभाष्य व्यूहकूटं ततः स्मरेत् ।
रमा त्रपा वाग्भवश्च हृल्लेखा वह्निसुन्दरी ॥
स्वर्णकूटेश्वरि प्रोच्य वाग् लज्जा कृष्णभार्य्यका ।
पाशमुच्चार्य्य देवेशि ब्रह्मणस्तृतीयं वदेत् ॥
विन्दुयुक्तं धरासंस्थं वामकर्णसमन्वितम् ।
वीजमेतत्समुच्चार्य्य ईंकारं पाशमेव च ॥
ततो नादं समुच्चार्य्य हृल्लेखाभगवति वदेत् ।
वार्त्तालि द्वितयं प्रोच्य वाराहि द्वितयं वदेत् ॥
वराहमुखि तथैवोक्त्वा ऐंकारं ग्लूंकारन्तथा ।
अन्धे अन्धिनि हृदयं रुन्धे रुन्धिनि सञ्चरेत् ॥
हृल्लेखाजम्भे [८८ ख] जाम्भिनि च हृदयं मोहे मोहिनि स्मरेत् ।
नमःस्तम्भे स्तम्भिनि च नमःसर्व्वदुष्ट(ष्टे?)वेत्यपि ॥
प्रदुष्टानां ततश्चोक्त्वा सर्व्वेषां सर्व्ववाक्चित्त ।
चक्षुःश्रोत्रमुखगतिजिह्वास्तम्भं कुरुद्वयं ॥
शीघ्रं वशं कुरु कुरु शीघ्रं वशं कुरुद्वयम् ।
वाग्भवं कालीबीजञ्च श्रीवीजं तदनन्तरं ॥
ठपंचकं समाभाष्य तारहेतुं क्रोधमुच्चरेत् ।
अस्त्रं द्विठं वार्त्तालि च भवेद्द्वादशिकामपि ॥
ग्लुं ह्रीं वीजं समुच्चार्य्य वार्त्तालि वाराहि वदेत् ।
ह्रीं ग्लुं तावनुस्मृत्य द्वादशिकं वीजं ॥
चण्डवार्त्तालि संप्रोच्य वाङ्मायाविष्णुवल्लभाः ।
आंकारं ग्लूंकारं चैव ईंकारं वार्त्तालिद्वयम् ॥

वाराहिद्वितयं प्रोच्य शत्रून् दह दहेति च ।
ग्रस ग्रसेति संलेख्य चतुर्थवीजमुच्चरेत् ॥
तत आञ्च ततो ग्लुं च ततो हूञ्च फटन्तथा ।
जय वार्त्तालि संभाष्य वाङ्मा[illegible] हरिवल्लभा ॥
महावीजं समुच्चार्य्य प्रेतवीजं समुच्चरेत् ।
तारमायाक्रोधांश्चैव शाकिनीवीजमुच्चरेत् ॥
राज्यप्रदे समाभाष्य ख्फ्रेंकारवीजमुच्चरेत् ।
फेत्कारीवीजमुच्चार्य्य उग्रचण्डे स्मरेत्पुनः ॥
रणमर्द्दिनि संभाष्य क्रोधं च शाकिनीं वदेत् ।
योगिनीञ्च वधूवीजं सदेति रक्ष रक्ष च ॥
त्वं रूपं मां रूपं च जूं सं सर्गान्तमेव च ।
मृत्युहरे नमः प्रोच्य वह्निजायां द्विविन्दुकम् ॥
स्मरेदुग्रचण्डे चैव वाग्भवं·····पुनः ।
योगिनीकूटमुच्चार्य्य फेत्कारीकूटमुद्धरेत् ॥
वामनेत्रयुतं वीजं भजतां कामदं महत् ।
तारमाया हस फ्रें क्रोधं च शाकिनीं चरेत् ॥
उग्र च[८६ क]ण्डे समाभाष्य वीजं चण्डेश्वरं ततः ।
महाप्रेतं समाभाष्य वह्नेर्भार्यां लिखेत्ततः ॥
श्मशानोग्रचण्डे इत्युक्त्वा वाग्भवपञ्चकं वदेत् ।
ततश्च फेत्कारीकूटं वामनेत्रयुतं स्मरेत् ॥
अमृताख्यं ततः स्मृत्वा डाकिनीं वामनेत्रिकां ।
फेत्कारीं च ततो देवि वामनेत्रविभूषितां ॥
रुद्रचण्डा चतुर्थ्यन्ता सानुहृद्वह्निवल्लभा ।
सम्बुद्ध्यन्ता रुद्रचण्डा वाग्भवपञ्चकं पुनः ॥

फेत्कारीकूटं ततो देवि वामनेत्रविभूषितम् ।
चण्डकूटे समाभाष्य डाकिनी वीजमुद्धरेत् ॥
धराकूटं समाभाष्य तुरीयस्वरभूषितं ।
प्रचण्डायै ततश्चोक्त्वा हृदयं वह्निवल्लभा ॥
प्रचण्डे वाग्भवं पंचफेत्कारीं मायया युतां ।
सन्धिकूटं ततश्चोक्त्वा ङेन्ता हि चण्डनायिका ॥
त्रूंकारं च समुच्चार्य्य नमःस्वाहे ततः परं ।
ततश्चण्डनायिके च वाग्भवपञ्चकं ततः ॥
तथैव फेत्कारीकूटं कूटं च व्रह्मनिर्म्मितं ।
चण्डेश्वरं ततो देवि वामाक्षि विन्दुसंयुतम् ॥
महाप्रेतं समुच्चार्य क्लीं हृद्वह्निवह्निवल्लभा ।
चण्डे चोक्त्वा महादेवि वाग्भवपञ्चकं वदेत् ॥
फेत्कारीकूटं तथेशानि नादं वामाक्षि संयुतम् ।
चण्डवत्यै ततश्चोक्त्वा क्ष्म्लूंकारं हृदयं तथा ॥
स्वाहाचण्डवति चोक्त्वा वाग्भवपञ्चकं पुनः ।
फेत्कारीकूटं तथा देवि वायुकूटं ततो वदेत् ॥
डाकिनीं च ततो देवि वामनेत्रविभूषितां ।
अतिप्रेतं समाराध्य चातिचण्डां महेश्वरि ॥
चतुर्थ्यन्तां च हृदयममृतं वीजमुद्धरेत् ।
नमःस्वाहे चातिचण्डे वाग्भवपञ्चकं चरेत् ॥
फेत्कारीकूटं [८६ ख] देवेशि श्मशानकूटकं पुनः ।
डाकिनीं च समाभाष्य वामनेत्रविभूषितां ॥
महाप्रेतं तथोच्चार्य चण्डिकायै स्मरेत्ततः ।
रौद्रवीजं समुच्चार्य्य नमःस्वाहे ततः परं ॥

चण्डिके च तथोच्चार्य्य वाग्भवपंचकं पुनः ।
फेत्कारीकूटं चोच्चार्य्य स्फ्रींकारं तदनन्तरं ॥
कामक्रोधौ–कारञ्च क्लह्रींकारं तदनन्तरं ।
कात्यायन्यै स्फ्रेंकारं च कामदायिन्यै ततः परं ॥
हुंकारञ्च नमःस्वाहे ज्वालाकात्यायनि ततः ।
वाग्भवान् पञ्च संलिख्य कामक्रोधौ रमा ततः ॥
द्रावणं च समुच्चार्य्य महिषमर्दिनि ततः ।
श्रींकारं चैव देवेशि वाग्भवाः पञ्च एव च ॥
उन्मत्तमहिषमर्द्दिनि च ततः परं ।
ततोवाग्भवान्पंच नक्षत्रकूटं संलिखेत् ॥
शंखकूटं ततश्चोक्त्वा महामहेश्वरि वदेत् ।
ततश्च तुम्बुरेश्वरि वह्निजाया ततः परं ॥
तुम्बुरेश्वरि ततश्चोक्त्वा तारत्रपे ततः परं ।
कामक्रोधामृतांश्चैव पाशं वाग्भवमेव च ॥
क्रोधप्रेतौ शाकिनी च चैतन्यभैरवि तथा ।
शाकिनी च प्रेतांकुशौ पाशवागमृतक्रोधाः ॥
काममाये तारास्त्रे च द्विठश्चैतन्यभैरवि ।
वाग्भवाः पञ्च च तदा तदा मुण्डमधुमती ॥
चतुर्थ्यन्ता समुच्चार्य्या तथैव शक्तिभूतिनी ।
ततो मायात्रयञ्चोक्त्वा फट्कारं मधुमत्यऽपि ॥
सम्बुद्ध्यन्ता समुच्चार्य्या वद वद ततः परम् ।
वाग्वादिनि प्रेतवीजं विन्दुनादसमन्वितं ॥
विसर्गहीनं चोच्चार्य्य क्लिन्नक्लेदिनि ततः परम् ।
महाक्षोभं कुरु तदा प्रेतवीजमतः परम् ॥

वाग्वादिनी भैरवि च माया च शाकिनी तथा ।
ख्फ्रेंकारञ्च समुच्चार्य्य [६० क] कामवीजं ततः परं ॥
पूर्णेश्वरि सर्व्वकामान् पूरयानुतारं लिखेत् ।
अस्त्रं स्वाहा पूर्णेश्वरि सम्बोध्यन्ता ततः परं ॥
वाग्भवपंचकं चैव रक्तरक्ते ततो लिखेत् ।
महारक्तचामुण्डेश्वरि चैव ततः परं ॥
अवतरद्वयं चैव वह्निपत्नी तदा प्रिये ।
ततो रक्तचामुण्डेश्वरि संलिख्य माहेशि ॥
तारत्रपा रमा स्त्रिपुरा वागीश्वरी तथा ।
ङेन्ता नमः समुच्चार्य्य पुरा वागीश्वरि तथा ॥
ह्सें वीजं तदा देवि कूटं मारं ततः परं ।
महाप्रेतं ततः कालभैरवि च ततः परम् ॥
निशाकूटकूर्च्चकूटौ तुङ्गप्रतुङ्गकूटकौ ।
चण्डवारुणि संप्रोच्य तारमघोरे च तदा ॥
पाशयुक्तं हकारञ्च घोरे तदनुवदेत् ।
त्रपाघोरघोरतरे दीर्घं तनुच्छदं ततः ॥
सर्व्वतः शर्व्वशर्व्वे च ह्रें कारं च ततः प्रिये ।
नमस्ते रुद्ररूपे च ह्रविसर्गौ ततः शृणु ॥
प्रणवञ्च तथा घोरे त्रपालक्ष्म्यङ्कुशा अपि ।
कामाङ्गना वाग्भवाश्च गारुडं योगिनीप्रिये ॥
शाकिनी च कालीवीजं फेत्कारी तदनन्तरं ।
क्रोधवीजं अघोरे च सिद्धिं मे देहि दापय ॥
वह्निजायान्ततो दद्याद्धनदानुघोरे वदेत् ।
तारमाये शाकिनी च क्रोधवीजं च पार्व्वति ॥

महादिग्वीरतदा वाग्रमास्मरपाशकाः ।
मुक्तकेशि चण्डाट्टहासिनि योगिनी तथा ॥
वधूकाल्यमृतान्युक्त्वा मुण्डमालिनि संवदेत् ।
ततस्तारं वह्निजायां दिगम्वरि च तारकम् ॥
वाक्त्रपाकामकमलाकालेश्वरि ततो हरेत् ।
सर्व्वमुखस्तम्भिनि च सर्व्वजनमनोहरि ॥
सर्व्वजनवशंकरि सर्व्वदुष्टनिर्मर्द्दिनि ।
सर्व्वस्त्रीपुरुपा[६०ख]कर्पिणि छिन्दि श्रृंखलां ततः ॥
त्रोटयद्वितयं प्रोच्य सर्व्वशत्रून् वदेत् प्रिये ।
जम्भयद्वितयं चोक्त्वा द्विपां निर्द्दलयद्वयं ॥
सर्व्वान् स्तम्भय द्वितयं मोहनास्त्रेण द्वेपिणः ।
उच्चाटयद्वयं प्रोक्त्वा सर्व्ववश्यं कुरुद्वयं ॥
वह्निपत्नी देहि युगं ततः सर्व्वं स्मरेत्प्रिये ।
कालरात्र्यै कामिन्यै च गणेश्वर्य्यै नमस्तदा ॥
कालरात्रि ततश्चोक्त्वा तारवाग्भवपाशकाः ।
ततः कलारामकलां सविन्दुं श्रृणु पार्व्वति ॥
एह्येहि भगवति ततः किरातेश्वरि ततः परम् ।
विपिनकुसुमावतंसिनिकर्णे ततः प्रिये ॥
भुजगनिर्म्मोचकञ्चुकिनि मायाद्वयं ततः ।
सविन्दुकं ह्लद्वयञ्च कहद्वयं ज्वलद्वयं ॥
प्रज्वलद्वितयं देवि सर्व्वसिद्धिं ददद्वयं ।
देहिद्वयं दापय च सर्व्वशत्रून्दहद्वयम् ॥
वन्धद्वयं पठद्वयं मथद्वयं महेश्वरि ।
विध्वंसयद्वयं प्रोच्य कवचत्रितयं ततः ॥

अस्त्रहृद्वह्निभार्य्या च किरातेश्वरि संवदेत् ।
वाग्भवपञ्च च तथा वज्रकुब्जिके ततः स्मरेत् ॥
प्रलयवीजं प्राणेशि त्रैलोक्याकर्षिणि ततः ।
त्रपाकामांगद्राविणि स्मराङ्गणे ततोऽनघे ॥
महाक्षोभकारिणी ततो वाग्भवो मीनकेतनः ।
द्विविन्दुकश्चन्द्रवीजश्चतुर्द्दशस्वरान्वितः ॥
द्विविन्दुकं पुनश्चन्द्रं ततोवज्रकुब्जिके च ।
नमो भगवति तदा ततो घोरे महेश्वरि ॥
भोगवीजं ततो देवि श्रीकुब्जिके ततः परम् ।
सानुवीजं सकारञ्च जीवारूढं रेफान्वितं ॥
कलया भूषितं ज्ञेयं तदुत्तरं शृणु प्रिये ।
वीजन्ततःपरमेशानि वामकर्णविभूषि[६१क]तं ॥
ङ ज ण न म उच्चार्य अघोरामुखि तत्परं ।
हृकारं विन्दुसहितं आद्यदीर्घत्रयान्वितं ॥
क्रमेण त्रीणि वीजानि संलिख्य प्राणवल्लभे ।
किलिद्वयं ततो विच्चे पादुकां पूजयाम्यपि ॥
नमः समयकुब्जिके तारमैधत्रपास्मराः ।
शाकिनी प्रलयञ्चैव फेत्कारीतदनन्तरं ॥
भावाख्यकूटं ततो देवि चतुर्थस्वरभूषितं ।
षष्ठस्वरविहीनञ्च भगवति वदेत्ततः ॥
विच्चे घोरे ततोऽपिस्यात्फेत्कारी वाग्भवान्विता ।
श्रीकुब्जिके ततः पश्चात्सानुवीजन्ततः परं ॥
तदेव षष्ठस्वरेण समुद्धरेन्महेश्वरि ।
प्रेतवीजं विसर्गहीनं ङ न ण नम इत्यपि ॥

अघोरामुखि तदा छस्य वीजत्रयन्तथा ।
किलिकिलि ततो विच्चे कामिनी क्रोध एव च ॥
प्रेतवीजं पादुकां च पूजयामि नमः स्वाहा ।
मोक्षकुब्जिके ततोपि स्यान्नमो भगवति तथा ॥
सिद्धे तदा महेशानि प्रलयत्रयमुद्धरेत् ।
दीर्घाद्यत्रयसंयुक्तं कुब्जिके तदनन्तरं ॥
सानुत्रयंतथादेवि दीर्घ—विभूषितं ।
खगे ततो वाग्भवश्च अघोरे तदनन्तरम् ॥
अघोरामुखि ततः किलि द्वयं तथोद्धरेत् ।
विच्चे पादुकां चोक्त्वैव पूजयामि नमस्ततः ॥
भोगकुब्जिके तथैव मेधत्रपारमास्तथा ।
फेत्कारी च जीवषान्तौ वह्न्यारूढ़ौ तारान्वितौ ॥
भगवत्यम्ब ततः कूटं प्राभातिकन्ततः ।
पुनस्तदेवकूटं स्यात्सकाराद्यञ्च चिन्तयेत् ॥
कुब्जिकायै तथोच्चार्य्य नकुलीशसकारकौ ।
ब्रह्मेन्द्रगौरी च तदा विन्दुञ्च कलयान्वितम् ॥
जीवश्चन्द्रश्च ब्रह्मा च [६१ख] एकादशस्वरस्तथा ।
गौरीवीजं परे दत्वा षष्ठस्वरविभूषितं ॥
ततो ङञणनमेति अघोरामुखि संलिखेत् ।
पूर्व्ववत्त्रीणि वीजानि छकारस्य समुद्धरेत् ॥
किलि किलि ततो विच्चे मानुषान्तौ रेफारूढ़ौ ।
तारान्वितौ फेत्कारी च रमा माया मेधा अपि ॥
ततो जय कुब्जिके हि मेधमायारमास्तथा ।
ततः साद्यप्रलयञ्च प्रेतं विसर्गहीनकं ॥

विन्दुयुक्तं ततः पश्चाद् भगवत्यम्ब इत्यपि ।
ततः प्राभातिकं कूटं साद्येन तद्वितीयकं ॥
वामकर्णविहीनं कलया मण्डितं प्रिये ।
कुब्जिके च ततश्चोक्त्वा वालाकूटं ततः परम् ॥
तत्कूटं च द्वयं लेख्यं तुरीयषष्ठभूषितम् ।
ततो ङञणनम अघोरामुखि संवदेत् ॥
छां छीं किलि किलि ततो विच्चेऽस्त्रंवह्निवल्लभा ।
क्रोधास्त्रं वह्निपत्नी च हृद्वाक्त्रितयन्ततः ॥
ततः सिद्धिकुब्जिके मैधमायारमा अपि ।
प्रलयप्रेतवीजं ततो देविकूटं वाराहिकं ततः ॥
साद्यं तदेव कूटं स्याद्वितीयं परमेश्वरि ।
रेफस्थाः सह पान्ताश्च कलाविन्दुसमन्विताः ॥
षष्ठस्वरविहीनं तु कलावीजेन भूषितं ।
एतद्वीजं समाभाष्य कुब्जिके तदनन्तरम् ॥
मायाद्वयमागच्छद्वयं तत्र विचिन्तयेत् ।
आवेशयद्वयंप्रोच्य वेधयद्वयमाहरेत् ॥
मायाद्वयं तथैवोक्त्वा दितीयं च वाराहिकं ।
संलिख्य द्वितीयं कूटं मूलवाराहिकं ततः ॥
नमःस्वाहे तथा चोक्त्वा आवेशकुब्जिके ततः ।
माहेन्द्राख्यं ततः कूटं फेत्कारीवीजमुद्धरेत् ॥
पित्सकूटं ततोभद्रे मार्ज्जाराख्यन्ततः प्रिये ।
मणिकूटमृषिकूटं कूटंसारङ्गकं ततः ॥
[६२ क] वाग्भवपञ्चकन्ततः कालि कालि ततः परं ।
महाकालि मांस इति शोणितभोजिनि ततः ॥

ह्लां ह्लीं ह्लूं रक्तकृष्णमुखि समुद्धरेत्ततः ।
देवि मा मां पश्यन्त्विति शत्रव इति संवदेत् ॥
श्रीहृदयशिवदूति श्रीपादुकां ततः परम् ।
पूजयामि क्रांकारं च हृदयाय नमस्ततः ॥
हृदयशिवशिवदूति च मैधपञ्चकमुद्धरेत् ।
नमोभगवति तदा दुष्टचाण्डालिनि ततः ॥
रुधिरमांसभक्षिणि कपालखट्वांग तथा ।
ततः पश्चाद्धारिणि च हनयुग्मं वदेत्ततः ॥
दहयुग्मं पचयुग्मं मम शत्रून् ग्रसद्वयम् ।
मारयद्वितयं प्रोच्य क्रोधत्रयं ततः प्रिये ॥
फट्शिरः शिवदूतीति श्रीपादुकां पूजयामि ।
ह्लींशिरसे ततः स्वाहा शिरः शिवदूति ततः ॥
वाग्भवपञ्चकं ततः प्रलयत्रयमाहरेत् ।
आद्यदीर्घत्रयं कृत्वा महापिंगल ततः ॥
जटाभारे विकटरसनाकराले संवदेत् ।
सर्व्वसिद्धिं देहि देहि दापयद्वितयंवदेत् ॥
शिखाशिवदूति ततः श्रीपादुकां पूजयामि ।
दीर्घतनुच्छदं ततः शिखायै च वषट् ततः ॥
शिखाशिवदूति ततो वाग्भवपञ्चकं ततः ।
महाश्मशानवासिनि घोराट्टहासिनि ततः ॥
विकटतुङ्गकोको(का?)मुखि मायास्मरौ तथा ।
हरिजायामहापातालतुलितोदरि संवदेत् ॥
भूतवेतालसहचारिणि संलिख्य चानघे ।
कवचशिवदूति च श्रीपादुकां ततः स्मरेत् ॥

पूजयामि कवचाय क्रोधवीजं स्मरेत्ततः ।
कवचशिवदूति हि मैधानां पञ्च एव च ॥
लेलिहान [६२ ख] रसना तु भयानके वदेत्ततः ।
विस्रस्तचिकुरभारभासुरे संवदेत् प्रिये ॥
चामुण्डा भैरवी ततो डाकिनी गण चेत्यपि ।
परिवृते शाकिनी च डाकिनी क्रोध एव च ॥
आगच्छ द्वितयं प्रोच्य सान्निध्यं कल्पयद्वयम् ।
त्रैलोक्यडामरे तथा महापिशाचिनि ततः ॥
नेत्रशिवदूति तदा श्रीपादुकां तथा प्रिये ।
पूजयामि नेत्रत्रयाय वौषट् नेत्र इत्यपि ॥
शिवदूति समाभाष्य वाग्भवपञ्चकं ततः ।
गुह्यातिगुह्यकुब्जिके त्रिक्रोधमस्त्रमेव च ॥
मम सर्व्वोपद्रवान् मन्त्रतंत्र ईपि तदा ।
यन्त्रचूर्णप्रयोगादिकान् परिकृतान् तदा ॥
करिष्यन्ति तान् सर्वान् हनयुग्मं तथोत्तरम् ।
मथयुग्मं मर्दययुगं युगलं परिकीर्तितम् ॥
दंष्ट्राकरालि शाकिनी च क्रोधास्त्रे च ततः परम् ।
गुह्यातिगुह्यकुब्जिके ततोऽस्त्रशिवदूति च ॥
श्रीपादुकां पूजयामि अस्त्राय फट् तदन्तरम् ।
अस्त्रशिवदूति ततो वाग्भवपञ्चकं तथा ॥
क्रोधानां पञ्च आहृत्य कारघोरनादेति च ।
विद्राविद्राविजजगत्त्रये ततोमायात्रयं हरेत् ॥
प्रसारितायुतभुजे महावेगप्रधाविते ।
स्मरत्रयं पदविन्यासत्रासितइति स्मरन् ॥

सकलं पाताले रमात्रयं ततो वदेत् ।
व्यापकशिवदूति च ततो वदेज्जितेन्द्रिय ॥
परमशिवपर्य्यङ्कशायिनि तदनन्तरम् ।
ततः क्रमेण देवेशि योगिनीत्रयमुद्धरेत् ॥
गलद्रुधिरमुण्डमालाधारिणि संवदेत् ।
घोरघोरतररूपिणि संवदेत्ततः ॥
ततः परं शाकिन्यास्तु क्रमेण त्रयमाहरेत् ।
[६३ क] ज्वालामालि–ङ्गजटाजूटे वदेच्च साधकः ॥
अचिन्त्यमहिमवलप्रभावे तदनन्तरम् ।
कामिनीत्रयमुद्धृत्य दैत्यदानव इत्यपि ॥
निकृन्तनि ततोऽपिस्यात् शृणुष्व परमेश्वरि ।
सकलसुरासुरकार्यसाधिके तदनन्तरम् ॥
त्रितारं फट् नमः स्वाहा व्यापकशिवदूति ततः ।
तारत्रपारमाकामवाग्भवाङ्कुशलज्जकाः ॥
पाशक्रोधौ महापुरुषप्रासादौ तदनन्तरम् ।
अमृतङ्गारुडञ्चैव फेत्कारी तदनन्तरम् ॥
चण्डहयग्रीवौ ततो योगिनी शाचिनी तथा ।
मेघोवियद्रतिञ्चैव प्रेत स्फ्रेंकारमेव च ॥
खेचर्य्यनेहसौ चैव भौजंगमस्तथापरः ।
कालसंकर्षिणि तदा क्रोधौ च वह्निवल्लभा ॥
कालसंकर्षिणि पुनर्म्मेंधमायारमास्मराः ।
फेत्कारी क्रोधौ तदनु कुक्कुटि क्रोंकारं तदा ॥
पाशाङ्कुशौ शाकिनी च चण्डवीजं ततः परम् ।
अस्त्रद्वयं वह्निजाया कुक्कुटि तदनुस्मरेत् ॥

तारं माया ततः कामः कामिनी शाकिनी तथा ।
भ्रमराम्बिके तदनु शत्रुमर्दिनि संवदेत् ।।
पाशाङ्कुशप्रासादाश्च क्रोधश्च योगिनी तथा ।
अस्त्रद्वयं हृदयं च वह्न्यङ्गना तारा तथा ।।
भ्रमराम्बिके तदनु चण्डवीजं ततः स्मरेत् ।
धनदे भुवनेशी च सां सीं सूं तदनन्तरम् ।।
ततश्च संकटादेवि संकटेभ्यो मां तथा ।
तारयद्वयं रमाकामौ प्रासादौ क्रोध एव च ।।
पाशास्त्रे चवह्निचवला संकटादेवि तत्परम् ।
पाशाङ्कुशप्रासादाश्च भोगवति ततः परम् ।।
तारमाये समुच्चार्य वादिक्षान्तं समुद्धरेत् ।
विन्दुनादसमायुक्तं नव[६३ ख]वीजं क्रमेण हि ।।
क्रोधश्च हृदयं चैव भगवति वदेत्ततः ।
महार्णवेश्वरि ततस्त्रैलोक्यग्रसनेति च ।।
शीने पाशं कलावीजं वामकर्णं सविन्दुकं ।
अस्त्रं च वह्निपत्नी च महार्णवेश्वरि ततः ।।
तारवीजं क्षींकारञ्च पींकारं चूंकारं तदा ।
ततो भगवति ततो जान्तः षष्ठस्वरान्वितः ।।
विन्दुयुक्तौ महेशानि कूटं प्राभातिकन्ततः ।
ततो वाराहिकं कूटं सर्व्वतन्त्रसुगोपितं ।।
चण्डत्र्यंकारकापालिनि जय ऊंकेश्वरि नमः ।
द्विठोजय ऊंकेश्वरि तारमायापाशास्तथा ।।
ङेन्ता च शवरेश्वरी नमश्च शवरेश्वरि ।
प्रणवं मैधपाशौच त्रपारमास्मरास्ततः ।।

क्रोधश्च शाकिनीवीजं डाकिनी फेत्कारी तथा ।
पिङ्गले पिङ्गले ततो महापिङ्गले ततः परं ॥
कालीवीजं क्रोधवीजं शाकिनी योगिनी तथा ।
प्रेतकाल्यावङ्कुशं च शाकिनी कामिनी तथा ॥
रमाचण्डानेहसाञ्च विद्युत्पन्नगद्विठाः पुनः ।
सिद्धिलक्ष्मि ततस्तारं वाक्त्रपाश्रीस्मरा अपि ॥
भगवति महा तदा मोहिनि तदन्तरम् ।
ब्रह्मविष्णुशिवादिसकलेति वदेत्ततः ॥
सुरासुरमोहिनि सकलं प्रवदेत्ततः ।
जनं मोहय मोहय वशीकुरुद्वयं वदेत् ॥
कामाङ्गद्राविणि ततः कामांकुशे ततः परं ।
त्रिकामिनी कामरमे त्रपा मैधं तारं तथा ॥
महामोहिनि तदनु वाक्स्मरौ कुलिका तथा ।
ततो वाले हकारं च सकलाश्चस्वरूपकाः ॥
माया वीजं समुद्धार्य्य हसकहलह्रींन्ततः ।
सकलह्रीं तदनु त्रिपुरसुन्दरि ततः ॥
कुं नमो मुकाम्बिकायै वादिनो मूकयद्वयं ।
पाशवीजं का [६४क] मवीजं मायावीजं ततः परं ॥
विन्दुविसर्गसहितं रुद्रस्वरविहीनकम् ।
तत्ववीजं आदित्यश्च शक्रस्वरविभूषितं ॥
वह्नचङ्गना च तदनु मुकाम्बिके ततः प्रिये ।
माया च नाकुलं चैव क्रोधास्त्रे तदनन्तरम् ॥
एकजटे ततः पश्चात् त्रपानाकुलक्रोधकाः ।
नीलसरस्वति ततस्तारत्रपा ततः परं ॥

नाकुलेर्ष्ये च तदनु फट्कारन्तदनंतरम् ।
उग्रतारे च तदनु ताररमामायास्तथा ॥
मैधं वज्रवैरोचनीये ईर्ष्याद्वयं तत. परं ।
अस्त्रद्विठे छिन्नमस्ते तारं हृदयमेव च ॥
भगवत्यै पीताम्बरायै त्रपे सुमुखि ततः ।
बगले विश्वं मे वशंकुरु कुरु तथा ॥
द्विठोवश्यबगले च हुंखेक्ष तदनन्तरं ।
त्रिकंटकि तदनु च ताराङ्कुशस्मरा अपि ॥
कमला हरपत्नी च पाशं जायाक्रोधन्तथा ।
जयदुर्गे तदनु च रक्ष रक्ष स्वाहा ततः ॥
संग्रामजयदुर्गे च त्रपास्मररुपस्तथा ।
विजयप्रदे तदनु प्रणवं पाशमेव च ॥
प्रासादामृतगारुडाः पन्नगास्त्रे ततः परं ।
ब्रह्माणि तारप्रासादौ ग्लुं आं ह्रीं तदनन्तरं ॥
रमेर्ष्ये च ततोऽपिस्यान्माहेश्वरि वदेत्ततः ।
भुजङ्गविद्युज्जलदाः शाकिनीरतिकालिकाः ॥
चण्डकालौ ग्लुंकारं च प्रेतं क्रोधं तथैव च ।
क्रोधमस्त्रद्वयं ततो वह्निजाया ततः परं ॥
माहेश्वरि तदनु त्रपावाणीस्मरास्तथा ।
तारं कौमारि तदनु मयूरवाहिनि ततः ॥
शक्तिहस्ते ततः क्रोधं शाकिनी तदनन्तरम् ।
वधूवीजमस्त्रद्वयं वह्निजाया ततः परम् ॥
कौमारि तत्परस्तारन्नमो नारायण्यै ततः ।
जगत्स्थितिकारिण्यै त्रिकामस्त्रिरमा त[६४ ख]तः ॥

पाशकालद्विठानुक्त्वा वैष्णवि प्रणवं ततः ।
हृदयं भगवत्यै वराहरुपिण्यै ततः परं ॥
चतुर्द्दशभुवनाधिपायै भूपतित्वम्वदेत्ततः ।
मे देहि दापय स्वाहा वाराहि तदनु प्रिये ॥
तारपाशांकुशक्रोधकालमायास्मरस्त्रियः ।
महाक्रोधः क्षेत्रपाली चण्डकालौ च शाकिनी ॥
जिह्वासटाघोररूपे दंष्ट्राकराले ततः स्मृतं ।
नारसिंहि त्रिप्रासादं ततः क्रोधत्रयं भवेत् ॥
अस्त्रद्वयं वह्निजाया नारसिंहि ततोप्यनु ।
तारमाररमाक्रोधा इन्द्राणि तदनन्तरम् ॥
मायायुग्मं जयद्वन्द्वन्क्षेत्रपालिद्वयं तत. ।
अस्त्रद्वयं वह्निजाया इन्द्राणि तदनन्तरम् ॥
प्रणवांकुशकालपश्च शाकिनी चण्ड एव च ।
योगिनी खेचरी चैव असूया फेत्कारी तथा ॥
विद्युत्कालौ रतिश्चैव मायासर्पमहारुषः ।
गारुडं च ततो वीजं चामुण्डे तदनन्तरम् ॥
ज्वलयुग्मं हिलियुग्मं किलियुग्मं ततः परम् ।
मम शत्रूस्ततश्चोक्त्वा त्रासयद्वन्द्वमेव च ॥
मारययुगलं ततो हन पच द्वयं द्वयं ।
भक्षययुगलन्ततः कालीयुग्मं ततो हरेत् ॥
मायाद्वन्द्वं क्रोधद्वन्द्वमस्त्रद्वन्द्वं द्विठस्ततः ।
चामुण्डे तारहृदये कामेश्वरि पदन्ततः ॥
कामाङ्कुशे कामप्रदायिके भगवति ततः ।
नीलपताके भगातिके पदद्वयं महेश्वरि ॥

रतिहृन्मंत्रोस्तु ते ततः परमान्ते गुहृये तदा ।
ईर्ष्यात्रयं मदने हि मदनान्तदेहे तदा ॥
त्रैलोक्यमावेशयेति च क्रोधास्त्रे वह्निवल्लभा ।
नीलपताके ततः पश्चात् कालीद्वयन्ततः प्रिये ॥
चत्वारः क्रोधास्तदनु चाङ्कुशानां त्रयन्तदा ।
रमायुग्मं त्रपायुग्मं योगिनी शा[६५ क]कि(नी?)तदा ॥
कामिनीचण्डघण्टे च शत्रून् स्तम्भय स्तम्भय ।
मारय मारय तदा क्रोधास्त्रे वह्निवल्लभा ॥
चण्डघण्टे ततः शत्रून् स्तम्भयद्वितयं हरेत् ।
मारयद्वितयं क्रोधमस्त्रस्वाहे तथोच्चरेत् ॥
चण्डघण्टे तारमायारमाक्रोधांकुशास्तथा ।
काली च कामिनी चैव मन्मथस्तदनन्तरम् ॥
ततश्च शांभवं कूटमुमाकूटं ततः परम् ।
शंभुकूटं ततः पश्चात्परापरञ्च कूटकं ॥
सर्प्पकूटं ततः पश्चात्च्चण्डेश्वरि ततः परम् ।
खेचरी योगिनी चैव शाकिनी गारुडन्तदा ॥
क्रोधद्वन्द्वमस्त्रद्वन्द्वं स्वाहा चण्डेश्वरि ततः ।
तारमैधपाशमायाक्रोधांकुशा अपि प्रिये ॥
क्षेत्रपाली च काली च गारुडं शाकिनी तथा ।
अनङ्गमाले ततः स्त्रियमाकर्षयद्वयन्ततः ॥
त्रुटयुग्मं छेदययुग्मं क्रोधयुग्मं स्मरेत्ततः ।
अस्त्रं युग्मम्वह्निजायाऽनङ्गमाले ततः परं ॥
तारवाग्भवमायाश्च रमा स्मरश्च कालिका ।
पाशाङ्कुशौ चण्डक्रोधौ महासूया च फेत्कारी ॥

शाकिनीहरसिद्धे च सर्व्वसिद्धिं कुरुद्वयम् ।
देहिद्वन्द्वं दापय च युग्मं क्रोधत्रयन्ततः ॥
अस्त्रद्वयं वह्निजायाहरसिद्धे ततः परं ।
प्रणवाङ्कुशगारुडाः फेत्कारी क्रोधमेव च ॥
योगिनी फेत्कारी सम्बुद्ध्यन्ता ततः परं ।
ददयुग्मं देहि दापय स्वाहा ततः परं ॥
फेत्कार्य्याः पूर्व्वरूपञ्च वाग्रमापाशमेव च ।
प्रासादक्रोधौ तदनुभूतं प्रेतं तथैव च ॥
शाकिनी योगिनी चैव कामिनी मानसन्तथा ।
परिभारुण्डकापाला सिद्धेस्तारन्तथैव च ॥
लवणेश्वरि तदनु हराङ्गना च योगिनी ।
क्रोधस्त्रीशाकि[६५ ख]नी चैव नाकुलि तदनुस्मरेत् ॥
तारमैथपाशक्रोधा मायारमाक्रोधस्मराः ।
कालवीजं च तदनु मृत्युहारिणि तत्परम् ॥
तारवाग्भवमायाश्च क्रोधश्च हृदयं तथा ।
भगवति रुद्रवाराहि रुद्रतुण्डप्रहारे च ॥
जयवीजयुगन्देव्याः सिद्धयुग्मं ततः परम् ।
सर्व्वोत्पातान् प्रशमय प्रशमय तथा परं ॥
हरेः पुत्रस्ततो जाया योगिनीस्त्री च शाकिनी ।
हृदयं वह्निजाया च वज्रवाराहि ततः परं ॥
तारमाये क्षेत्रपाली अंकुशं हं त्रयं तथा ।
हयग्रीवेश्वरि ततश्चतुर्व्वेदमयि तदा ॥
शाकिनी योगिनी चैव कामिनी क्रोधमेव च ।
सर्व्वविद्यानामप्यधिष्ठानं कुरुद्वयं ततः स्वाहा ॥

हयग्रीवेश्वरि ततो वेदाद्या वाग्भवस्तथा ।
पाशं माया तत्त्ववीजं एह्रीनं च द्विविन्दुकम् ।।
परमहंसेश्वरि तदा कैवल्यं साधय स्वाहा ।
परमहंसेश्वरि पुनस्तारं माया रमात्रयं ।।
स्मरयुग्मं निर्व्विकारस्थचिदानन्दघनेति च ।
रूपायै मोक्षलक्ष्म्यै च अमितानन्त इत्यपि ।।
शक्तितत्वायै तदनु स्मरयुग्मं रमात्रयम् ।
मायातारौ मोक्षलक्ष्मि तारकाल्यौ नमस्ततः ।।
ङेन्ता ब्रह्मवादिनी च काली तारन्नमस्तथा ।
वह्निजाया मायावीजं कामक्रोधौ च शाकिनी ।।
शातकर्णि महाघोररूपिणि तारमेव च ।
कमलायोगिनीरामाः फट्द्वन्द्वं वह्निसुन्दरी ।।
शातकर्णि ततस्तारे ज्वलयुग्मन्ततः परं ।
प्रज्वलद्वितयन्ततो महेश्वरि शृणुष्व मे ।।
सर्व्वमुखरूपे तदा जातवेदसि तदनन्तरम् ।
ब्रह्मास्त्रेण नाशयेति सचराचरं ततः परम् ।।
जगत्स्वाहा तदनु जातवे[६६ क]दसि ततः परं ।
तारपाशवाग्भवाश्चाङ्कुशकालीरमास्तथा ।।
कामक्रोधौ शाकिनी च महानीले ततः परं ।
प्रलयाटोपघोरेति नादघुर्घरे वदेत्ततः ।।
आत्मानमुपशमय जूंसःस्वाहा ततः परम् ।
महानीले ततस्तारं कामसिद्धस्मरास्ततः ।।
ततो नु ब्रह्मविद्ये च जगद्ग्रसनशीले तु ।
महाविद्ये ततो माया क्रोधं ह्रों च ततः परं ।।

विष्णुमाये समाभाष्य क्षोभयद्वितयं हरेत् ।
कामांकुशपाशाश्चापि निरंजनं ततः शिवे ॥
सर्व्वास्त्राणि ग्रस ग्रस हुं फट् तारं तथैव च ।
निरंजनं समाभाष्य वगलामुखि ततः परं ॥
सर्व्वशत्रून् स्तम्भय स्तम्भयेति लिखेत्परं ।
तथाब्रह्मशिरसे ब्रह्मास्त्रायेति संस्मरेत् ॥
क्रोधकामनिरंजनास्तारं हृद्वह्निसुन्दरी ।
विष्णुमाये तदनु च तारं ह्रीं शाकिनी तथा ॥
डाकिनी च रमावीजं कामक्रोधौ च योगिनी ।
कामिनी च गुह्येश्वरि महागुह्येति संवदेत् ॥
विद्यासंप्रदायबोधिके पाशाङ्कुशामृतान्यपि ।
अस्त्रं कृष्णलोहिततनूदरि प्रासादमेव च ॥
अध्मा चैव मनोस्त्रं च हृदयं द्विठमेव च ।
गुह्येश्वरि ततश्चैव तारं हृदयमेव च ॥
श्वेतपुण्डरीकासेनायै प्रतिसमरेति च ।
विजयप्रदायै भगवत्यै अपराजितायै ततः पपम् ॥
हरपत्नी हरिपत्नी हरिपुत्रस्ततः परम् ।
फट्कारञ्च वह्निनारी प्रणवञ्चापराजिते ॥
सम्बोध्यन्ते च प्रणवं माया हं वीजमुत्तमम् ।
अध्वा चैव महाविद्ये मोहय विश्वकर्म्मकम् ॥
वाग्रमाकामवीजञ्च त्रैलोक्यमावेशयेति च ।
क्रोधमस्त्रद्वयञ्चोक्त्वा महाविद्ये [६६ ख] ततः परं ॥
वाग्भवः प्रेतवीजं च डाकिनी तदनन्तरं ।
मनःकूटं समाभाष्य एह्येहि भगवति ततः ॥

वाभ्रवि तदनुस्मृत्य महाप्रलय चेत्यपि ।
ताण्डवकारिणि तदा गगनग्रासिनि ततः ।।
रमाक्रोधौ योगिनी च कामिनी शाकिनी तथा ।
शत्रून् हन हन चेति सर्व्वैश्वर्य्यं ददः द्वयं ।।
महोत्पातान् विध्वंसय विध्वंसयेति चाहरन् ।
सर्व्वरोगान्नाशय नाशयेति ततः परं ।।
वेदमस्तककमलाकामप्रासादपाशकाः ।
महाकृत्याभिचारग्रहदोषान्निवारय ।।
निवारय मथ द्वन्द्वमंकुशं कालमेव च ।
अमृतं प्रलयञ्चैव फेत्कारी तदनन्तरं ।।
वह्निचङ्गना वाभ्रवि च तारमायारमास्तथा ।
क्रोधं भगवति ततो महाडामरि तत्परं ।।
डमरुहस्ते तदनु नीलपीतमुखि ततः ।
जीवद्ब्रह्मगलनिष्पेपिणि ततो हरेत्सुधीः ।।
योगिनी कामिनी चैव शाकिनी डाकिनी तथा ।
महाश्मशानरङ्गचर्च्चरीगायिके ततः ।।
तुरुयुग्मं मर्द्दयुग्मं मर्दययुगमेव च ।
फेत्कारी वह्निजाया च डामरि तदनु स्मरेत् ।।
तारमाया शाकिनी च वेतालमुखि तत्परम् ।
चर्च्चिके तदनु क्रोधं योगिनी कामिनी तथा ।।
ज्वालामालि ततः पश्चाद्विस्फुलिङ्गरमणि हि ।
महाकापालिनि तदा कात्यायनि ततः परं ।।
रमास्मरौ डाकिनी च कहयुग्मं धमद्वयम् ।
ग्रसद्वंद्वं ततः पाशाङ्कुशौ प्रासादमेव च ।।

नरमांसरुधिरपरिपूरितकपाले च ।
पीयूषघनशक्तीनां क्रमेण वीजमाहरेत् ॥
असूयात्रितयं चाऽ[६७ क]स्त्रद्वयं चानलभाविनी ।
चर्च्चिके तदनु मायाद्वयं महामंगले ततः ॥
महामंगलदायिनि अभये भयहारिणि ।
वह्निस्त्री च ततः पश्चादभये तदनन्तरं ॥
तारवाग्भवचामुण्डाः प्रासादं प्रेतमेव च ।
उत्तानपादे तदनु एकवीरे ततः परं ॥
हसयुग्मं गाययुग्मं नृत्ययुगलमेव च ।
रक्षद्वयं महाक्रोधचण्डकालास्तथैव च ॥
सर्प्पवीजं रतिवीजं पाशघण्टामुण्डेत्यपि ।
खट्वांगधारिणि ततोऽस्त्रद्वयं हृदयं द्विठः ॥
एकवीरे ततः पश्चात्तारत्रपाक्रोधास्तथा ।
वाणीरमामारपाशाङ्कुशप्रासादास्तदनन्तरं ॥
भगवति महाघोरकरालिनि ततः परं ।
तामसि महाप्रलयताण्डविनि ततः परं ॥
चर्च्चरीकरतालिके ततो जयद्वयं स्मरेत् ।
जननि तदनु स्मृत्वा जम्भजम्भ ततः परं ॥
महाकालि तदनु च कालनाशिनि ततः परं ।
भ्रामरि भ्रामरि ततो डमरुभ्रामिणि तथा ॥
मैधस्मरौ तथा भूतं योगिनी कामिनी ततः ।
शाकिनो डाकिनो चैव प्रलयः फेत्कारी तथा ॥
ततोऽस्त्रं हृदयञ्चैव वैश्वानराङ्गना ततः ।
तामसि तदनु स्मृत्वा तारवाण्यौ ततः परं ॥

समरविजयेत्युक्त्वा दायिनि तदनन्तरम् ।
मत्तमातङ्गेति ततो यायिनि तदनन्तरं ॥
रमाबीजं पाशबीजं हरपत्नी ततः परं ।
भगवति ततः पश्चाज्जयन्ति तदनन्तरं ॥
समरे जयं तदनु देहि देहि ततः परं ।
मम शत्रून्विध्वंसय विध्वंसयेति तत्परं ॥
विद्रावययुगं तदा भंजद्वयं तथापरं ।
मर्द्दययुगलं ततस्तुरुयुग्मं [६७ ख] तथा वदेत् ॥
हर्य्यङ्गनाहरिसुतौ कामिनी तदनन्तरं ।
हृदयं वह्निजाया च जयन्ति तदनन्तरं ॥
ताररमापाशाङ्कुशस्मरक्रोधास्ततः परं ।
धनदा च समाधिश्च एकानंशे ततः परं ॥
डमरु डामरि नीलाम्बरे नीलविभूषणे ।
नीलनागासने ततः सकलसुरासुरानिति ॥
वशेकुरु कुरु तदा जन्यिके कन्यिके ततः ।
सिद्धिदे वृद्धिदे ततो योगिनी कामिनी तथा ॥
क्रोधस्मरौ शाकिनी च प्रासादं फट्कारस्ततः ।
वह्निजाया ततः पश्चादेकानंशे ततः परं ॥
वाग्भवं ब्रह्मवादिन्यै ब्रह्मरूपिण्यै द्विठस्तथा ।
तदन्ते ब्रह्मरूपिणि तारत्रपारमास्मराः ॥
असूया भगवति तथा नीललोहितेश्वरि ततः ।
त्रिभुवनं रंजय रंजय सकलेति च ॥
सुरासुरानाकर्षयाकर्षय हृदयन्तदा ।
वह्निजाया नीललोहितेश्वरि ततः परम् ॥

वाणी तस्याः सपत्नी च त्रिकालवेदिन्यै ततः ।
वह्निजाया तदन्ते च त्रिकालवेदिनि ततः ॥
वेदशिरश्च कमला भुवनेशी स्मरस्तथा ।
कामिनी शाकिनी चैव क्रोधमस्त्रन्ततः परं ॥
ब्रह्मवेतालराक्षसि काली महासूया तथा ।
चण्डो विष्णुशवावतंसिके ततः परं ॥
योगिनी प्रेतवीजञ्च पीयूषन्तदनन्तरं ।
महारुद्रकुणपारूढ़े मैधपाशौ ततः शृणु ॥
प्रासादमस्त्रत्रितयं हृदयं वह्निवल्लभा ।
कोरंगि तारवाण्यौच रमा ह्लो स्मर एव च ॥
प्रासादक्रोधपाशाश्च योगिनी कामिनी ततः ।
क्रोधश्च शाकिनी चैव काली मेघस्तथापरं ॥
वह्निजाया रक्तदन्ति हरपत्नी स्मरस्तथा ।
असू[६८ क]या शाकिनी चैव डाकिनी प्रलयस्तथा ॥
फेत्कारी कर्णिका चैव हारः सानुस्तथैव च ।
इष्टिरस्त्रं वह्निजाया भूतभैरवि ततः परम् ॥
वाणी रमा पाशकला हृदयन्तदनन्तरम् ।
ततः पश्चात् षडाम्नायं परिपालिन्यै ततो वदेत् ॥
शोषिण्यै द्राविण्यै ततो नामक्यै भ्रामक्यै ततः ।
जूं वीजं ब्लुं वीजं चैवमादित्यमोकारयुक्तकः ॥
कुलकोटिन्यै ततः काकासनायै शाकिनी ततः ।
अस्त्रं द्विठः कुलकुट्टिनि ततस्तारं स्मरस्तथा ॥
पीयूषं भुवनेशी च कामिनी क्रोध एव च ।
शाकिनी योगिनी चैव ततश्चण्डं शृणु प्रिये ॥

कामाख्यायै फट्कारं च शिरः कामाख्ये ततः परम् ।
मैधपाशौ प्रासादश्च प्रेताङ्कुशकाला अपि ॥
चतुरशीतिकोटिमूर्त्तये तदनन्तरम् ।
विश्वरूपायै ब्रह्माण्डजठरायै तारन्ततः ॥
स्वाहाविश्वरूपे पाशकले वामकर्णस्ततः परं ।
ऐं औं क्षेमंकर्य्यै ततो द्विठः क्षेमंकरि ततः ॥
वाण्यागमशिरोमायाकन्दर्पस्तदनन्तरं ।
निगमागमबोधिते सद्योधनपदन्ततः ॥
भगवति कुलेश्वरि ततः क्रोधास्त्रद्विठकाः ।
कुलेश्वरि वाग्भवश्च कामवीजं ततः परं ॥
ततो जगदुन्मादिन्यै ङेन्ताकामांकुशास्ततः ।
विश्वविद्राविणी ङेन्ता स्त्रीपुरुषमोहिनी च ॥
चतुर्थ्यन्तां समाभाष्य मायाक्रोधावलास्तथा ।
वह्निस्त्रो च ततः पश्चात्कामांकुशे पदन्ततः ॥
तारञ्च हृदयञ्चैव सर्व्वधर्मध्वजान्ततः ।
ङेन्तामुच्चार्य्य ततः सकलसमयाचारेत्यपि ॥
बोधितायै ततः क्रोधमावेशिन्यै [६८ ख] ततः परं ।
अस्त्रस्वाहे ततः पश्चादावेशिनि पदं ततः ॥
तारत्रपारमाकामयोगिनीकामिनी तथा ।
डाकिनी क्रोधमस्त्रञ्च करालिनि पदन्ततः ॥
मायूरिशिखिपिच्छिकाहस्ते सद्यो धनं पदं ।
खेचरी मेघनाङ्गना अक्षकर्णि पदन्ततः ॥
जालंधरि पदमाभाष्य मा मां द्विपन्तु शत्रवः ।
नन्दयन्तु भूपतयो भयं मोचय ततः परं ॥

क्रोधास्त्रे वह्निजाया च मायूरिपदमेव च ।
तारमैधामृताङ्कुशा इन्द्राक्षि तदनन्तरं ॥
क्रोधास्त्रत्रयमाभाष्य वह्निजाया ततः परं ।
इन्द्राक्षिपदमाभाष्य काल्यंकुशौ ततः परं ॥
हयग्रीवस्ततः सिद्धो मायाचण्डस्ततः घोणकि ।
घोणकमुखि तुभ्यं नमः स्वाहा ततः ॥
घोणकिवाक्त्रपापदमाक्रोधकामाश्च शाकिनी ।
योगिनी शाकिनी चैव फेत्कारी तदनन्तरं ॥
भीमादेवि भीमनादे भीमकरालि ततः परं ।
महाप्रलयचण्डलक्ष्मीः सिद्धेश्वरि ततः परं ॥
जोवहीनं पराकूटं वृहत्कूटमतः परं ।
राथन्तरं ततः कूटं महाघोरेति संवदेत् ॥
घोरतरे भगवति भयहारिणि तत्परं ।
मां द्विषतो विभाष्यैव निर्म्मूलययुगं वदेत् ॥
विद्रावययुगं चोक्त्वा उत्सादययुगं ततः ।
ततो महाराज्यलक्ष्मीं वितरयद्वयं हरेत् ॥
देहियुग्मं दापययुगं डाकिनी प्रलयस्तथा ।
अमृतप्रेतप्रासादा··············ततः परं ॥
क्रोधक्षेत्रपदस्त्राश्च प्रासादस्तत एव च ।
जययुग्मं राक्षसक्षयकारिणि वदेत्ततः ॥
तारत्रपाक्रोधास्तदा त्रिटा[६६ क]न्तं त्र्यस्त्रमेव च ।
हृच्छिरसी तदनु भीमादेवी तथापरम् ॥
तारवाणीरमामायाक्रोधशाकिन्य एव च ।
डाकिनी प्रलयश्चैव फेत्कारी फेंकारं तथा ॥

प्रविश संसारं तदनु महामाये ततः परं ।
फें फडिति समाभाष्य ब्रह्मशिरोनिकृन्तिनि ॥
विष्णुतनुनिर्द्दलिनि जे जंभिके ततः परं ।
स्तें स्तम्भिके छिन्दियुगं भिन्दि दह युगं युगं ॥
मथयुग्मं पचयुग्मं पञ्चशवारूढ़े ततः ।
पंचागमप्रिये ततोऽमृतं दस्रञ्च खेचरी ॥
रमा कामस्तथा संविः पञ्चपाशुपतेत्यपि ।
अस्त्रधारिणि संप्रोच्य क्रोधत्रितयमेव च ॥
अस्त्रद्वयं वह्निजाया ब्रह्मनिकृन्तनि ततः ।
वाक्यांशवेदशिरसस्ततो हृदयमेव च ॥
परशिवविपरीताचारकारिणि ततः परम् ।
ह्रीरमाकामयोगिनीकामिन्यस्तत एव हि ॥
महाघोरविकरालिनि खण्डार्द्धशिरोधारिणि ।
ततोऽपि भगवत्युग्रे शाकिनी डाकिनी तदा ॥
प्रलयफेत्कार्यौ च कूटं प्राभातिकं ततः ।
वाराहिकं ततः कूटं क्रोधास्त्रे वह्निवल्लभा ॥
भुवनेशी ततः क्रोधमर्द्धमस्तके ततः परं ।
काली क्रोधञ्च तारञ्च क्रोधं च शाकिनी कामिनी तदा ॥
चण्डवीजन्ततश्चण्डखेचरि ज्वलयुग्मकं ।
प्रज्वलद्वितयञ्चैव निम्मांसदेहे नमः ॥
द्विठञ्चण्डखेचरि हि वेदादिर्न्नम एव च ।
प्रचण्डघोरदावानलबासिन्यै ततः परम् ॥
ह्रीं ह्रं समयविद्या कुलतत्त्वधारिणी च ।
ङेन्ता ज्ञेया ततः पश्चान्महामांसरुधिरप्रिया ॥

चतुर्थ्यन्ता समाज्ञेया यो[६६ ख]गिनी वीजमेव च ।
कामिनी कामवीजं च धूमावत्यै ततः परं ॥
सर्व्वज्ञाता सिद्धिदायै शाकिन्यस्त्रं शिरस्तथा ।
ततो धूमावति पश्चाद्वाक्त्रपा पाशमेव च ॥
ह्रां सौः क्लीं महाभोगिराजभूषणे ततः परं ।
सृष्टिस्थितिप्रलयकारिणि तदनन्तरम् ॥
हुं हुंकारनादभूरिदारिणि भगवति ततः ।
हाटकेश्वरि ततः पश्चादमृतं तदनन्तरं ॥
दस्त्रानन्दौ रौद्रवीजं रमावाग्भवचण्डकाः ।
शाकिनी डाकिनी चैव मम शत्रूनिति स्मरेत् ॥
मारय बंधय द्वौ द्वौ मर्द्दययुगलन्तथा ।
पातययुगलं चैव ततः पश्चान्महेश्वरि ॥
धनधान्यायुरारोग्यैश्वर्य्यन्ततो देहिद्वयं ।
दापययुगलं चैव मानसं तदनन्तरं ॥
परिकापालभारुण्डाः प्रासादं वीजमेव च ।
पाशमङ्कुशवाण्यौ च तारं हृद्वह्निवल्लभा ॥
हाटकेश्वरि तदनु वेदादिः पाशमेव च ।
वाणीह्रीकमलाश्चैव शक्ति सौपर्णि तत्परं ॥
कमलासने समुच्चार्य्य उच्चाटयद्वयं ततः ।
विद्वेषयद्वयञ्चैव क्रोधास्त्रे वह्निसुन्दरी ॥
शक्ति सौपर्णि तदनु तारवाण्यौ त्रपा ततः ।
कमलाकामरुषश्चैव योगिना कामिनी ततः ॥
शाकिनी डाकिनी चैव प्रलयः फेत्कारी तथा ।
मणिमेखला तदनु हारसानू ततः परं ॥

भगवति महामारि जगदुन्मूलिनि ततः ।
कल्पान्तकारिणि तदा शिरोनिविष्टवामचरणे ।।
दिगम्बरि ततः पश्चात् समयेति ततः परं ।
ततः कुलचक्रचूडालये मां रक्ष रक्षेति ।।
त्राहियुग्मं पालय[१०० क]युगं प्रज्वलदावानलेत्यपि ।
ज्वालाजटालजटिले ततो हृंत्रयमाहरेत् ।।
हृदयं वह्निजाया च महामारि ततः परं ।
वेदादिश्च वाणी चैव रक्ताम्बरे तदनन्तरं ।।
रक्तस्रगनुलेपने महामांसरक्तप्रिये ।
महाकान्तारे तदनु मां त्राहिद्वन्द्वं ततः परम् ।।
रमाकामत्रपाक्रोधशाकिन्योऽस्त्रं शिरस्तथा ।
मङ्गलचण्डि तदनु मायास्त्रं हृदयन्तथा ।।
चण्डोग्रकालिनि ततः परमशिवशक्ति हि ।
सामरस्य ततः पश्चान्निर्वाणदायिनि ततः ।।
नरकङ्कालधारिणि ब्रह्मविष्णुकुणपवाहिनि ।
वाणी वेदशिरश्चैव शाकिनी तदनन्तरं ।।
ततः प्रत्यक्षं परोक्षं मां द्विषंति ये तानपि ।
हनयुग्मं नाशययुग्मं कुष्माण्डडाकिनो तदा ।।
स्कन्दवेतालभयं नुदयुग्मन्ततः परं ।
कोकामुखि च तदनु स्वाहा तारं त्रपा ततः ।।
मदनः शाकिनी चैव क्रोधं तारं त्रपा ततः ।
क्रोधवीजन्ततः पश्चात् श्मशानेति वदेत्सुधीः ।।
शिखाचारिण्यै भगवत्यै ज्वालाकाल्यै ततः परं ।
योगिनी कामिनी चैव शाकिनी कालिकापि च ।।

चण्डास्त्रहृत्शिरसो ज्वालाकालि तथापरं ।
वाणी च कमलाकामपाशांकुशाश्च कालिका ॥
अतिचण्डं योगिनी च कामिनी तदनन्तरं ।
ततो घोरनादकालि सिद्धिं मे देहि तत्परं ॥
सर्व्वम्विघ्नमुपशमय सिद्धिकरालि तथापरं ।
ततः सिद्धिविकरालि क्रोधयुगं वदेत्ततः ॥
फट्स्वाहाघोरनादकालिपदं माया ततः ।
क्रोधं च शाकिनी चैव डाकिनी योगिनी तथा ॥
उ[१०० ख]ग्रकाल्यै खेचरीसिद्धिदायिन्यै ततः परं ।
परापरकुलचक्रनायिकायै वदेत्ततः ॥
अमृतं गारुडं चैव कामिनीक्षेत्रपालिनौ ।
कन्दर्पस्त्रिशूलॐकारिण्यै नमः स्वाहा ततः ॥
उग्रकालि ततः पश्चात्प्रासादं प्रेतमेव च ।
आदित्यौकारयुक्तश्च काली माया ततः परम् ॥
शाकिनीचण्डरुपश्चैव चास्त्रं वेतालकालि हि ।
कमला भुवनेशी च वाणीमन्मथकालिकाः ॥
भगवति संहारकालि ब्रह्माण्डञ्च पिषद्वयम् ।
चूर्णययुगलं मां रक्षद्वयं ततः परम् ॥
कालघनरुपश्चैव क्रोधास्त्रद्वितयं पुनः ।
हृदयं वह्निजाया च संहारकालि तत्परं ॥
तारवाग्भवमायाश्च रमा मीनध्वजस्ततः ।
महाघोरविकटरुपायै तदनन्तरम् ॥
ज्वलदनलवदनायै सर्व्वज्ञतासिद्धिदायै ।
कालीशाकिनीक्रोधाश्च हृदस्त्रं वह्निसुन्दरी ॥

रौद्रकालि ततः पश्चात् शाकिनीबोजमुत्तमं ।
चण्डाट्टहासिनि ततो डाकिनी तदनन्तरं ।।
ब्रह्माण्डमर्द्दिनि ततः प्रलयश्च ततः परं ।
ब्रह्मविष्णुशिवभक्षिणि तत्परं स्मृतं ।।
फेत्कारी मृत्युमृत्युदायिनि तत्परम् ।
नक्षत्रकूटं तदनु भक्तसिद्धिविधायिनि ।।
सम्बुद्धिपदमुच्चार्य्य कूटम्वाराहिकं ततः ।
भगवति कृतान्तकालि तदनु क्रोधमस्त्रकं ।।
कुण्डलाख्यन्ततः कूटं हृदस्त्रवह्निवल्लभाः ।
कृतान्तकालि तदनु तारवाणीरमास्मराः ।।
शाकिनी कालिका चैव योगिनी कामिनी तथा ।
क्रोधं भीमकालि च कालीद्वयन्ततः परं ।।
महाक्रोधं गारुडं च पन्नगस्तदनन्तरम् ।
[१०१ क] प्रेतशिवपर्य्यंकशायिनि पदमेव च ।।
महाभैरवविनादिनि पदमेतत्ततः परं ।
पशुपाशं मोचय मोचयेति वदेत्सुधीः ।।
कामिनी शाकिनी चैव खेचरी चण्ड एव च ।
चण्डकालि क्रोधबीजं फट्द्वयं तदनन्तरं ।।
चण्डकालिपदञ्चैव औकारस्थो दिवाकरः ।
दस्रश्च ब्रह्मभारुण्डौ कलाबीजमतः परं ।।
धनकालि धनप्रदे धनं मे देहि दापय ।
कालिकाशाकिनीक्रोधास्ततोविपधरेत्यपि ।।
वज्रिणि कामबीजञ्च रमाहृद्वह्निवल्लभाः ।
धनकालि ततः पश्चात्तारभूतौ ततः परं ।।

सुदीर्घकूटन्तदनु मेघो विद्युत्ततः परम् ।
घोरकालि ततः पश्चाद्विश्वं वशीकुरु ततः ॥
पुनर्व्वशीकुरु सर्व्वकार्य्यं साधय द्वयमेव च ।
करालि विकरालि वै योगिनीस्त्री च शाकिनी ॥
प्रेतारूढ़े प्रेतावतंसे त्रपारमास्मरस्तथा ।
राजानन्तदनुस्मृत्य मोहययुगलन्ततः ॥
क्रोधास्त्रहृदयाश्चैव घोरकालि ततः परम् ।
वाणी त्रपा रमा कामा योगिनी कामिनी तथा ॥
शाकिनीकालिकास्त्रे च द्विठः संत्रासकालि वै ।
कालीयुग्मं मायायुग्मं क्रोधयुग्मं ततः परं ॥
लेलिहानरसनाकराले तदनन्तरं ।
रेरूयमानसजीवशिवानक्षत्रमाले च ॥
योगिनीस्त्री शाकिनी च प्रेतकालि ततः परं ।
भगवति भयानके मम भयन्ततः परं ॥
अपनय ततः स्वाहा प्रेतकालि ततः परम् ।
तारवाणीत्रपाक्रोधा रतिरानन्द एव च ॥
खेचरी च गौरी चैव शाकि[१०१ ख]नी प्रलयकालि वै ।
प्रलयकारिणि ततो नवकोटि ततः परं ॥
कुलाकुलचक्रेश्वरि दानवःकूर्म्म एव च ।
क्लूंकारं म्लैंकारञ्चैव द्रावणञ्च ततः परम् ॥
परमशिवतत्वसमयप्रकाशिनि च ।
विन्दुद्वयान्वितम्वीजं जयाख्यं तदनन्तरम् ॥
अस्त्रस्वाहा तदनु प्रलयकालि तथा परं ।
पाशकालीकामरमावाग्भवाश्च ततः स्मृताः ॥

विभूतिकालि तदनु सम्पदं मे पुनस्तथा ।
वितरद्वयं सौम्या भव वृद्धिदा ॥
भवसिद्धिदा भवेति च जयद्वयं तथापरम् ।
जीवद्वंद्वं च अंवीजं कापालदक्षनेत्रकौ ॥
मानसं चैव स्थाणुञ्च पविरेंकारमेव च ।
भारुण्डं ठद्वयं चैव फट्कारत्रयमेव च ॥
हृदयं वह्निजाया च तारत्रयमतः परं ।
विभूतिकालि तदनु तारांकुशत्रपास्ततः ॥
स्मरश्च योगिनी चेव शाकिनीस्त्रीरमास्तथा ।
वाग्भवं जयकालि वै परमचण्डे ततः परं ॥
महासूक्ष्मविद्यासमयप्रकाशिनि तथा परं ।
क्ष्रौंकारं प्लुंकारञ्चैव व्फ्लुंकारं तदनंतरं ॥
हृद्वह्निपत्नी तदनु जय कालि ततः परम् ।
वाग्भवं कमला चैव वेदमस्तकमेव च ॥
गुरुभिरन्वितं वीजं फ्रंकारं सप्त चोद्धरेत् ।
भोगकालि ततः पश्चात् फेत्कारी तदनन्तरं ॥
त्रेतावीजं फट्त्रयं च स्वाहा भोगकालि ततः ।
क्रोधञ्च हृदयञ्चैव कल्पान्तकालि तत्परम् ॥
भगवति भीमरावे कान्तं पान्तस्थमेव च ।
रेफसंस्थं चान्तवर्णं वामकर्णं त्रिभूषितम् ॥
तदन्ते विनियोज्यैवं नादविंदुसमन्वितम् ।
इ[१०२ क]न्द्रारूढ़ो मकारादिवामनेत्रविभूषितम् ॥
नादविन्दुसमायुक्तं द्वितीयं वीजमुद्धरेत् ।
पपंचमो वह्निसंस्थो वामनेत्रेण भूषितः ॥

सनादं तार्त्तीयवीजं मेघमाले ततः परं ।
महामारीश्वरि ततो विद्युत्कटाक्षे ततः परम् ॥
अरूपे बहुरूपे च विरूपे च ततः परम् ।
ज्वलितमुखि तदनु चण्डेश्वरि तथापरं ॥
सानुः द्रावणः स्वाहा च कल्पान्तकालि तत्परम् ।
तारञ्च योगिनी चैव क्ष्वेडं वामाक्षिसंयुतं ॥
कला व्लंकारञ्च डामरमुखि तत्परं ।
वज्रशरीरे तदनु क्रोधवीजं ततः परं ॥
सन्तानकालि तदनु फट्कारं द्विठमेव च ।
पुनर्म्मन्थानकालि च तारवीजं त्रपा ततः ॥
क्रोधवीजं धर्म्मकूटं कूटं कुन्दाख्यमेव च ।
ततो वैहायसीकूटं वायवीयकूटं ततः ॥
भारुण्डाख्यं ततः कूटं दुर्ज्जयकालि तत्परम् ।
हट्टायुधधारिणि वज्रशरीरे ततः परम् ॥
इष्टिवीजं सानुवीजं भारुण्डस्थो नलस्तदा ।
कालविध्वंसिनि ततः कुलचक्रराजेश्वरि ॥
सर्व्वैश्च गुरुभिर्य्युक्तं स्त्रीवीजं नव चोद्धरेत् ।
फट्द्वयं वह्निजाया च दुर्ज्जयकालि तत्परम् ॥
वाणीपाशकलावामकर्णमायारमास्मराः ।
क्रोधं घोराचाररौद्रे महाघोरवाडवेति ॥
सन्धिङ्कृत्वा ततोऽग्निञ्च ग्रसद्वयमतः परम् ।
महावले महाचण्डयोगेश्वरि नमो द्विठः ॥
कालकालि ततो वाणी चामुण्डा तदनन्तरम् ।
ततः पश्चाद्विरिञ्चिश्च महारुद्रान्तमस्तकः ॥

ततः पयोवीजं वज्रकालि महावले ।
धृतवीजन्त[१०२ ख]तः पश्चान्नारसिंहन्ततः परं ॥
पद्यो महाप्रपञ्चरूपे रौषिकानलमित्यपि ।
पतयुग्मं फेरुमुखि ततः पश्चाच्छृणुष्व मे ॥
योगिनी डाकिनी खेचरी भूचरी सुरूपिणी ।
तदनु चक्रसुन्दरि महाकालि तथापरं ॥
कापालि तदनुस्मृत्य च मध्यं वह्निवीजकं ।
कलाविंदुयुतं स्मृत्वा तान्तस्य च तथैव च ॥
मणिमेखला तदनु कहद्वयं(त)ततः परम् ।
त्वां प्रपद्ये तुभ्यन्नमः स्वाहा वज्रकालि ततः ॥
तारमेधत्रपालक्ष्मीस्मरास्तथा श्रृणुष्व मे ।
ततः सिद्धियोनि महाराविणि तदनन्तरं ॥
ततः परमगुह्यातिगुह्यमङ्गले ततः परं ।
विद्याकालि ततस्त्वष्टा लाङ्कुलं काकिनी ततः ॥
उदुम्बरसुदशनौ चान्तस्थः कान्त एव च ।
नदवामकर्णयुक्तं रान्तस्थः काल एव च ॥
असुरो योगिनी चैव धीवरी च स्वरूपिणी ।
तथैव शवरी पीवरी च तथा श्रृणु ॥
चर्च्चिके भक्षिके तदनु रक्षिके तदनन्तरम् ।
हर्षवीजं ततः पश्चादहर्षन्तदनन्तरम् ॥
ठत्रयं फट्त्रयञ्चैव नमः स्वाहा ततः परम् ।
विद्याकालि ततः पश्चात्तारपाशकलास्तथा ॥
वाणी भारुण्डकापाला ग्रीं स्रूं श्रैं म्लौं तथा ।
कान्तचान्तचकारान्ता वह्न्यारूढाश्च पार्व्वति ॥

षष्ठस्वरसमायुक्ता नादविंदुविभूषिता ।
ममध्यं रेफवीजन्तु कलावीजसमन्वितं ॥
चतुर्दशस्वरोपेतं यान्तं विंदुविभूषितं ।
मौं वीजं तदनुस्मृत्य स्वाहाशक्तिकालि ततः ॥
तारं च फेत्कारीकूटं हृदयन्तदनन्तरम् ।
चण्डातिच[१०३ क]ण्डे तदनु मायाकालि ततः परं ॥
कालवंचनि तदनु महांकुशे ततः परं ।
नन्दनाख्यं ततः कूटं पातालनाग चेत्यपि ॥
वाहिनि गगनग्रासिनि ब्रह्माण्डनिष्पेषिणि ततः ।
हुं त्रयञ्च मनस्त्रयं क्रोधत्रयं ततः परं ॥
तारं माया क्रोधं चैव चामुण्डा डाकिनी ततः ।
महाचण्डवज्रिणि च भ्रमरि भ्रामरि ततः ॥
महाशक्ति ततश्चक्रकर्त्तरी तदनन्तरम् ।
कुलार्णवचारिणी च फिंकारं फांकारं ततः ॥
फें फूं फौं समयेति विद्यागोपिनि तत्परं ।
किरिटी ताण्डवी हंसी कूटत्रयमतः परम् ॥
महाकालि ततः पश्चात्-समयलाभन्ततः परं ।
कुरुद्वन्द्वं ततो विद्यां प्रकाशयद्वयन्ततः ॥
सिद्धो माया चण्डवीजं धर्म्मवीजं तथा परं ।
ह्लौं वीजं च जयोवीजं गौरीवीजं तथैव च ॥
अस्त्रञ्च वह्निपत्नी च महाकालि ततः परं ।
वाग्भवश्च ततः पश्चात्परापरेति संवदेत् ॥
रहस्यसाधिके ततः कुलकालि ततः परम् ।
शाकिनी योगिनी चैव कामिनी ह्लीरुषस्तथा ॥

स्मरामृतं लाङ्गुलञ्च मस्थः क्षेत्रपाली ततः ।
विंदुद्वयेन संयुज्य त्र्यस्त्रं तत्र चाहरेत् ॥
कुलकालि ततः पश्चात्तारमायास्मरास्तथा ।
क्रोधश्च शाकिनी चैव परापरपरमेत्यपि ॥
रहस्यकाली कुलक्रमपरम्पराप्रचारिणि ततः ।
भगवति नादकालि करालरूपिणि ततः ॥
मनःकूटं शाकिनी च डाकिनी प्रलयस्तथा ।
फेत्कारीवीजन्तदनु मम शत्रूनिति वदेत् ॥
मर्द्दययुगलञ्चैव चूर्णययुग्ममेव च ।
पातयद्व[१०३ ख]न्द्वं नाशययुगं भक्षयद्वितयं तथा ॥
खेचराख्यं महाकूटं पावित्राख्यं ततः परं ।
कूटं गजघटाख्यं हि श्रृंखलाकूटमेव च ॥
दण्डाख्यकूटं तदनु नवकोटि ततः परं ।
कुलाकुलचक्रेश्वरि ततः पश्चाद्वदेत्सुधीः ॥
सकलगुह्यानन्ततत्वधारिणि तदनन्तरं ।
कूँ चूँ टूँ तूँ पूँ मां कृपय द्वितयं तथा ॥
त्रपा क्रोधं शाकिनी च योगिनी कामिनी तथा ।
अस्त्रं च वह्निपत्नी च नादकालि ततः परम् ॥
तारं च शाकिनी चैव चतुरशीति तत्परं ।
कोटिब्रह्माण्ड तदनु सृष्टिकारिणि तत्परं ॥
प्रज्वलज्वलनलोचने वज्रसमदंष्ट्रायुधे ।
दुर्न्निरीक्षाकारे तदनु भगवति ततः परं ॥
मुण्डकालि ततः पश्चात् कहद्वन्द्वं तुरुद्वयं ।
दमयुग्मं चटयुग्मं प्रचटयुगलन्ततः ॥

हरिहराख्यं तत्कूटं कूटं कूटाख्यमेव च ।
पत्रकूटं ततः पश्चात्सर्व्वसिद्धिं देहि द्वयं ।।
सर्व्वैश्वर्य्यं तदनु दापययुगलन्ततः ।
विद्युदुज्ज्वलजटे वै विकटसटे च ततः ।।
महाविकटकटे च त्रपाकामक्रोधास्तथा ।
योगिनी कामिनी चैव शाकिनी हृदयं द्विठः ।।
मुण्डकालि ततः पश्चात्तारं वाग्भव एव च ।
पाशरमाकामत्रपामहाक्रोधास्ततः परं ।।
ततो दस्रस्तथा स्हृफ्यूं चञ्चौंकारं क्वींकारं तथा ।
धूमकालि ततः पश्चात्सर्व्वमेवेति तत्परं ।।
मे वशञ्च कुरुद्वन्द्वं पाहियुग्ममतः परं ।
जम्मिके करालिके ततः पूतिके घोणिके ततः ।।
खंत्रयमस्त्रहृदये धूमकालि ततः परं ।
वाण्यङ्कुशौ शाकिनी च योगि[१०४ क]नी काम एव च ।।
आज्ञाकालि ततः पश्चान्ममाज्ञां राजान इत्यपि ।
ततः शिरसा धारयन्तु क्रोधमस्त्रशिरस्तथा ।।
ततः परमाज्ञाकालि तारत्रपे तथैव च ।
चण्डवीजं ड्रींकारं च ड्रैंकारं तिग्मकालि च ।।
तिग्मरूपे तिग्मातितिग्मे भ्रमं मोचयेत्यपि ।
स्वं प्रकाशय स्वाहा तिग्मकालि ततः परम् ।।
तारं वाणी त्रपाचैव योगिनी कामिनी तथा ।
शाकिनी कमला कामक्रोधस्तथामहाकालि ।।
लेलिहानरसनाभयानके ततः परम् ।
घोरतरदशनचर्व्वितब्रह्माण्डे ततः ।।

चण्डयोगेश्वरीशक्तितत्वसहिते ततः ।
गाँ जाँ डाँ दाँ राँ प्रचण्डचण्डिनि सद्यो धनं ततः ॥
महामारी सहायिनि भगवति भयानके ।
चामुण्डा योगिनी ततो डाकिनी शाकिनी तथा ॥
भैरवीमातृगणमध्यगे तदनन्तरम् ।
जयद्वन्द्वं कहयुग्मं हसद्वयं ततः परम् ॥
प्रहसयुगलं जम्भयुग्मं तुरुयुगं तथा ।
धावश्मद्वयं शानवासिनि तदनन्तरम् ॥
शववाहिनि नरमांसभोजिनि ततः परम् ।
कङ्कालमालिनि ततः फेंकारत्रयमेव च ॥
तुभ्यं नमो नमः स्वाहा महारात्रिकालि ततः ।
फेत्कारी च भगवति संग्रामकालि तत्परम् ॥
संग्रामे जयमेवोक्त्वा देहियुग्मं वदेत्ततः ।
मां द्विषतो मम वशे कुरुद्वयं स्मरेत्सुधीः ॥
पाँ पीँ पूँ पैँ पौँ ततश्च ज्वलद्वयं ततः परं ।
प्रज्वलद्वितयं चैव विद्युत्केशि ततः परम् ॥
पातालनयनि तदा ब्रह्माण्डोदरि तत्परम् ।
महोत्पातं प्रशमययुगं मायाक्रोधौ ततः ॥
योगि[१०४ ख]नी कामिनी चैव शाकिनी हृदयं द्विठः ।
संग्रामकालि तदनु वाग्भवः शाकिनी तथा ॥
योगिनी क्रोधः क्षेत्रपालीवीजं ततः परं ।
नक्षत्रनरमुण्डेतिमालालंकृतायै तदा ॥
चतुर्द्दशभुवनसेवितपादपद्मा ङेन्ता ।
भगवत्यै शवकालिकायै ततः परं शृणु ॥

यकारादिक्षकारान्ता वामकर्णविभूषिताः ।
नादविंदुसमायुक्ता नववीजानि चोद्धरेत् ॥
दुष्टग्रहनाशिन्यै च शुभफलदायिन्यै च ।
रुद्रासनायै तदनु सानुवीजं समाचरेत् ॥
समेखलाजलञ्चैव हूं खं वारत्रयं वदेत् ।
क्रोधत्रयं ठान्तत्रयं फट्त्रयं हृदयं द्विठः ॥
शवकालि ततः पश्चाद्वाणी त्रपा तथापरम् ।
सर्व्वदीर्घयुतं कञ्च नादविन्दुसमन्वितं ॥
पूर्व्वसंध्यवेहीनं नादहीनन्तथा प्रिये ।
क्रमेणषष्ठवीजानि वह्निस्थः क्षेत्रपस्तथा ॥
वमदग्निमुख ततः फेरुकोटिपरिवृते ।
विस्रस्तजटाभारे च भगवति तथैव च ॥
नग्नकालि ततः पश्चाद्रक्ष पाहि द्वयं द्वयं ।
परमशिवपर्य्यङ्कनिवासिनि तथोच्चरेत् ॥
क तृतीयचतुर्थौ च वह्निसंस्थौ कलान्वितौ ।
एवञ्च पञ्चवर्ग्गाणां वीजानां दश चाहरेत् ॥
विकरालमूर्त्तितताम्रुपहृत्येति तत्परं ।
दर्शय क्रोधहृदयन्नग्नकालि ततः परम् ॥
पाशाङ्कुशवाग्भवाश्च प्रेतवीजन्तथापरम् ।
सर्गहीनं प्रेतवीजं नस्थं नादकलान्वितं ॥
आनन्दवीजं तदनु डूंकारं त्रिकुटा ततः ।
क्लैं रुधिरकालिकायै निपीतेतिस्मरेत्ततः ॥
वालनररुधिरायै त्व[१०५ क]गस्थिचर्म्मा ततः परम् ।
वशिष्ठायै महाश्मशानधावनप्रचलित ॥

पिंगजटाभारायै च नारसिंहं ततः परं ।
थ्रौं च्रौं फ्रौं ख्रौं ममाभीष्टसिद्धिं ततः ॥
देहिद्वन्द्वं वितरयुगलं क्रोधमेव च ।
डाकिनि राकिनि चैव शाकिनि काकिनि तथा ॥
लाकिनि हाकिनि चैव सद्यो धन नि चोद्धरेत् ।
नररुधिरं च ततः पिवद्वयं ततः स्मृतम् ॥
महामांसं खाद खाद वाग्भवं तारमेव च ।
